प्र.स.	प्रक्रियासर्वस्वम्।
पद्मप्रा.	पद्मप्राभृतकम्।
बु.च.	बुद्धचरितम्।
भर्तृ.	भर्तृहरिः।
भा.ना.च.	भासनाटकचक्रम्। ओरियण्टल् बुक् एजेन्सी, पूना।
भा.वि.	भामिनीविलासः।
मा.अग्नि.	मालविकाग्निमित्रम्।
मृत्.श.	मृच्छकटिकम्
रघु.	रघुवंशः।
शिशु.	शिशुपालवधः।
सौ.न.	सौन्दरनन्दम्।
P.P.	परस्मैपदी।
A.P.	आत्मनेपदी।
वि.	विशेषणम्।
a.	Adjective

श्रीः

ओं स्वस्ति श्रीगणेशाय नमः

संस्कृतवचोविच्छित्तिः, प्रत्ययार्थवैचित्री च

Sanskrit Idioms, Phrases and Suffixational Subtleties

अ

अंशक - वि. a अंशं यः हरति, भागहारी दायादः One who is entitled to take a share. (कौ. 861)

अंशहर (A) - वि. a दायादः One who is entitled to take a share.

अंशहार (B) - वि. a अंशं यः उद्यच्छति One who raises and carries a part of something. (कौ. 2923)

अंशूदकम् - नीहारजलम् Dew-water.

अंसपथः - स्थलमार्गः A land-route, An over land-route. (अर्थशास्त्रम्)

अंसभारः- अंसेन वोढुं शक्यः भारः A shoulder load, A head - load.

अंसभित्तिः - दृढः विशालः च अंसः Strong and wide shoulder. कपोलभित्तिः इत्यादयः see अश्वमतल्लिका

अकथंकथ- वि.a कथं कथम् इति यः न पृच्छति। यः न प्रश्नशीलः One who is not inquisitive. 'अधर्मिष्ठामकथयन्न कथामकथंकथः' (सौ.न. II. 32)

अकर्मन् -शास्त्रविरुद्धं कर्म An action not sanctioned by law.

अकल्यशरीर - वि.a रुग्णशरीरः One whose body is suffering from some illness. 'श्रुतं मया दृढम् अकल्यशरीरः महाराज इति' (भा.ना.च. 273)

अकाण्डताण्डवम् - असमये पाण्डित्यादि-प्रदर्शनाडम्बरः Unwarranted exhibition of one's erudition.

'अकार्षीः किम् ? ननु करोमि भोः' - ननु शब्दप्रयोगे प्रश्नप्रतिवचने भूते लट्। 'ननु करोमि भोः' इत्यस्य 'अकार्षम्' इत्यर्थः।
When an answer is given to a question with the word 'ननु' लट् should be used in the sense of past. Thus 'ननु करोमि भोः' means 'I have done : I did'. (कौ. 2780) एवम् 'अखादीत् किम् ? ननु खादति भोः' इत्यादयः।

'अकार्षीः किम् ? न करोमि; नाकार्षम्; अहं नु करोमि; अहं नु अकार्षम्' - न शब्दे नु शब्दे च प्रयुक्ते, प्रश्नप्रतिवचने, भूतार्थे लट् वा स्यात्। अत्र 'न करोमि' इत्यस्य 'नाकार्षम्' इति 'अहं नु करोमि' इत्यस्य 'अहं नु अकार्षम्' इति च अर्थः When न or नु is used in a sentence, in reply to a question लट् is optionally used in the sense of past. Thus 'न करोमि' here means 'न अकार्षम्'; 'अहं नु करोमि' means 'अहं नु अकार्षम्' एवम् 'अकार्षीत् किम्' ? 'सः न करोति; नाकार्षीत्' 'स नु करोति' 'स नु अकार्षीत्' (कौ. 2781)

अकालः - अनुचितः कालः Wrong or improper time. 'अकाले बोधितो भ्रात्रा

प्रियस्वप्नो वृथा भवान् । रामेषुभिरितीवासौ दीर्घनिद्रां प्रवेशितः ॥ (रघु 12.81)

अकालपुष्ट - वि.a अप्राप्तेऽपि वयसि शक्तिसंपन्नः Precocious. (क्षेमे)

अकालज्ञ - वि.a युक्तसमयज्ञानरहितः One who has no time sense, i.e. does wrong things at the wrong time. 'अत्यारूढो हि नारीणामकालज्ञो मनोभवः' (रघु. 12-33)

अकालिकम्- अव्य. Ind. हठात् Suddenly

अकिञ्चन - (1) वि. a न अस्य किञ्चन अस्ति इति अकिञ्चनः One who does not have anything (2) अव्य. Ind. न भवति किञ्चन, क्वचित् किञ्चित् उपयुज्यते इति अकिञ्चनम् । निष्प्रयोजनम् (ग.र.म. 158) Which is useful for nothing.

अकिञ्चित्कर - वि. a यः किमपि प्रयोजनं न साधयति Not producing or doing anything useful.

अकुतोभय - (1) वि. a कुतोऽपि भयं यस्य नास्ति One who does not have fear from anything or anybody. (2) अव्य. Ind. विना कुतोऽपि भयम् Without fear from anything.

अकृत - वि.a (1) यत् नैव स्थिरतया निर्णीतं स्थापितं वा Not established (2) यस्य प्रचारः प्रसिद्धिः नास्ति Not current not in vogue. (अर्थशास्त्रम्)

अकृतकारं करोति - कैरपि अकृतपूर्वं कर्म करोति । 'अकृत' शब्दोपपदस्य कृञ् धातोः पूर्वोक्ते अर्थे णमुल् (अम्) भवति, कृञ् धातुरेव प्रधानक्रियायां प्रयुज्यते He does a thing which was never done by anybody earlier कृ (ञ्) with अकृत as उपपद (preceeding word) णमुल् (अम्) at the end, in the above sense, and the same root is used in the main verb of the sentence. (कौ. 3357)

अकृतप्रवेश - वि.a यस्य अन्तः प्रवेशः निषिद्धः One who is not permitted to enter.

अकृतबुद्धि - वि.a ज्ञानशून्यः A person of immature mind.

अकृतश्रम - वि. a येन अध्ययनादौ परिश्रमः न कृतः Who never studied or exerted himself in any good work.

अकृता भूमिः - कृष्यर्थम् अनुपयुक्ता भूमिः Land which is not brought under cultivation. (अर्थशा)

अकृतास्त्र - वि. a अस्त्रप्रयोगे अकुशलः । अशिक्षितास्त्रः Untrained in the use of weapons.

अक्कः - वस्तुसंरक्षणस्थानम् Store room. 'अक्के चेन्मधु विन्देत किमर्थं पर्वतान् व्रजेत्'

अक्लिष्टकारिन् - वि. a विना क्लेशं कार्याणां कर्ता Unwearied in action.

अक्लिष्टव्रत - वि.a व्रतेभ्यः नियमेभ्यः यः न कदापि चलति Not swerving from religious vows or works undertaken.

अक्लीबम् - अव्य. Ind. यथार्थम्, यथातथम् Without reservation. True.

अक्षण - वि. a नास्ति क्षणः, योग्यः कालः यस्य One who or which does not know proper time. Inopportune. Unseasonable.

अक्षपटलम् - अभिलेखनिलयः Records office. Audit Office. (अर्थशास्त्रम्)

अक्षपरि - अव्य. Ind. अक्षेण विपरीतं वृत्तम् So as to be a loser by an unlucky throw of the dice. 'कन्दुकपरि' इत्यादि (क्रिकेट् क्रीडादौ)

अक्षयनीवी - धर्मकार्यार्थं कल्पितः स्थिरः निधिः A permanent charitable endowment.

अक्षरकोष्ठागारः - पदकोष्ठागारसदृशः वैयाकरणः (इति परिहासः) "A godown of words". A grammarian who does not know the proper use of words. (पद्मप्रा.)

अक्षर्य - वि.a अक्षरानुकूलम् । अक्षरसम्बद्धम् Relating to letters or syllables. True to the letter.

अक्षान् दीव्यति } Plays with the dice.
अक्षैः दीव्यति } द्वितीया is optional 'पत्राणि दीव्यति', 'पत्रैः दीव्यति' इत्यादयः ।

अक्षिकोपः - नेत्रबाधा Irritation of the eyes (क्षेमे)

अक्षिगतः - द्वेष्यः A man who is hated.

अक्षिजीवाञ्जनम् - नेत्रसौन्दर्याधायकम् अञ्जनम् A collirium to enliven the eyes (क्षेमे)

अक्षिणी खटखटायेते - नेत्रे परिभ्रमतः Eyes are reeling or rolling. 'क्षुधा मम अक्षिणी खटखटायेते' (मृ. शक.I)

अक्षिनिकाणं जल्पति - अक्षिणी निमील्य भाषते He speaks closing his eyes (काशिका 3.4.54)

अक्षिभ्यां मन्त्रितं, वाचा मूकितम् - प्रत्यक्षं दृष्टो विषयः वाचा निराक्रियते Eyes say 'yes', speech says 'no'. What is seen is being denied. (मृ.श.X)

अक्षिभ्रुवम् - अक्षिणी च भ्रुवौ च तेषां समाहारः Two eyes and two eyebrows (कौ. 945) नपुंसकैकवचनम्

अक्षिसंवित् - साक्षात् दर्शनजं ज्ञानम् Visual cognition

अक्ष्णा काणः - अक्षिविकारकृतकाणत्ववान् । येन अङ्गेन विकृतेन (सर्वस्य) अङ्गस्य विकारः उच्यते तदङ्गवाचकं पदं तृतीयायां प्रयुज्यते Blind by one eye. (His one eye is blind). When the defect of the body is mentioned, the defective limb is used in तृतीया । 'पादेन खञ्जः' (lame by one foot) करेण कुणिः (person defective by one hand) इत्यादयः ।

अक्ष्णोः प्रभातमासीत् - रात्रौ (कस्यचित्) अनिद्रितस्यैव प्रभातम् आसीत् 'Dawned on the eyes'. It dawned even when one is awake through out the night. (अभि.शा.II)

अगणिती मदने - यः मदनं न गणितवान् One who did not care Manmatha. सप्तमी विशेषः ।

अगण्डः - हस्तपादरहितः देहमध्यभागः Trunk without hands and feet. 'अगण्डभूतो विकृतो दावदग्ध इव द्रुमः' (रामा. 6.68.5)

अगतिका गतिः - साधूनाम् उपायान्तराणाम् अभावे अनुसर्तव्यः कनीयान् उपायः Last resort.

अगदंकारः - रोगापाकरणम् अथवा वैद्यः Curing the disease or a physician. (कौ.1007)

अगाधसत्त्वः - धीरः । स्थिरमानसः Possessing strong will power.

अग्निमिन्धः - अग्नेः प्रज्वालकः That which kindles the fire.

अग्नियानम् - विमानम् An aeroplane. 'व्योमयानं विमानं स्यादग्नियानं तदेव हि' (अगस्त्यसंहिता)

अग्निहोत्रं जुहोति- अग्निहोत्राख्यं कर्म करोति इत्यर्थः Performs Agnihotra. अत्र जुहोति

इत्यस्य केवलं करोति इत्यर्थः - Here 'जुहोति' merely means 'performs'.

अग्नौकृत्य / **अग्नौ कृत्वा** } - अग्नौ निक्षिप्य । तीक्ष्णं कृत्वा (समासः वैकल्पिकः) Having put in the fire. Having burnt. (compound optionally)

अग्रप्रदायिन् - यः प्रथमं ददाति One who gives first.

अग्रहारः - श्रोत्रियाणां निवासग्रामः यत्र उभयोः पार्श्वयोः हरिहरयोः आलये स्याताम् । हरेः अयं हारः । हरस्य अयं हारः । हारश्च हारश्च हारौ । अग्रे हारौ यस्य सः A colony of learned *Brāhmaṇas* with the temples of *Śiva* and *Viṣṇu* on either side.

अग्रे कृ* - प्राधान्यदानम्, To give precedence, 'सुराः चतुर्मुखम् अग्रे कृत्वा महेश्वरमगच्छन्' ।

अग्रेदिधिषुः (षूः) (1) अन्येन ऊढपूर्वां यः उद्वहति सः He who married a woman who was married earlier by somebody (2) ज्यायस्यां स्वसरि अनूढायामेव या कृतोद्वाहा सा A married woman whose elder sister is not yet married.

अङ्कपालिः / **अङ्कपालिका** } आलिङ्गनम् Embrace

अङ्किनी-अङ्कानां समूहः A number of marks

अङ्गरक्षक -वि.a Outer covering of the body. Shirt शरीराच्छादनम् (हिन्द्यां *अंगरखा*) (क्षेमे)

अङ्गहारयुक्तिः - आङ्गिकाभिनयरीतिः (क्षेमे) The aspect of dramatic supression through gesticulation.

अङ्गग्रहः - शरीरावयवे स्तब्धत्वकारी बाधाविशेषः Spasm. Seizure of the body with some illness.

अङ्गभङ्गः - शरीरभागे वातदोषकृता स्तब्धता Palsy or Paralysis of the body.

अङ्गभूमिः - असिधारा, सुरधारा Blade of a knife or sword.

अङ्गारीयाणि (काष्ठानि) - अङ्गारीकरणोपयुक्तानि Wood meant for making coal.

अङ्गार्या - अङ्गाराणां समूहः A heap of coal

अचतुरः -न विद्यन्ते चत्वारि यस्य सः अचतुरः 1) One who does not have four qualities 2) less than four.

अचिन्तितोपनत - वि.a Occurring unexpectedly.

अचिरप्रवृत्त - वि.a अद्यैव (अचिरकालादेव) कृतप्रारम्भः अथवा उद्भूतः (आविर्भूतः समागतो वा) (An act which has just started) Recently started or recently happened.

अचिरप्रसूता - अल्पात् कालात् पूर्वमेव प्रसूता Having very recently brought forth a child. (newly delivered)

अच्छिद्र - वि.a दोषरहिता faultless.

अजकनाशं नष्टः - अजक इव नष्टः (औपम्यं गम्यते) Perished or died like a lamb. 'गजभञ्जं बभञ्ज' - यथा गजः भञ्जयति तथा बभञ्ज Broke like an elephant. 'गजगामं गच्छति' गज इव गच्छति Walks like an elephant इत्यादयः ।

अजगरव्रतम् -स्वसमीपागतमेव भक्षयतः अजगरस्य रीतिम् अनुसरन् यः अप्रयत्नोपलब्धेनाशनेन तृप्यति तस्य जीवनरीतिः The vow of eating only such food which comes without effort, like a big serpant which cannot move about.

अजभ्या - अजेभ्यः हिता Beneficial to goats.

अजय्यम् - A. जेतुम् अशक्यम् Invincible

अजेयम् - B. यत् जेतुं न योग्यम् Not conquerable.

* Any verb form, guaranted from the root 'कृ'

अजर्यम् - चिरस्थायि सौहृदम् Everlasting friendship.

अजरिता - अजीर्णः Not wornout. 'अजरिता कम्बलः' (मा.धा.वृ. पृ.408)

अजस्त्र - वि.a सर्वदा जनैः काम्यमानम् That which is in constant demand (अर्थशास्त्रम्)

अजाकृपाणीयम् - यादृच्छिकम् (1) 'अजाया आगमनमिव तस्याः कण्ठे कृपाणपतनमिव अजाकृपाणीयम्' Like the coming of the goat and the falling of the sword on its neck. (2) स्वयंकृतं स्वनाशहेतुः कर्म। यथा अजया भूमिं खनन्त्या आत्मवधाय कृपाणो दर्शितः तत्तुल्यं वृत्तं केनचित् आत्मविनाशाय कृतम् अजाकृपाणीयम् (ग.र.म. पृ.239) When a butcher was looking for a sword the goat dug the earth and a sword came out. Something done by one for his own destruction is likened with.

अजागलस्तनः- अजागलस्तनवत् निरर्थकम् Useless like dug hanging at the neck of a goat.

अजातव्यवहार -वि.a लोकव्यवहारानर्हवयाः। कौमारावस्थः A minor who cannot engage himself in legal affairs. (अर्थशास्त्रम्)

अजात्य -वि.a (1) अशुद्धजातिः Illegitimate (2) कृत्रिमौषधरत्नादिः Spurious. (अर्थशास्त्रम्)

अजां ग्रामं नयति - Takes the goat to the village. नीधातुः तत्समानार्थकाश्च धातवः द्विकर्मकाः 'नी' and its synonims govern two objects. 'बालं पाठशालां प्रापयति' इत्यादयः।

अजाविकम् - अजाश्च अविकाश्च तेषां समाहारः। नित्यं समाहारद्वन्द्वसमासः एकवचनं च Goats and sheep. Always in singular number in समाहारद्वन्द्व (प्र.सू.2317)

अजैडकम् -अजाश्च एडकाश्च तेषां समाहारः Goats and sheep. See अजाविकम् (प्र.स.2317)

अञ्चितः } पूजितः Honoured

अक्तः } प्राप्तः Reached, obtained.

अणव्यम् } अणूनां(धान्यविशेषाणाम्) भवनम्

अणवीयम् } उत्पत्तिस्थानम् The field where the *Aṇus* are cultivated.

अण्डरायते - अनण्डरः अण्डरः भवति। अण्डरः= मूर्खः, बृहदण्डश्च He who was not an obstinate becomes obstinate or who develops large testicals.

अतटप्रपातः - अत्युन्नतं पतनस्थानम् A steep precipice.

अतथोचित -वि. a तादृशव्यवहारादौ अनुचितः। अपरिचिततादृशविषयः Not deserving such treatment. Not used to such things.

अतदर्हम् - अव्य. Ind. तादृशविषयानर्हया रीत्या Unjustly, Undeservedly.

अतन्त्र -वि.a (1) अप्रतिबद्धः Not restrained (2) प्रकृतविषयासंबद्धः, प्रकृतनियमासंबद्धः Not being the object of the rule under consideration.

अति - अः इव आचरति Behaves or appears like *Viṣṇu.*

अतिकथा - अतिशयोक्तिभरिता कथा An exaggerated tale.

अतिकल्यम् -अतीव प्रभातम् Early morning.

अतिकामुकः - श्वा A dog.

अतिक्रान्ताः - मृताः Those who passed away. 'न खलु अतिक्रान्तानामेव' (भा.ना.च. पृ. 277)

अतिक्षिपति - Throws very much 'अति' इति उपसर्गेण युक्तः क्षिपधातुः परस्मैपदी। √क्षिप् with अति takes P.P. (कौ.2746)

अतिग्रह - वि.a बोद्धुम् अशक्यम् Difficult to comprehend.

अतिचर्* - अमार्गे गम्* To transgress.

अतिचौरः - अतिनिपुणः चौरः Expert thief (क्षेमे)

अतिनिद्रम्-अव्य.Ind. निद्रा संप्रति न युज्यते It is not proper to sleep now. 'अतिभोजनम्' इत्यादि। (कौ. 652)

अतिपातितम् - कालान्तरे कर्तव्यतया निर्णीतम् Put off, delayed (to be postponed)

अतिप्रश्नः - अतिक्रम्य मर्यादां प्रश्नः Questioning in an improper manner.

अतिवर्तनम् -क्षन्तव्यः अपराधः Pardonable offence.

अतिभूमिः - अतिशयः, पराकाष्ठा, Excess, Culmination, Highest pitch.

अतिरस्कृतः अर्थलाभः - अवश्यं भावी धनलाभः Assured gain or income. (पं.त.4)

अतिश्वः (वराहः) -श्वानम् अतिक्रान्तः That which has over taken the dog (कौ.798)

अतिश्वी सेवा -शुनो जीवितादपि नीचा सेवा Service which is worse than the life of a dog.

अतिसंतापनष्टच्छाय - वि. a संतापातिशयेन नष्टशरीरकान्तिः Losing lustre of the body due to great heat or pain. (क्षेमे)

अतिसर्गः - (1) वशीभवनम् Giving up, surrender. (2) अनुज्ञा Permission. (अर्थशास्त्रम्)

अतिसारणम् -रहः देशान्तरात् वस्तूनामाहरणम्। Smuggling (अर्थशास्त्रम्)

अतिहिमम्-अव्य.Ind. हिमस्य अत्ययः (ध्वंसः) Destinction of the snow or of cold 'अतिघर्मम्' इत्यादि। (कौ.652)

अत्ययः - (1) अपराधः fault, offence (2) दण्डरूपेण ग्रहीतव्यात् अधिकस्य धनस्यादानम् Penalty. (अर्थशास्त्रम्)

अत्यर्थवेदनः - गजः। अत्यल्पमपि दण्डं यः न सहते A variety of elephant sensible to the slightest punishment.

अत्यायतं छिद्यते - अतीव निर्बन्धादिकं न कर्तव्यम् इत्यर्थे प्रयोगः "Anything stretched too much gets snapped". one should not bring too much pressure.

अत्याचारः - अनुचिताचरणम् Atrocity.

अत्यारूढः - परां कोटिम् अधिरूढः। अत्यधिकः Which has reached the highest pitch. 'अत्यारूढेण निहतोऽयं न शत्रुणा'

अत्याहरयमाणः -बलेन धनं गृह्णन्। परेषां कार्येषु हस्तक्षेपकरः Extorting money or unduly interfering in others' work.

अत्याहितम्-'हठात् उपनता महती विपत्'। दुर्वार्ताश्रवणाद्यनन्तरं मनोगतं भावावेशं प्रकटयितुम् एवमुच्यते प्रायः Great danger. Generally used to indicate the sudden feelings of a person on hearing a sad news. 'वासवदत्ता - अत्याहितम्; (भा.ना.च पृ.18)

अत्र गृह्यते अत्र गृह्यते - 'अत्रैव; अद्यैव' Here here; i.e. just now. 'नियोगपत्रम् अत्र गृह्यते अत्र गृह्यते इति चिन्तयन् अयं कालं यापयति'

अत्रभवान् (भवती) - पूजनीयः अयम्। पूजनीयः भवान् (समीपस्थस्य पूजनीयस्य निर्देशे प्रयुज्यते) An honorific term used while referring to a respectable person who is present, like 'your honour'. 'His Highness'.

* Any verb form, guaranted from the root 'नर'

अत्रत्य - वि. a अत्र विद्यमानः। विद्यमानः इत्यर्थे 'त्य' इति प्रत्ययः तत्र, यत्र, कुत्र, अमुत्र इत्यादिभ्यः परः प्रयुज्यते Existing here. 'त्य' is a suffix added to the words like तत्र, यत्र, कुत्र अमुत्र in the sense of existing. तत्रत्यः, यत्रत्यः, कुत्रत्यः, अमुत्रत्यः इत्यादि।

अत्रान्तरे - 'यदा इदं कार्यमेव प्रवर्तते तस्मिन्नेव समये' In the meantime.

अथ किम् - अन्येन कृतस्य प्रश्नस्य 'एवमिदम्' 'नूनम्' इत्यर्थे उत्तरतया प्रयुज्यते रूपकेषु "Yes, certainly so what else ?" 'राजा - सर्वथा अप्सरःसंभवैषा ! अनसूया - अथ किम्।' (अ.शा. I)

अथ किमु - कियद्वा अधिकम् ? How much more. So much more. 'सः गुरूनेव अधिक्षिपति। अथ किमु अन्यान्'।

अदस्यति - (1) अमुम् आत्मने इच्छति He wants that for him (2) असौ भवति It becomes that.

अदृष्टकर्मन् - कर्माचरणाभ्यासरहितः One who has no proven talent or achievement.

अदृष्टलवणा - 'यया कदापि लवणं न दृष्टम्' अतीव दारिद्र्यपीडिता 'One who has never seen salt'. Very poor. (क्षेमे)

अदेशः - अयुक्तो देशः Wrong place. Improper place.

अदेशकालः - अयुक्तदेशकालः Wrong place and time.

अद्यपूर्वम्-अव्य.Ind. अस्मात् समयात् दिवसात् वा पूर्वम् Before now.

अद्यश्वः - अव्य.Ind. Now-a-days (हिन्दी-आजकल)

लीलालुण्ठितशारदापुरमहासंपद्भराणां पुरो
विद्यासद्मविनिर्गलत् कणमुषो वल्गन्ति चेत्पामराः।
अद्यश्वः फणिनां शकुन्तशिशवो दन्तावलानां शशाः
सिंहानां च सुखेन मूर्धसु पदं धास्यन्ति शालावृकाः॥
(पण्डितराजस्य प्रास्ताविकविलासः 70)

अद्यश्वीन - वि.a अद्य श्वो वा भवति That which may occur to-day or tommorrow 'अद्यश्वीनं मरणम्' इत्यादि।

अद्यश्वीना - अद्य श्वः, परदिने वा विजायते, जनिष्यते प्रसोष्यते वा। अद्यश्वीना One who is going to be delivered or to deliver (a child) to-day or tomorrow. 'अद्यश्वीना गौः' इत्यादयः।

अद्यावधि - (1) एतत्कालप्रभृति From to-day (2) एतत्कालपर्यन्तम् Till to-day.

अद्रव्ययत्नः - अयोग्यस्य द्रव्यस्य साहाय्येन, अयोग्यं द्रव्यं योग्यं कर्तुं वा क्रियमाणः व्यर्थः यत्नः Efforts to achieve something with the help of an unworthy object or person or the effort to set-right a useless object or person. 'अद्रव्ययत्नः वालुकाक्राथनात् अनन्यः' (*Adravya yatna* is nothing but boiling the sand) (चाणक्यनीतिसूत्रम् V.26)

अधनापवादः - दारिद्र्यकृतः लोकापवादः Scandals concerning poverty or due to poverty (क्षेमे) (blame because of poverty)

अधमर्णः - ऋणे अधमः अधमर्णः। ऋणस्य ग्रहीता। (पदयोः व्युत्क्रमः) One who is inferior in the transaction of the loan. Debtor (Change in the order of words) (प्र.स.2199)

अधरभक्तम् -भोजनानन्तरं ग्राह्यम् To be taken after meals.

अधरेद्युः - पूर्वदिवसे On previous day.

अधरोत्तरम् - क्रि.वि. Adv. अधरस्य उत्तरतया उत्तरस्य अधरतया भावः Topsy-turvy. (2) (N) अधरश्च उत्तरश्च तयोः समाहारः अधरोत्तरम् । अधरश्च उत्तरश्च अधरोत्तरौ । Lower one and upper one. (अधरोत्तराभ्यां द्वन्द्वः वा एकवत् भवति) *Dvandva* with the above words is optionally used in singular number. (प्र.सं. 2318)

अधिकरणम् - न्यायस्थानम् Court of justice.

अधिकरणद्विजः-सर्वदा अधिकरण-गमनशीलः A court bird. (क्षेमे)

अधिकरणपत्रलिखितम् - आधिकारिकपत्रं तल्लिखितं च Writing on a stamp. A letter of authority. (क्षेमे)

अधिकरणभट्टः - न्यायालये नियुक्तः अधिकारी An officer in the court. (क्षेमे)

अधिकरणभोजकाः - न्यायालयाधिकारिणः Officers in the court. (मृ.श.)

अधिकरणमण्डपः-न्यायालये शाला Court hall.

अधिकरणलेखकः-कार्यालये लेखन-कर्माधिकारी Official in charge of preparing documents.

अधिकरणिक -न्यायाधिकारी, न्यायालय अधिकारी Judge or officer in the court. (मृ.श.)

अधिकारपरिभ्रंशः - अधिकारभ्रष्टत्वम् Loss of power or authority. (क्षेमे)

अधिकारमदः - अधिकारकृतः गर्वः Varity of authority. (क्षेमे)

अधिकुरुते - क्षमते अभिभवति वा। (अधिपूर्वः कृञ् धातुः पूर्वोक्ते अर्थे आत्मनेपदी) Tolerates or pardons or dominates (suppresses) (कृ with अधि in the above sense takes आत्मनेपद) 'शत्रुम् अधिकुरुते' इत्यादि। (कौ. 2706)

अधिक्षिपति - दूरतः क्षिपति । निन्दति । अधिपूर्वः क्षिपधातुः परस्मैपदी Throws out. √क्षिप्* with अधि is used only in *parasmaipadī*. (कौ. 2746)

अधिचतुरम् - अव्य.Ind. तेषु चतुर्षु अथवा तेभ्यः चतुर्भ्यः अधिकम् On or above those four. (प्र.स.2091)

अधिचर्मम् / **अधिचर्म** } अव्य.Ind. चर्मणः उपरि on the skin. (प्र.स.2093)

अधिदिवम् - अव्य. Ind. द्युलोके In the heaven. (प्र.स. 2091)

अधिपौर्णमासम् / **अधिपौर्णमासि** } अव्य. Ind पौर्णमास्याम् (प्र.स. 2094) On the day of *paurṇamāsi*.

अधिभोजनम् - (1) भोजनसमनन्तरमेव भोजनम् Excess in eating. (2) अधिकं पारितोषिकं वस्त्रादिरूपम् Additional gift.

अधिमानसम् - अव्य.Ind. मनसि In the mind. (प्र.स. 2091)

अधियदम् - अव्य.Ind. यत्र On which 'अधियदं दृष्टः उपतदम् आस्ते' (यत्र दृष्टः तत्समीपे आस्ते He is near that place where he was seen) (प्र.स. 2091) see उपतदम् also.

अधिवचनम् - कस्यचित् विषये अनुकूलतया कथनम् Recommendation. Speaking in favour of

अधिशेते कैलासं महेशः - *Maheśvara* lives supreme *kailāsa*. When the roots

शीङ्, स्था and अस् are preceded by अधि the आधार (the place of dwelling) becomes कर्म and so instead of सप्तमी, द्वितीया is to be used. अधिपूर्वकाणां शीङ्, स्था, अस् धातूनाम् आधारः कर्म स्यात् । (कौ.542)

अधिष्ठानम् - पालकानां प्रधानं निवासस्थानम् Head quarters. (अर्थशास्त्रम्)

अधिहिमवतम् - अव्य. Ind. हिमवतः उपरि on the mountain *Himavat*. (प्र.स. 2091)

अधीती व्याकरणे-व्याकरणम् अधीतवान् Studied *Vyākarana*. (सप्तमी)

अधीयन् - सुखम् अध्येता (इङ् धातोः अस्मिन्नेवार्थे शतृ (अन्) प्रत्ययः) One who studies without difficulty. (the suffix शतृ (अन्) is added to the root इङ् only in this sense) (कौ. 3110)

अधोऽधो लोकं हरिः - हरिः लोकस्याधः समीपे वर्तते (अधोधः शब्दे उपपदे सामीप्यार्थे द्वितीया प्रयुज्यते) Hari is below the world nearby. अधोधः governs द्वितीया when nearness is implied.

अधोनाभम् - अव्य. Ind. नाभेः अधः Below the navel. (ग.र.म. पृ.132) अव्ययीभावे अकारान्तत्वम् ।

अद्धाकृत्य / **अद्धाकृत्वा** } साक्षात्कृत्य Having clearly perceived. (समासः वैकल्पिकः) *Samāsa* is optional.

अध्यनसम् - अव्य. Ind. शकटस्योपरि On the cart. (प्र.स. 2090) अकारान्तत्वम् ।

अध्यधिसुखम् - (अव्य. Ind.) सुखस्य उपरिष्टात् समीपकाले दुःखम् Misery at the time immediately after happiness. (कौ. 2142)

अध्ययनात् पराजयते - 'परा' पूर्वकस्य जिधातोः प्रयोगे यत् न सह्यते तद्वाचकात् पञ्चमी He shrinks from/shirks studies. When the root जि with परा (to get defeated) is used, the object or person which is not withstood is used in पञ्चमी । 'धावनात् पराजयते' 'क्रीडायाः पराजयते' इत्यादयः ।

अध्ययनेन निमित्तेन वसति
अध्ययनाय निमित्ताय वसति
अध्ययनात् निमित्तात् वसति
अध्ययनस्य निमित्तस्य वसति
अध्ययने निमित्ते वसति
} He stays for studies. When words निमित्त, हेतु and their synonims are used in a sentence, they take any one of the five *vibhaktis* from तृतीया onwards. निमित्तपर्यायाणां प्रयोगे तृतीयादयः पञ्च विभक्तयः विकल्पेन प्रयुज्यन्ते । सेवया हेतुना वसति । 'भिक्षया कारणेन अटति' इत्यादयः ।

अध्यर्धकार्षापणम् / **अध्यर्धकार्षापणिकम्** } अध्यर्धकार्षापणेन क्रीतम् Bought for one and half *kārṣāpaṇas* (*kārṣāpaṇa* is a coin) अध्यर्धरूप्यम् - अध्यर्धरूप्यिकम्, अध्यर्धडालरम् - अध्यर्धडालरिकम्' इत्यादि ।

अध्यर्धखारीकम् - सार्धखारीप्रमाणं व्रीह्यादिकम् Of the measure of one and half *khāris*. 'अध्यर्धकिलोग्रामकम्' 'अध्यर्थलीटरकम्' इत्यादि ।

अध्यर्धपणम् - अध्यर्ध (सार्ध) पणेन क्रीतम् Bought for one and half *paṇas*.

अध्यर्धपाद्यम् - अध्यर्धपादेन क्रीतम् Bought for one and half *pādas*. (a coin)

अध्यर्धविंशतिकम् - अध्यर्धविंशत्या क्रीतम्;

अथवा अध्यर्ध विंशतिसंख्याकम् Bought for twenty and half or amounting to twenty and half.

अध्यर्धविंशतिकीनम् - अध्यर्धविंशत्या क्रीतम् Bought for twenty and half.

अध्वनीन -वि. a अध्वानम् अलं गच्छति यः। शीघ्रं मार्गे गमनसमर्थः Able to undertake journey, roadworthy.

अध्वन्य - वि. a (1) अध्वानम् अलं गच्छति यः। शीघ्रं मार्गे गमनसमर्थः Able to undertake journey (2) अध्वनि हितम् Useful on the road (in the journey)

अनभिवादक -वि. a यः विरोधम्, अनङ्गीकारं, प्रकटयति One who opposes or contradicts 'न खलु भवान् अस्मत्संकल्पानभिवादकः' (अविमारक-I)

अनभिसार -वि. a (1) इदं मदीयमिति केनाप्यनुक्तम् Unclaimed (2) सञ्चितधान्यादिसाहाय्यशून्यम् Without help (of reserves, supplies etc.) (अर्थशास्त्रम्)

अनभ्याशमित्यः - यस्य समीपं न गन्तव्यं तादृशः दुष्टः दूरतः परिहर्तव्यः A rogue who should be avoided from a distance 'पायं पायमयं मत्तः प्राप्तोऽनभ्याशमित्यताम्'।

अनर्घ -वि. a यस्य मूल्यं निश्चेतुम् न शक्यम्। अत्यधिकमूल्यम् Of high value

अनवकाशिकः - एकस्मिन् पादे स्थित्वा यः तपः चरति One who performs penance standing on one foot.

अनागतविधाता - आपदां पूर्वमेव प्रतीकारपरः One who takes precationary steps before any calamity strikes. (पं.त. पृ.47)

अनात्मज्ञः -स्वशक्त्यादिज्ञानशून्यः 'Not knowing oneself', foolish, silly.

अनुकरोति - Imitates 'अनु' पूर्वः कृञ्धातुः परस्मैपद एव प्रयुज्यते। √'कृ' with अनु takes P.P. only.

अनुकामीनः -यथेष्टं गन्ता। यथेष्टप्रवृत्तिः। (कौ.2745) One who goes and acts as he likes.

अनुक्रीडते - Plays अनुपूर्वः क्रीडधातुः आत्मनेपदी भवति। √'क्रीड' with अनु is used in *Ātmanepadī* only.

अनुगणिती निरुक्ते -निरुक्तम् अनुगणितवान् One who examined *Nirukta* (सप्तमी)

अनुगवं यानम् - गोः आयामेन सह आयामं यानम् The cart of the length of the bull (प्र.स. 2098)

अनुगवीनः - गोः पश्चात् अलं गच्छति Cowherd.

अनुज्येष्ठम् -ज्येष्ठस्य आनुपूर्व्येण In the order of seniority एवम् 'अन्वागमनं जनेभ्यः वस्तूनि दीयन्ते' इत्यादयः।

अनुतूलयति - तृणाग्रेण (तूलेन) अनुघट्टयति Presses or rubs with the end of grass/cotton.

अनुत्तम - वि. a अतीव उत्तमः। (न विद्यते उत्तमः यस्मात् सः) Very great. Having no superior.

अनुद्यम् (A)-यत् न कथनीयम्। (गुरुनामादिकं) That which should not be uttered (teacher's name etc.)

अवद्यम् (B)-(पापादिकं) यत् नोच्चरितव्यम्। (Sin etc.) Which should not be mentioned.

अनुपठिती वेदे - वेदम् अनुपठितवान् One who recited *Veda* following somebody else. (सप्तमी)

अनुपथम् - अव्य.Ind पन्थानम् अनुसृत्य Following the path (प्र.स.2091)

अनुपदी - अनुपदम् अन्वेष्टा One who is in

search of something or somebody following the foot steps.

अनुपदीना (उपानत्) - अनुपदं बद्धा उपानत् (पदसंबन्धिदैर्घ्योपलक्षितेत्यर्थः) A shoe (tied to the foot completely covering) properly/perfectly fit.

अनुयात्रम् - अव्य. Ind. अनुसृत्य गच्छन्तः Follower. Retinue 'आश्रमद्वारमात्रमपि भरतस्य अनुयात्रं भविष्यामः (भा.ना.च.293)

अनुयुक्ती शास्त्रे -शास्त्रम् अनुयुक्तवान् One who enquired about the important points in a *śāstra*. (सप्तमी)

अनुरहसम् - अव्य. Ind रहसि In secret, In a secret place. (कौ. 949. प्र.स. 2353)

अनुरूपम् - अव्य. Ind. रूपस्य योग्यम् Matching in form 'अनुकालम्' इत्यादि। अनुरूपा पत्नी suitable wife (कौ.652)

अनुलोमम् - अनुगतं लोमानि अनुलोमम् Following the direction of the hair on the body favourable. See प्रतिलोमम्। (कौ. 943) अकारान्तत्वम्।

अनुलोमयति - 'लोमानि अनुमार्ष्टि', अनुकूलं करोति Makes favaourable.

अकुलोमसंभाषा - See 'सन्धायसंभाषा'

अनुवदते कठः कलापस्य -कठः कलाप इव वदति *Kaṭha* speaks like *Kalāpa*. अनुपूर्वः वदधातुः व्यक्तवाचां समुच्चारणे अकर्मकत्वे च आत्मनेपदी भवति।'√वद्' with अनु is used as आत्मनेपदिन् when beings of clear speech are involved and when it used as अकर्मक (intransitive). सकर्मकत्वे तु परस्मैपद्येव If it is transitive it takes P.P. 'उक्तम् अनुवदति'। (कौ. 2722)

अनुविष्णु -अव्य.Ind. विष्णोः पश्चात् Just behind *Viṣṇu* 'अनुपदम्' इत्यादि। (कौ.652)

अनुहरिं सुराः - सुराः हरेः हीनाः Gods are below *Hari* in rank हीनार्थे अनुना द्वितीया प्रयुज्यते। 'अनु' indicative of inferiority governs द्वितीया। 'अनुप्राध्यापकम् अध्यापकाः' इत्यादि। (कौ. 550)

अन्तःकोपः - प्रजानां स्वपालकविषये कोपः An insurrection inside the state (अ.शा.)

अन्तरपतितम् - व्ययाद्यनन्तरं शिष्टं धनादि Balance (of money) (अर्थशास्त्रम्)

अन्तरा त्वां मां हरिः -'अन्तरा' इत्यव्ययेन साकं द्वितीयान्तं प्रयुज्यते। There is *Viṣṇu* between you and me 'अन्तरा' governs द्वितीया। 'अन्तरा तव गृहं मम गृहं च चूतः अस्ति' इत्यादयः।

अन्तरेण धनं न सुखम् - 'अन्तरेण' इत्यव्ययेन द्वितीयान्तं प्रयुज्यते There is no happiness without money. The indeclinable 'अन्तरेण' governs द्वितीया। 'भक्तिमन्तरेण मनःशान्तिः नास्ति' इत्यादयः।

अन्तर्मुखः - अन्तर्मननशीलः Turned inwards. Introvert.

अन्तर्वाणिः -शास्त्रवित् (अन्तः वाणी यस्य सः।) One who knows *Śāstra*. learned

अन्तिकात् दृष्ट -वि. a Seen from nearly See स्तोकान्मुक्तः'। (अलुक् समासः) (प्र.स.2117)

अन्यः कृष्णात् - अन्यार्थैः योगे पञ्चमी स्यात् Other than *Kṛṣṇa*. The word 'अन्य' and its synonyms govern पञ्चमी। 'भिन्नः मनुजात्' 'इतरः पण्डितात्' इत्यादयः।

अन्त्यं प्रमाणम् -उत्तमं प्रमाणम् Highest authority. Last word.

अन्धकवर्तकीयम् - 'अन्धकवर्तकम् अन्धस्य

वर्तकाया उपरि अतर्कितः पादन्यासः उच्यते । तत्तुल्यम् अन्धकवर्तकीयम्' । यादृच्छिकम् । (ग.र.म.238) An act of coincidence, like a *Vartaka* bird coming under the foot of a blind man.

अन्धकारे नर्तितम् - व्यर्थं कर्म Dancing in darkness. Useless activity.

अन्धं करणम्-अनन्धम् अन्धं कुर्वन्ति अनेन That by which a man who is not blind is made blind.

अन्धं भविष्णुः - अनन्धः अन्धः भवतीति A non-blind person becomes blind.

अन्धतमसम् - अन्धत्वकारि तमः Blinding darkness (कौ.947)

अन्धमुखदर्पणम् - अन्धस्य मुखस्याग्रे धृतं दर्पणम् । व्यर्थः प्रयासः Holding mirror in front of a blind man. A vain effort.

अन्नं साधयति - (A) अन्नं निष्पादयति Cooks (prepares) *Anna*.

तपः तापसं सेधयति - (B) तापसः यथा तत्त्वं निश्चिनोति तथा करोति तपः Penance enables the ascetic to know the truth. ऐहलौकिके अर्थे विद्यमानस्यैव सिध्यतेः (सिध् धातोः) णिचि परे आकारः भवति - 'साधयति' इति रूपं भवति । पारलौकिकेऽर्थे तु आकारः न भवति । सेधयति इति रूपं भवति । The root सिध्, followed by णिच् (in its causative form) gets आकार when its meaning is connected with something mundane and becomes साधयति । Otherwise सेधयाति । (कौ. 2602)

अन्यथाकारम् - अन्यथा । अर्थे न भेदः । Otherwise. No change in the meaning. 'पिता अन्यथा वदति - पुत्रः अन्यथाकारं वदति' इत्यादयः । (कौ. 3348)

अन्यदर्थः / **अन्यार्थः** } अन्यः अर्थः । कर्मधारयः । Another thing (कौ.1026)

अन्यदाशा - अन्या आशा Another desire (कर्मधारयः) (कौ. 1025)

अन्यदाशीः - अन्या आशीः (कर्मधारयः) Another benediction. (कौ. 1025)

अन्यदास्था -अन्या आस्था (कर्मधारयः) Another stand or perseverance. (कौ. 1025)

अन्यदास्थितः - अन्यः आस्थितः (कर्मधारयः) Another person who has occupied. (कौ. 1025)

अन्यदीय -वि.a अन्यस्य अयम् Belonging to somebody else. (कौ. 1025)

अन्यदुत्सुकः -अन्यः उत्सुकः (कर्मधारयः) Another eager person (कौ. 1025)

अन्यदूतिः - अन्या ऊतिः, वयनम् (कर्मधारयः) Another weaving. (कौ. 1025)

अन्यद्रागः - अन्यः रागः (कर्मधारः) Another colour. (कौ.1025)

अन्वग्भूय, अन्वग्भूत्वा, अन्वग्भावम् आस्ते - अनुकूलम् आस्ते । अग्रतः पार्श्वतः पृष्ठतो वा अनुकूलः भूत्वा आस्ते इत्यर्थः To be favourable.

अन्वनडुहम् - अव्य. Ind. अनडुहः अनुसृत्य following the bulls. (प्र.स. 2091)

अपघनः-A शरीरावयवः - पाणिपादम् Limb of the body. (Hands and feet)

अपघातः-B अपहननम् Striking. (कौ. 3258)

अपचः - दुष्टपाचकः, पाके अनिपुणः A bad cook

अपचसि (त्वं जाल्म) - (रे निन्द्य) त्वं न सम्यक् पचसि । निन्दायां नञः नकारस्य लोपः

तिङन्ते परे (O! fool) You are cooking badly. 'न' which is used along with a verb drops its नकार when censure is implied एवं 'क्रीडासक्तोऽयं छात्रः अपठति ।' 'कार्यान्तरव्यापृतोऽयमुपाध्यायः अपाठयति' इत्यादयः ।

अपजानीते - अपलपति Conceals or denies. अपहनने अर्थे (अपलपनार्थे, ज्ञाधातुः आत्मनीपदी The root ज्ञा in the sense of denying is used as आत्मनेपदिन् । 'शतम् अपजानीते' conceals or denies hundred rupees etc., (having taken as a loan earlier) 'सः मम पुस्तकम् अपजानीते' इत्यादयः। (कौ. 2717)

अपरसमम् -अव्य.Ind. अन्यो वत्सरः Another year (प्र.स. 2084)

अपरस्पर -वि.a अविच्छिन्नप्रवृत्तायाः निरन्तरप्रवृत्तायाः क्रियायाः विषये प्रयुज्यते One after another uninterrupted. Continued (as applied to an action) अपरस्पराः सार्थाः गच्छन्ति। सततम् अविच्छेदेन गच्छन्ति इत्यर्थः। The caravan is going without any break or stop (कौ. 668) 'अपरस्परं प्रलपितम्' (continuous prattle) इत्यादयः ।

अपरिपणित-क्रि.वि.Adv 'मया इदं कर्तव्यं चेत् त्वया प्रथमतः एवं कर्तव्यम्' इत्यादि निर्बन्धरहितम् Without any stipulations and conditions.

अपरीक्ष्यकारिन् - यः लाभालाभपरीक्षां विनैव कार्ये उद्युक्तः One who acts without proper thinking and planning.

अपरेण ग्रामम् / **अपरेण ग्रामस्य** } अव्य.Ind. ग्रामस्य समीपतः पश्चिमदिशि । 'अपरेण' इति एनबन्तेन अव्ययेन योगे द्वितीया षष्ठी वा स्यात् Towards West near the village. अपरेण (Ind.) governs either द्वितीया or षष्ठी ।

अपष्ठु - क्रि.वि. adv. सदोषम् Wrongly

अपवदते - वाचा निरस्यति Refuses with words अपपूर्वः वदधातुः आत्मनेपदी ।√'वद्' with 'अप' is used as आत्मनेपदिन् । 'न्यायम् अपवदते' वचनेन निरस्यतीत्यर्थः ।

अपसमम् -अव्य. Ind. अपगतः वत्सरः By gone year (प्र.स.2084)

अपहरेः संसारः - हरिं विहाय अन्येषामेव संसारक्लेशः This cycle of births and deaths is there to all excepting *Hari* वर्जनार्थकेन 'अप' इत्यनेन अव्ययेन योगे पञ्चमी । 'अप' in the sense of excepting governs पञ्चमी । 'अपोन्नताधिकारिभ्यः नियमाः' इत्यादयः ।

अपि संनिहितोऽत्र कुलपतिः ? - (अ.शा.I) Is *Kulapati* present here? वाक्यस्यादौ अपिः प्रश्नं सूचयति । 'अपि' at the beginning of a sentence changes it into interrogative 'अपि क्रियार्थं सुलभं समित्कुशम्' (कुमार.V) इत्यादयः ।

कोऽपि -अज्ञातः पुरुषः Somebody किं शब्देन साकम् अपि शब्दस्य प्रयोगे अनिश्चितता द्योत्यते । 'अपि' affixed to interrogative pronoun and its derivatives makes the sense indefinite. किमपि something कदापि कुत्रापि at any time कथमपि Anyhow क्वापि somewhere इत्यादयः ।

अपि नाम -वाक्येषु 'अपि नाम' पदयोः प्रयोगः (a) 'प्रायः' इत्यर्थम् It is like may it be 'अपि नाम कुलपतेः इयम् असवर्णक्षेत्रसंभवा स्यात्' (अ.शा.I) (b) संभावनाम् perhaps in

all probability 'अपि नाम रामभद्रः पुनरपि इदं वनम् अलं कुर्यात्' (उत्त.च.II) (c) अभिलाषां च सूचयति would that or hope that. 'अपि नाम अहं पुरूरवा भवेयम्' (विक्र.II)

अपीतविपीतम् - न पीतं, परं तु यत्किंचित् यथाकथंचित् पीतम् Drunk but not properly drunk to full satisfaction.

अपुत्रः -अविद्यमानः पुत्रः यस्य सः One who does not have son. 'विद्यमान' in 'अविद्यमानपुत्र' is optionally dropped मध्यमपदलोपिबहुव्रीहिः । 'अधनः' 'अविद्यः' इत्यादयः (कौ.830)

अपूपीय / **अपूप्य** } वि.a अपूपाय हितम् Belonging to or intended for. अपूप, a cake.

अपेहिद्वितीया- 'अपेहि द्वितीय' इति यत्रोच्यते सा क्रिया अपेहिद्वितीया The act where the second person is asked to go out. (प्र.सं. 2166)

अपेहिप्रकसा-अपेहि प्रकसम्, दूरम्, इति यस्यां क्रियायां सा अपेहिप्रकसा The act of saying 'go away' (ग.र.म. पृ.158)

अपेहिवाणिजा - 'अपेहि वाणिज' इति यस्यां क्रयादिक्रियायां सा अपेहिवाणिजा Where it is said "O! merchant ! you go away" (प्र.स. 2166)

अपेहिविघसा-अपेहि विघस (उच्छिष्टाशिन्) इति यस्यां क्रियायाम् उच्यते सा अपेहिविघसा। The act of saying "Oh! eater of the leftout food go out". (प्र.स. 2166)

अपेहिस्वागता-'अपेहि स्वागतम्' इति यत्र (साधिक्षेपा) उक्तिः सा अपेहिस्वागता Where it is said (sarcastically) welcome, please go out". (प्र.स.2166). 'अत्र अपेहीति दुर्योजम्' इति प्रक्रियासर्वस्वकारः। अपेहि, स्वागतं ते इति परस्परविरुद्धं वचनमिति तस्याशयः। परं तु "गच्छ, गच्छ; स्वागतमेव' इति काकदिना अनादरोक्तिः भवेत्।

अप्रजाः- न विद्यते प्रजा, संततिः, यस्य सः One who has no children 'प्रजा' सकारान्तो भवति। 'स्' is added at the end.

अप्राप्तकालं वचनम् -अयुक्ते काले उक्तं वचनम् Something said in an inappropriate time. (पं.त. पृ. 12)

अप्सरायते -अप्सरा इव आचरति Behaves or appears like a nymph.

अप्सुयोनिः -अप्सु योनिः उत्पत्तिः यस्य सः That which is born in water. (सप्तम्याः अलुक्)

अब्रह्मण्यम्, अब्राह्मण्यम् -अन्यैराक्रान्तस्य रक्षार्थम् आर्तनादः A cry for help when a sinful act like murder is being committed (प्रायः रूपकेषु प्रयुज्यते generally used in dramas) 'नेपथ्ये अब्राह्मण्यम्' (अ.शा.VI)

अभयवनम् -तद्वनं यत्र जन्तूनां वधः निषिद्धः The forest where killing of animals is prohibited, a sanctuary (अर्थशास्त्रम्)

अभवन्मतसंयोगः -अद्य अभावेऽपि यथाकथंचित् संपादनीयः संबन्धः Combination which is desirable even if it is not existing.

अभितः गृहं वृक्षाः सन्ति -Trees are there on either side of the house. अभितः इत्यव्ययेन योगे द्वितीया प्रयुज्यते। 'अभितः' governs द्वितीया। "अभितः मन्त्रिणम् अङ्गरक्षकौ व्रजतः' इत्यादयः।

अभितः पश्यामि -अचिरादेव भविष्यति

अथवा समीप एव वर्तते इति चिन्तयामि Expect shortly; see nearby. 'अभित इव ते अद्य वरमुखं पश्यामि' (भा.ना.च.13) 'अभितः भारतस्य अभ्युदयं पश्यामः' इत्यादि ।

अभिदृशम् -अव्य.Ind. दृशोः अभिमुखम् In front of the eyes. (प्र.स.2091)

अभिनिवेशते सन्मार्गम्- सन्मार्गे अभिनिवेशवान् भवति He is firmly established in good conduct. 'अभि नि पूर्वकस्य विशधातोः आधारः कर्म भवति - द्वितीयायां प्रयुज्यते । The आधार of the root विश् with 'अभि' 'नि' (in the same order) becomes कर्मन् and so instead of सप्तमी, द्वितीया is used.

अभिप्लुत -वि.a विषयीकृतसर्वजनः Of universal application. 'धनिभिः आयकरो दातव्यः इति अभिप्लुतो नियमः' इत्यादयः ।

अभिमनायते -अभिमुखमनाः भवति Becomes favourable.

अभिमन्यमानः-शास्त्रविरुद्धया रीत्या लब्धुकामः Wishing to possess illegally. 'काश्मीरान् अभिमन्यमानः पाकिस्तानः उपद्रवं सृजति' ।

अभिशापः - असत्यदोषारोपपूर्विका निन्दा False accusation (अर्थशास्त्रम्) 'अभिशापे हि महती दुर्जनस्य प्रवीणता' इत्यादयः ।

अभिवादयते देवं भक्तम् / **अभिवादयते देवं भक्तेन** } Makes the devotee offer obiesance to the Lord आत्मनेपदी अभिवादिः (अभिपूर्वकः ण्यन्तः वदधातुः) विकल्पेन द्विकर्मकः । 'अभिवादयते' (वद् with 'अभि' in its causative form which is used as आत्मनेपदी) optionally governs two objects (कौ.541)

अभिषेनयति -सेनया अभियाति Attacks with army.

अभ्यागारिकः - (1) गृहे नियुक्तः कर्मकरः Domestic servant (2) कुटुम्बकार्यव्यापृतः One who is busy with family affairs.

अभ्यमित्रीण / **अभ्यमित्रीय** } वि.a अमित्राभिमुखं यः सुष्ठु गच्छति One who goes against the enemy boldly.

अभ्यमित्य अव्य.Ind. Going against the enemy.

अभ्यर्णम् } नातिदूरम् Nearby

अभ्यर्दितम् } पीडितम् Troubled (कौ.3065)

अभ्यवस्कन्दनम् -शत्रूणामाक्रमणम् Encountering an army vigorously.

अभ्याकाशम् -अव्य. Ind. आकाशस्याधः Beneath the sky.

अभ्याख्यानम् -असत्यदोषारोपः False allegation.

अभ्युपगम्यवादः -प्रतिवादिनः वादस्य अयुक्तत्वेऽपि तं 'तथैव भवतु' इति अङ्गीकृत्य अन्यदोषोद्घाटनम् Argument advanced after conceding to the point raised by the opponent for the time being.

अभ्यूषखादिका -यत्र अभ्यूषः पूरिका, खाद्यते स उत्सवः The festival when *Purikas* are eaten (कौ. 3286) 'समितावेसने जीरहिङ्गुमारीचयोजिते घृताक्ते जलसंयुक्ते पीठस्योपरि वेल्लिते । घृतेन वाथ तैलेन भर्जिता पूरिका मता' (बालमनोरमा)

अभ्यूषीयम् / **अभ्युष्यम्** / **अभ्योषीयम्** / **अभ्योष्यम्** } अभ्यूषोपयोगि वस्तु Belonging to, consisting of or fit to a sort of cake or bread. अभ्युष, अभ्यूष, अभ्योष इत्यपि नामानि, अभितः उष्यते (ऊष्यते) अग्निना दह्यते इति, रोटिका विशेषः, यैव पूरिका इत्युच्यते ।

अभ्रंकषः (वायुः) - मेघस्पर्शी (वायुः) Wind which touches and drags the clouds.

अभ्रलिप्ती (द्यौः) - किंचित् मेघावृतः (आकाशः) (The sky) Covered a little by clouds. (slightly clouded)

अभ्रंलिहः-अभ्रं लेढि इति अभ्रंलिहः - अतीव उन्नतः Touching the sky or the clouds

अभ्रायते -अभ्रं करोति That which forms clouds.

अमेधाः -न विद्यते मेधा यस्य सः One who is not possessed of intelligence (सकारान्तो भवति । स् is added) (कौ.862)

अयमहं भो !- Here I am. अन्येषां गृहद्वारं गतानाम् अतिथ्यादीनां स्वागमननिवेदने प्रयुज्यते The way of announcing one's arrival to a stranger's place.

अमाकृत्य / **अमाकृत्वा** } रहसि कृत्वा । संमेलयित्वा । संयोगं कृत्वा । समर्थं कृत्वा Having done in secret. Having united. Having made efficient समासो वैकल्पिक Compound is optional. (ग.र.म. पृ. 141)

अयमस्मि- 'अत्र अहम् अस्मि' । अन्यैः आहूतस्य प्रतिवचः 'I am here' 'Yes sir' used in answer when somebody calls.

अयं रामात् पृथक् / **अयं रामेण पृथक्** / **अयं रामं पृथक्** } He is different from Rama 'पृथक्' इत्यव्ययेन सह पञ्चमी, अथवा तृतीया अथवा द्वितीया प्रयुज्यते। 'पृथक्' (Ind.) Governs पञ्चमी, तृतीया or द्वितीया । 'अयं चूतात् पृथक्' इत्यादयः।

अरण्यरुदितम् -व्यर्थोपदेशः Crying in wilderness saying something which is not cared for by any one or when there is nobody to listen (पं.त.पृ.83)

अरण्यानी -महारण्यम् Big dense forest

अरिक्तकः -कार्यव्यापृतः Not free. Occupied with somework. अन्यमन्यं निमन्त्रयतु भवान् । अरिक्तकः तावदहम् । (भा.ना.च. पृ.194)

अरिंदमः -अरीन् यः दमयति Subduer of enemies. (अरिशब्दान्ते म्) 'म्' is added at the end of अरि

अरुंतुदः-मर्मस्थानपीडकः । अतीव रुजाकरः That which pierces through vital parts of the body. 'अर' इत्यस्यान्ते 'म्' । (कौ. 2950)

अरोचकिन् -यः परीक्ष्यैव काव्यादीनां साधुत्वासाधुत्वादिकम् अङ्गीकरोति Selective choosy critic. (का.अ.सू.I)

अर्गलीय / **अर्गल्य** } वि.a अर्गलोपयोगि। अर्गलायै साधु। Belonging to useful to a bolt or pin.

अर्घ्य -वि.a अर्घं पूजां मूल्यं वा अर्हति One who deserves worship or price.

अर्चिती सिद्धराजे -सिद्धराजम् अर्चितवान् One who had worshipped *Siddharāja*. (सप्तमी) 'अर्चिती शिवे' इत्यादयः।

अर्जयन् वसति -अर्जनार्थं वसति। हेतुं फलं च सूचयितुं शतृ (अन्) प्रत्ययः। अत्र निवासे अर्जनं हेतुः फलं च He lives here earning money i.e. for the purpose of earning. Here earning is both the reason and fruit of living. Indicating this शतृ (अन्) प्रत्ययः is added 'श्रमम् अपनुदन् निद्राति' इत्यादयः। (कौ.3103)

अर्जुनतः अभवन् देवाः - देवाः अर्जुनस्य पक्षे अभवन् The gods were on the side of *Arjuna* ('तस्' प्रयोगः) 'आङ्ग्लाः अमेरिकातः अभवन्' इत्यादि।

अर्थेकृत्य / **अर्थे कृत्वा** सार्थकं कृत्वा । सप्रयोजनं कृत्वा Having made purposeful or meaningful. 'अर्थेकृत्य श्लोकं पठति' (समासः वैकल्पिकः) (समास is optional) (ग.र.म.पृ.140)

अर्थ्यम् -(1) अर्थयुक्तम् Expressive of good meaning (2) प्रार्थनीयम् Fit to be requested for (3) Fit to be sought after, desirable.

अर्थापयति -अर्थं विवृणोति Explains the meaning. शास्त्रम् अर्थापयति; शास्त्रस्य अर्थम् आचष्टे (Explains the meaning of the sastra) इत्यादयः (प्र.सं. 525)

अर्धचन्द्रं ददाति -विस्तृतेन अर्धचन्द्राकारेण हस्ततलेन कण्ठे गृहीत्वा बहिः निष्कासयति Pushes a man by placing the crescent shaped palm on his neck (पं.त.पृ.23)

अर्धजरतीयम् -(1) अर्धजरतीशब्दः अर्ध-जरतीकामने वर्तते । तदिव यत् तत् अर्धजरतीयम् । यथा-स्त्री न तरुणी श्लथस्तनत्वात्; कृष्णकेशत्वात् न जरती वक्तुं शक्यते तद्वत् सिद्धासिद्धं प्रयोजनम् । (ग.र.म. पृ.239) One cannot get full satisfaction with a middle aged woman on that analogy anything which serves a purpose partially is called अर्धजरतीय । (2) 'जरत्याः अर्धमेव कामयते कामुकः । तत्सदृशम् अर्धजरतीयम्' इति केचित् । A lustful man wants only half of a middle aged woman. Similarly when half of something is accepted and half rejected by someone it is called अर्धजरतीय (3) कुक्कुटाण्डं जरती । तस्य एकम् अर्धं पाकाय अपरम् अर्धं शिशूत्पत्तये इति वचनं यथा न युक्तं तद्वत् एकस्य द्विधा उपयोगार्थं यत्नः अर्धजरतीयम् इति अपरे । जरती means a ripening egg. It is not possible to eat half of it and keep the other half to get chicken. Anything similar to that अर्धजरतीयम् according to others.

अर्धिक -वि.a (1) अर्धः (रूप्यकार्धः) अस्मिन् अस्मै वा वृद्धिः, आयः लाभः, शुल्कम्, उपदा वा दीयते अर्धिकः That in which or to whom, half of *Rūpyaka* is given as interest income, profit, tax or present (2) अर्धेन क्रीतः Bought for half (rupee).

अर्पितोतः (पटः) -पूर्वम् उतः ततः अर्पितश्च पटः । 'उतार्पितः' इत्यस्य स्थाने पदव्यत्ययेन 'अर्पितोतः' इति । The cloth first woven and then handed over. By change in the order of words it is used अर्पितोतः in stead of उतार्पित । (प्र.स. 2199)

अर्यः -A स्वामी वैश्यो वा Master or a *Vaiśya*.

आर्यः-B समीपं गन्तव्यः साधुपुरुषः One who can be approached. Respectable person. (कौ. 2851)

अर्वाक् ग्रामात् -To the south of the village. See 'प्राक् ग्रामात्' । 'अर्वाक् नद्याः' इत्यादि ।

अर्हन् - पूजनीयः Respectable person. (कौ.3113)

अलं श्रमेण-श्रमेण साध्यं नास्ति Nothing can be gained by overexerting गम्यमानायां 'साध्यम्' इति पदेन वाच्यायां साधनक्रियायां श्रमः करणम् । अतः तृतीया । Here श्रमेण is in तृतीया because श्रम is करण in the action denoted by 'साध्यम्' which is implied 'अलं the word गमनेन', 'अलं भाषणेन' इत्यादि ।

अलंकर्मीणः -कर्मणे अलम्, समर्थः Capable of doing the work (कौ. 2079)

अलं गत्वा -न गन्तव्यम् Should not go. निषेधार्थेन 'अलम्' इत्यनेन योगे 'क्त्वा' प्रत्ययः स्यात्। 'अलम्' in prohibitive sense governs क्त्वाप्रत्ययान्त (indeclinable participle) 'अलं हसित्वा' 'अलं पठित्वा'। 'अलम् अनुगम्य' इत्यादयः।

अलंपुरुषीणा- अलं पुरुषाय Enough for man. 'साचालंपुरुषीणा स्त्री समर्था पुरुषाय या' (प्र.स. 1995)

अलंभूष्णुः -समर्थः Competent

अलाबूकटम् -अलाबूनां रजः Dust of bottle gourd.

अलीकासते आत्मनः -अप्रियम् अनुभवति He suffers something which is not liked by himself.

अल्पम् -क्रि.वि. Adv. अतीव विरलतया Very rarely 'अल्पं तुल्यशीलानि द्वन्द्वानि सृज्यन्ते (भा.ना.च. पृ. 256)

अल्पान्मुक्तः -अल्पादेव प्रयत्नात् मुक्तः He was released by a small effort. अलुक्समासः -'अल्पात् त्यक्तः' इत्यादि See स्तोकान्मुक्तः।

अल्पान्मुदितः -अल्पमपि लब्ध्वा मुदितः Happy with even a small thing अलुक्समासः । पश्यत 'स्तोकान्मुक्तः'। (प्र.स.2117)

अल्पारम्भः -विना आडम्बरं कार्यस्य आरम्भः To begin a work without much fanfare. 'अल्पारम्भः क्षेमकरः'।

अवकल्पिती जल्पे -जल्पम् अवकल्पितवान् He who had formulated a kind of argument called जल्प (सप्तमी)

अवकीर्णी दुर्नये - दुर्नयम् अवकीर्णवान् One who has given up wickedness.

अवक्रयिन् -निश्चितरूपेण भाटकादि दत्वा गृहादिवासी Tenant (अर्थशास्त्रम्)

अवक्रीतकम् -भाटकेन गृहीतं वस्तु Something taken on rent (अर्थशास्त्रम्)

अवक्लिन्नपक्वम् -पक्वं च तत् अवक्लिन्नं च (पक्वत्वात् अवक्लिन्नं) अवक्लिन्नपक्वम्। (पदव्युत्क्रमः) That which is cooked and therefore is soaked. Change in the order of words. (प्र.स.2199)

अवगणिती वादिनि -वादिनम् अवगणितवान् One who did not care the opponent (सप्तमी) 'अवगणिती क्लेशे' इत्यादयः।

अवगल्भायते } अवगल्भा इव (धृष्टा इव)
अवगल्भते } आचरति A woman who behave like a termagant.

अवगिरते- अतिवेगेन भक्षयति Devours अवपूर्वकः गृ धातुः आत्मनेपदी। √'गृ' with अव takes आत्मनेपद

अवगाढः प्रदोषः -सायं समयः अतिक्रान्तः The evening time passed off. (भा.ना.च. पृ.135)

अवग्रहः-A (1) वर्षप्रतिबन्धः Lack of rain. Drought (2) पदविभागः Splitting of words (कौ.3226)

अवग्राहः- (1) वर्षप्रतिबन्धः Lack of rain, drought (2) अभिभवः। तिरस्कारः (निन्दायाम्, In the sense of abuse) अवग्राहः ते भूयात्। अर्थान्तरे तु 'अवग्रहः' In other sense 'अवग्रहः' (कौ. 3220)

अवधारिती शास्त्रे -शास्त्रार्थम् अवधारितवान् One who had clear understanding of what is contained in *Śāstra* (सप्तमी)।

अवमुक्ती पापे -पापम् अवमुक्तवान् One who got rid of sin (सप्तमी)

अवचनीय-वि.a अनिन्द्य Not to be blamed. 'अतिदरिद्रपुरुषासक्ता गणिका अवचनीया भवति' (भा.ना.च 214)

अवचिनोति वृक्षं फलानि -Collects fruits from the tree. द्विकर्मकोऽयं अवपूर्वकः चि धातुः । 'चि' with 'अव' governs two objects

अवटकच्छपः -गर्तस्थकच्छपसदृशः लोकज्ञानशून्यः A tortoise in a hole. Figuratively 'one who has had no worldly experience'. 'who has seen nothing of the world.'

अवतप्ते नकुलस्थितम् -'अतीव तप्ते स्थाने नकुलस्य स्थितिः' । अस्थिरचित्तता इत्यर्थः An ichneumon's standing on a hot ground. (Metaphorically said of the inconsistency of man)

अवतिष्ठते - आश्रित्य तिष्ठति Depends upon. Confides in. अवपूर्वकः स्थाधातुः आत्मनेपदी √'स्था' with 'अव' *Ātmanepadi* (कौ.2689)

अवमृष्ट- वि. a अन्याय्येन अपहृतं धनादिकम् Money etc., appropriated by fraudulent means. (अर्थशास्त्रम्)

अवयुत्यानुवादः-केषाञ्चिदंशानां पृथक् पृथक् विभज्य अनुवादः Referring to a thing in parts after careful analysis.

अवरहसम् -ईषत् रहः A little secret (प्र.स.2355) (अकाराद्यन्तत्वम्)

अवलोमम् -अवगतं लोम अवलोम Against the direction of the hair on the body. See 'प्रतिलोमम्' (कौ.943)

अवारपारीणः -(1) अवाक् तीरम् अवारम् । परतीरं पारम् । अवारपारे (अस्मिन् तीरे परस्मिन् तीरे च) जातः भवो वा अवारपारीणः The bank on this side is अवार The bank on other side is पार One who or which is born or living or being in अवारपार is अवारपारीण (2) अवारपारं गमिष्यन् अवारपारीणः One who goes from one bank to the other is also अवारपारीण । **पारावारीणः** (1) पारावारे जातः भवो वा पारावरीणः । (2) पारावारं गमिष्यन् पारावारीणः। The changing the order of words 'पारावारीण' Meaning is the same. **अवारीणः** (1) अवारेजातो भवो वा One who is born or stays on the bank of this side (2)अवारं गमिष्यन् अवारीणः One goes to the bank of this side **पारीणः** -(1) पारे जातः भवो वा पारीणः one who is born or stays on the bank of that side (2) पारं गमिष्यन् पारीणः । (प्र.स.1213; 1726) one who goes to the bank of that side. According to the dictionary of Apte- **अवारपारः**-समुद्रः Ocean **अवारपारीणः** (1) समुद्रसम्बन्धी Belonging to the ocean (2) यः नदीं तरति Cross a river **अवारीणः** यः नदीं तरति Cross river **पारावारीणः** (1) यः उभयपार्श्वौ गच्छति One who goes to both sides (2) शास्त्रादौ सर्वविषयवेत्ता Completely conversant.

अवतमसम् - अवहीनं तमः (gradually) Disappearing darkness (अकारान्त) (कौ. 947)

अवचूर्णयति -चूर्णैः अवध्वंसयति अवचूर्णयति दिशः । अवकिरतीत्यर्थः (प्र.स.पृ.525)

Sprinkles or covers with dust. 'झञ्झा-वातः अवचूर्णयति' इत्यादयः।

अवरुद्धिका - अन्तर्गृहनिक्षिप्ता वनिता A woman secluded in the inner apartment (क्षेमे)

अवश्यंकारी -अवश्यं येन कर्तव्यं सः One who has to do without fail. 'अवश्यं भावी' इत्यादयः। (कौ. 3311)

अवस्था तुलयति -अवस्था (पुरुषम्) अनीशम्, असमर्थं करोति Situation makes a man helpless or cheapens 'हा ! अवस्थे तुलयसि' (मृ.श.I)

अवस्रावणम् -देशात् निष्कासनम् Banishing from the country. (अर्थशास्त्रम्)

अवहारोपयोग्यः-पूर्वनिर्णयप्रतिघाते उपयोक्तव्यः उपायः Useful for breaking an appointment or decision (क्षेमे)

अविकटः -अवीनां समूहः Herd of the sheep 'कट' इति प्रत्ययः '*kata*' is a suffix

अविचारितरमणीयम् -यावत् सम्यक् विचारः न क्रियते तावत् रमणीयम् Apparently or outwardly good.

अविथ्या -अविभ्यः हिता Beneficial to the sheep

अविधा अविधा -महती विपत् आपतिता इति सूचकं द्विरुक्तं पदम् An interjection expressive of the fear caused by some, sudden happening.

अविनयप्रचारपुस्तकभाण्डस्य उद्घाटनम् - महता उत्साहेन आवेशेन च कस्यचित् अविनयानाम् एकैकशः प्रकाशनम् Opening a big register of somebody's misdeeds. To expose somebody's misdeeds. (पद्मप्राभृतकम्)

अविसंवादक -वि.a सत्यपालकः One who keeps his word (अ.शा.)

अवोषीय } वि.a उष्णभोज्यसम्बन्धि
अवोष्य } Belonging to hot food.

अव्यथ्यः - यः न व्यथते One who does not undergo suffering.

अव्ययम् - कुशलवार्ता Welfare 'युधिष्ठिरस्य चापृच्छत्सर्वांश्च सुहृदोऽव्ययम्' (भागवत. 10.8.31)

अव्याजसुन्दर-वि.a सहजसुन्दरम्, अकृत्रिमसौन्दर्यवत् Naturally beautiful

अशनायति } बभुक्षति Wants to eat food.
अशनीयति } अन्नं कालान्तरे भोक्तुं रक्षितुमिच्छति Wants to procure and preserve food.

अशिक्षितपटुत्वम् -उपदेशाभावेऽपि नैपुण्यम्। Efficiency even without training स्त्रीणामशिक्षितपटुत्वममानुषीषु संदृश्यते (अभि. V.22.)

अशितानशितम् -अशितं च अनशितं च। अल्पतयैव भोजनम् Half eating (like 'तिनी-तिनक' in Telugu) 'अशितानशितेन जीवति' (living half-starved) (प्र.स.2154)

अश्नीतपिबता-अश्नीत पिबत इत्युच्यते यस्यां निदेशक्रियायां सा अश्नीतपिबता Invitation to eat and drink. A feast where people are called to eat and drink.

महानसेऽत्र वितता नित्यं पचतभृज्जता।
तथा भोजनशालायामश्नीतपिबतान्वहम्॥

अश्वकः -(1) कस्य वा इति अज्ञातः अश्वः Horse whose master is not known (2) कुत्सितः अश्वः A bad horse 'वृषभकः', 'मनुष्यकः' इत्यादि।

अश्वकुञ्जरः - 'अश्वः कुञ्जर इव' । उत्तमः अश्वः। 'Elephant like horse'. See 'गोवृन्दारक'

अश्वमतल्लिका - (स्त्रीलिं) श्रेष्ठः अश्वः Good horse मतल्लिका, उद्ध, मिश्र, प्रकाण्ड, स्थल, भित्ति, हस्त, पाश, तट, पाद, फली, मचर्चिकादीनि प्रशस्तवाचकानि Words like मतल्लिका (shown above) are used at the end of nouns to indicate respect, superiority and greatness etc. 'गोमतल्लिका', 'पुरुषमतल्लिका' इत्यादि।

अश्ववडवम् / **अश्ववडवौ** } अश्वश्च वडवा च Horse and mare अश्ववडवाशब्दयोः द्वन्द्वः वा एकवद् भवति । *Dvandva* of the above words is optionally used in singular number. (प्र.स.2318)

अश्वषड्गवम् - अश्वानां षट्कम् Six horses ('षड्गव' इति प्रत्ययसदृशः शब्दः)

अश्वस्तनिकः-श्वः पाकादि कर्तुं यस्य सविधे किमपि नास्ति One who has nothing for tomorrow to eat.

'कुसूलधान्यको वा स्यात् कुम्भीधान्यक एव वा त्र्यहैहिको वापि भवेदश्वस्तनिक एव वा (मनु.स्मृ.IV.7)

अश्वस्यति-अश्वमात्मनः मैथुनार्थमिच्छति (वडवा) The mare wants a horse for mating. (कौ. 2662)

अश्वीय / **अश्व्य** } वि.a अश्वसम्बन्धि । अश्वाय हितम् Belonging to a horse or agreeable to horses.

अश्व्य-वि.a अश्वानां समूहः Group of horses.

अषडक्षीणः (मन्त्रः)-अविद्यमानानि षट् अक्षीणि श्रोत्रेन्द्रियाणि यस्य सः । द्वाभ्यामेव कृतः इत्यर्थः The counsel in which only two persons (not three) participate.

अष्टक्य-वि.a अष्टकेन क्रीतम् Bought for eight.

असंख्यात-इदमेवेति एवमेवेति वा न निर्धारितम् Not specified (अर्थशास्त्रम्)

असंप्रति -अव्य.Ind. (1) अवर्तमानं, न अद्य Not now (2) अयुक्तम् Not proper. (प्र.स. 2085)

असिचर्या -शस्त्राभ्यासः Practice of arms

असिधेनुः -धेनुका -छुरिका A knife

असिपुत्री-छुरिका A knife

असूर्यरजसः-सर्वथा पृथक् विविक्ते स्थाने वसन्तः Those who live in complete isolation.

असूर्यंपश्याः -सूर्यमपि न पश्यन्ति याः । सर्वदा गृहान्तरेव ये या वा वसन्ति Those who do not see even the Sun. Living always inside the house. (कौ.2951)

असेवा -अभ्यासाभावः Lack of practice.

असौनामन्-अदोनामधेयः Having such and such a name.

असेवितेश्वर or असेवितद्वार-वि.a येन धनिनां द्वारि दैन्येन न स्थितम् Not waiting at the doors of the rich or of the men in power.

अस्तंगत्य / **अस्तं गत्वा** } Having set down वैकल्पिकः समासः

अस्ति -अव्य. Ind. कथाकथनप्रारम्भे 'एवं किल आसीत्' इत्याद्यर्थे प्रयुज्यते Often used at the commencement of a tale or narrative in the sense of 'so it is' 'there' or merely as an explative. "अस्ति . . सिंहः प्रतिवसति स्म' (पं.तं)

अस्तिक्षीरा (गौः)-अस्ति प्रभूतं क्षीरं यस्याः सा Cow who has plenty of milk.

अस्तिज्ञानः -अस्तिज्ञानं यस्य सः One who

has knowledge 'अस्तिधनः' इत्यादयः (कौ.830)

अस्तुकारः-(1) 'तथैव अस्तु' इति वचनम् To say 'let it be so'. अङ्गीकारः (2) लाभकरः, औषधवत् उपकारकः Eficacious. Working (as a medicine). Producing that which a physician promises shall be. (कौ.1007)

अस्त्रयोग्या-अस्त्राभ्यासः Exercise or training in arms.

अस्थानम्-अयोग्यं स्थानम् Unusual or improper place.

अस्थाने -अव्य Ind. अयुक्तया रीत्या, अयुक्ते समये Inappropriate, not proper for the moment.

अस्मत्सैन्यं शत्रुविजयाय अलम् -अस्माकं सैन्यं शत्रून् जेतुं समर्थम् Our army is capable of conquering the enemy अलमर्थैः योगे चतुर्थी 'स्यात्' । 'अलम्' and its synonims govern चतुर्थी । हरिः दैत्येभ्यः प्रभुः, समर्थः, शक्तः इत्यादि ।

अस्मद्यति -अस्मान् आत्मनः इच्छति Wants us for himself.

अस्मद्यते -वयमिव आचरति He behaves like us.

अस्मयति -आवाम् आचष्टे He talks about both of us.

अस्मिमानः -वि.a अहंकारवान् Self concert.

अस्यपगारं युध्यन्ते } असीः उद्यम्य युध्यन्ते
अस्यपगोरं युध्यन्ते } They fight raising the swords. (कौ.3375)

अस्युद्यतः -उद्यतः असिः येन सः One who has raised his sword बहुव्रीहौ क्तप्रत्ययान्तं प्रहरणार्थेभ्यः परम् उत्तरपदतया प्रयुज्यते In a *Bahuvrīhi*, words denoting weapons are used as the first member of the compound while the words ending in 'क्त' (त) are used as second members गदोद्यतः इत्यादि (कौ. 900)

अस्रायते-आत्मनः दुःखम् अनुभवति Suffers his own misery.

अहं श्रेय-स्/सम्-अहमेव श्रेयान् इत्यभिमानः Claiming superiority for oneself.

अहंपूर्विका-अहं पूर्वम् अहं पूर्वम् इति स्पर्धा The sense of competetion to go or to do first. अहं पूर्वमिति मतिः उक्तिर्वा यस्यां सा अहंपूर्विका (प्र.स.2166)

अहंप्रथमिका -अहं प्रथमम् इति मतिः उक्तिर्वा यस्यां क्रियायाम् The sense of competetion to go or to do first (प्र.स.2166)

अहमग्रिका -अहम् अग्रे इति मतिः Contest for superiority.

अहमहमिका-अहम्, अहम् इति यस्यां क्रियायाम् । स्वप्राधान्यप्रकटनम् The feeling of 'I am' 'I am'. Competetion assertion of superiority.

अहंयुः- (1) अहंकारवान् Selfish, proud (2) योधः, Warrior

अहंस्तम्भः - अहंकारिन् Self-conceit

अहर्दिवम् -अव्य.Ind. अहनि च दिवा च अहर्दिवम् । प्रतिदिनम् Everyday (कौ.945)

अहिनकुलम् -अहयश्च नकुलाश्च तेषां समाहारः Snakes and mangoose. शाश्वतविरोधवतां जन्तूनां द्वन्द्वः एकवद्भवति । *Dvandva* consisting of words denoting the animals or the beings having natural animosity is used in singular numbers. 'अश्वमहिषम्' । 'काकोलूकम्' इत्यादि । प्र.स.2315 ('वधूश्वश्रु' चोररक्षकभटम्' इत्याद्यपि)

अहोलाभकरः-अल्पेन लाभेन अतीव संतुष्टः Making fuss about an insignificant gain.

अह्ना अनुवाकः अधीतः -एकस्मिन् अहनि अनुवाकः सफलतया अधीतः। अनुवाक (A portion of the vedic text) was studied successfully in one day फलप्राप्तौ द्योत्यायां कालाध्वनोः अत्यन्तसंयोगे द्वितीया स्यात् Words denoting time and distance (on the road) govern तृतीया (instead of द्वितीया) when it is implied the result of the work is achieved. 'द्व्यहेन कूपः निर्मितः' इत्यादयः।

आ

आकालिक -वि.a (1) आशुविनाशी That which perishes immediately after it is born (2) पूर्वदिने मध्याह्नादौ उत्पद्य दिनान्तरे तत्रैव समये नश्वरः That which perishes next day at the same time as it was born previous day. 'आकालिकी विद्युत्' Lightning which disappears immediately after it is born. इत्यादयः। (कौ.1777)

आकरग्रन्थः-शास्त्रादेः मूलग्रन्थः Source book.

आकरिकः -आकरे नियुक्तः Who is employed in a mine (कौ.1620) 'औद्यानिकः' इत्यादि।

आकार-गुप्तिः/गोपनम्/गूहनम् - मानसान्तर्गताः भावाः यथा न प्रकटीभवन्ति तथा शारीरलक्षणरक्षणम् Dissimulation supressing all outward manifestations of the internal feelings.

आकारं प्रच्छाद्य -मनोगतभावान् निगूह्य Having concealed internal feelings. (पं.तं. पृ.6)

आकारसंवरणम् -भावस्य निगूह्य रक्षणम् Concealing one's feelings.

आकाशबद्ध-दृष्टिः/लक्षः -लक्षशून्यदृष्टिः One who is gazing aimlessly.

आकाशमुष्टिहननम् -व्यर्थः प्रयासः A foolish act akin to hitting the sky with one's fists. A fruitless action.

आकाशरोमन्थनम् -भावोपनीतानां वस्तूनाम् अनुभवः, भोगः "Rumination of the sky". Enjoy in imaginary things, wool gathering. (पद्यप्राभृतकम्)

आकाशवादितम् -वाद्यादिवत् आकाशस्य वादनम् Playing on the sky as though playing on a musical instrument. हस्तेन स्रस्तकोणेन कृतमाकाशवादितम् ([स्व.वा.द.] भा.ना.च.पृ.39)

आक्रीडते -Plays 'आ' पूर्वः क्रीडधातुः आत्मनेपदी। √'क्रीड्' with 'आ' is used as *ātmanepadī*.

आक्रमते (सूर्यः)-सूर्यः उद्गच्छति The sun is rising up. ज्योतिषः उद्गमने क्रमधातुः आत्मनेपदी। √ 'क्रम्' takes A.P. in the sense of rising up of a luminary object. अन्यथा (otherwise) 'आक्रामति धूमः हर्म्यतलम्' (कौ.2713)

आक्लीकृत्य-हिंसित्वा Having hurt. विकृतं कृत्वा Having disfigured (ग.र.म. पृ.139)

आक्षपटलिकः -आयव्ययादिगणकः Keeper of records, officer of accounts.

आखनिकबकः -(1) 'आखुविषये बकः' दुर्बलेषु यः वीरवत् प्रवर्तते सः 'A stork in relation to a mouse' A man who behaves like a hero towards a weak person (2) 'आखनिके जलस्रोतसि बकः वञ्चकः stork at the flowing water'. One who is on watch to hurt somebody.

आगमयते -यद्यथा प्रवर्तते तत् तथा प्रवर्तितुम् अनुमनुते, तितिक्षते Allows things to happen with patience. तितिक्षार्थ 'आङ्' (आ) पूर्वकः णिजन्तः गमधातुः आत्मनेपदी ।√'गम्' with 'आ' in its causative form, in the sense of showing patience *ātmanepadī* 'आगमयस्व तावत्' - मा त्वरिष्ठाः इत्यर्थः (कौ.2686 वा)

आगवीनः -स्वामिने गोः प्रत्यर्पणपर्यन्तं यः कर्म करोति (तद्भृत्यः भवति) सः Who serves till he returns the cow to his master (कौ.1815)

आगत्यभूतः -आगतः इत्येवार्थः One who had come. ('वच्चि उन्नाडु' इति आन्ध्रभाषायाम् इव) (प्र.स.2166)

आगारवैणवम् -अगारवेणूनाम् इदम् Connected with the bamboos used for the house (उभयपदवृद्धिः) (Bamboo cladding)

आग्निपद -वि.a अग्निपदे दीयते कार्यं वा Which is given or done in a fire place.

आग्रभोजनिकः-अग्रभोजनं नियतं यस्मै दीयते He who is always entitled to occupy the foremost place (seat) at dinner. (कौ. 1617)

आचपराचम् -अव्य. Ind. 'आचितं च पराचितं च आचपराचम्' Loaded and unloaded. अवाक् परस्ताच्च आचपराचम् To the South West. (प्र.स.2166)

आचारपुष्पाञ्जलिः-आचारानुसारेण प्रक्षिप्तः पुष्पाञ्जलिः Floral offering made by way of religious practice. (at the entrance door of the house)

आचार्यकम् -आचार्यस्य कर्म, आचार्यत्वम् The office of a preceptor.

आचार्यभोगीनः -आचार्यभोगाय हितः Useful for the preceptor. Delighting the preceptor (कौ.1670)

आचार्या } स्वयम् आचार्या स्त्री A lady preceptor.
आचार्यानी } आचार्यस्य भार्या Wife of the preceptor.

आचितिकी }
आचितीना } See आढकीना ।

आचोपचम् -अव्य.Ind. आचितं च उपचितं च आचोपचम् Loaded and heaped up (2)आगच्छ च उपगच्छ च इति यस्मिन् कर्मणि तत् आचोपचम् इत्यन्ये The act of saying come and come near. (ग.र.म.पृ.161) (3) आचितम् उपचितम् (आर्जितं परिवृद्धं) च धनम् (प्र.स.2166) (Money) Earned and increased.

आजपथिकम् -अजपथेन आहृतम्, अजपथं गच्छति वा आजपथिकम् Which was brought by the route of the goats or which goes by the route of the goats.

आजानेय-वि. a उत्तमजातीयः (अश्वादिः) Of high breed.

आढकिकी }
आढकीन } वि. a आढकं (प्रमाणविशेषः धान्यादीनाम्) सम्भवति अवहरति पचति वा One which can contain one *āḍhaka* or who brings or cooks one *Āḍhaka.* एवं 'किलोग्रामिक' अथवा 'किलोग्रामीण' इत्यादयः ।

आढ्यंकरणम् -अनाढ्यम् आढ्यं कुर्वन्ति येन तत् That by which a man who is not rich is made rich.

आढ्यचरः -भूतपूर्वः आढ्यः आढ्यचरः One who was formerly rich. भूतपूर्व इत्यर्थे 'चरट्' (चर) इति प्रत्ययः In the sense of "it

or he was so earlier" 'चर' is added. एवं 'राजचरः', 'विद्यार्थिचरः', 'मन्त्रिचरः' इत्यादि।

आढ्यंभविष्णुः-अनाढ्यः आढ्यः भवति आढ्यं भविष्णुः One who is not rich becomes rich (कौ. 2974)

आढ्यंभावुकः -अनाढ्यः आढ्यः भवन् One who is not rich becoming rich (कौ.2974)

आतिथेय -वि.a अतिथिषु साधुः, अतिथिसत्कारकरः Attentive to the guests. (कौ.1656)

आतिवाहिक -वि.a यः मार्गे सहायो भूत्वा देशाद्देशं जनान् नयति Escort in the journey.

आतिष्ठते -प्रतिजानाति Asserts आङ्पूर्वकः स्थाधातुः आत्मनेपदी, √'स्था' with 'आ' is used as आत्मनेपदिन् in the sense of to declare firmly. शब्दं नित्यम् आतिष्ठते He maintains that the word is eternal. 'भगवद्भक्तिं शान्तिप्रदाम् आतिष्ठते' इत्यादि (कौ. 2689 वा)

आत्तगन्ध-वि.a पराभूतः Having ones pride humbled 'attacked' insulted.

आत्मनः प्रभवति -यथेच्छं कर्तुं शक्नोति Is having control over himself or herself 'एतदलीकम् - अहमात्मनः प्रभवामि।' (भा.ना.च. 135)

आत्मना च मदुपभुक्तशेषम् अकरोत् अशनम्-(कादम्बरी पृ. 55) Himself ate whatever remained after I had eaten. 'आत्मना' इति स्वयमित्यर्थे तृतीयायां प्रयोगः। आत्मना is used in the sense of स्वयम् in तृतीया A peenliar usage. 'तं गृहं प्रेषयामास, आत्मना च यानमधिरुह्य ग्रामान्तरमगमत्' इत्यादि।

'आत्मना तृतीयः' 'आत्मना चतुर्थः'- 'द्वाभ्यां सहितः स्वयं च तृतीयः', त्रिभिः सहितः स्वयं च चतुर्थः इत्यर्थः Third or fourth, including himself, (i.e. when accompanied by two or three others) 'ततः प्रविशति आत्मना तृतीयो वैखानसः' (अ.शा.I)

आत्मनीन -आत्मने हितम् Beneficial to oneself (selfish) (कौ. 1670)

आत्मप्रत्यायिका-स्वानुभवेन ज्ञानम् Knowing from one's own personal experience. 'आत्मप्रत्यायिकया ब्रवीमि, आयुर्वेदे उत्तमं वैद्यविधानम् अस्ति'।

आजानिकम् -सहजम् Inborn. Natural

आत्मंभरिः -आत्मानमेव यः बिभर्ति, स्वार्थपरः One who is interested in his benefit only.

आत्मापहारः -आत्मनः नामजातिदेशादिविषये असत्यकथनम् Concealing one's own identity 'कथमहमात्मापहारं करोमि?' (अ.शा.I)

आत्यन्तीनः -अत्यन्तं गामी One who goes on continuously.

आदत्ते-स्वमुखाद्यवयवविकासनात् अन्यस्मिन् अर्थे आङ् पूर्वकात् ददातेः आत्मनेपदम्। √'दा' With 'आ' takes A.P. in the sense other than opening the mouth or something which is one's own limb or part of the body विद्याम् आदत्ते। प्रत्युदाहरणम् counter example. मुखं व्याददाति (कौ. 2686)

आद्यकालिकः -वर्तमानकालमात्रदर्शी One who thinks of only the present.

आधिदैविकम् - देवम् अधिकृत्य भवम्

Connected with divine power or Gods (उभयपदवृद्धिः)

आधिभौतिकम् -अधिभूतं भवम् Connected with the elements. (उभयपदवृद्धिः)

आनन्दथुः -आनन्दः Pleasure

आनुते -आपूर्वः 'नु' धातुः आत्मनेपदी। √नु' with 'आ' takes A.P. आनुते शृगालः। उत्कण्ठापूर्वकं शब्दं करोति Howls with eagerness. (कौ. 2687 बालमनोरमा।)

आनुसांवत्सरिकम् -अनुसंवत्सरं दीयते That which is given every year. (उभयपदवृद्धिः)

आनुसांवरणम् -अनुसंवरणेन दीयते Which is given in secret. (उभयपदवृद्धिः)

आपन्नसत्त्वा-गर्भिणी Pregnant women

आन्नः -अन्नं लब्धा One who is going to get food.

आपमित्यकम्- वस्तुविनिमयेन लब्धम् Received by barter or exchange.

आपातमधुरम् -बहिः मधुरवत् दृश्यमानम् Apparently sweet or good.

आपातकाटवम् -Apparently hard 'अनिरतपरोपकारव्यग्रीभवदमलचेतसां महताम्। आपातकाटवानि स्फुरन्ति वचनानि भेषजानीव' (पण्डितराजस्य)

आपूपिकः -अपूपे साधुः Which is useful for making a sweet cake (कौ. 1654)

आपृच्छते -गमनसमये पित्रादीनाम् अनुज्ञां प्रार्थयते Bids fare well. Takes leave of आङ्पूर्वः प्रच्छ्धातुः आत्मनेपदी। √प्रच्छ with 'आ' takes A.P. 'नेपथ्ये-चक्रवाकवधूः आमन्त्रयस्व सहचरम्' (अ.शा. III)

आप्रपदीनः पटः -प्रपदपर्यन्तव्यापी पटः Cloth reaching up to the end of the feet.

आबालगोपालम् -अव्य.Ind. बालान् गोपालांश्च अभिव्याप्य Including the children and cow herds.

आबालवृद्धम् -अव्य.Ind. बालान् वृद्धांश्च अभिव्याप्य Starting with children upto the old.

आभिगामिकः -अभिगमम् अर्हति One who deserves to be received by going near him. (उभयपदवृद्धिः)

आभ्युन्नतिकः -यः अभ्युन्नतिं पृच्छति One who enquires property.

आमुक्तेः संसारः -संसारः मुक्तिपर्यन्तमेव भवति। मर्यादार्थकेन 'आ' इत्यनेन योगे पञ्चमी। 'आ' in the sense of 'upto' (excluding the last mentioned one) governs पञ्चमी। 'आशयनात् पठति' इत्यादयः।

आमुष्यकुलिका -अमुष्य यत् कुलं तस्य भावः Being the family of so and so. (कौ. 999)

आमुष्यकुलीनः -अमुष्यकुले साधुः One who is good (helpful) to that family (कौ. 1651)

आमुष्यपुत्रिका -अमुष्य यः पुत्रः तस्य भावः Being the son of so and so. (कौ.979)

आमुष्यायणः -अमुष्य अपत्यम् Son of so and so. (कौ.979)

आम्नाती छन्दसि-छन्दः आम्नातवान् One who has studied (recited) *chandas* (सप्तमी)

आयच्छते -(A) बध्नाति Wears ties 'सम्' पूर्वकः 'यम्' धातुः कर्तृगामिनि फले, आत्मनेपदी। √यम् with 'आ' takes A.P. when the fruit goes to the doer of the work (कौ. 2742)

(B) अकर्मकतया प्रयुक्तः, स्वाङ्गकर्मको वा

आङ्पूर्वकः यमधातुः आत्मनेपदी । √'यम्' with 'आ' is in A.P. when it is used as an intransitive or having one's own limb as the कर्मन् । आयच्छते रज्जुः The rope becomes long. आयच्छते पादम् - पादं प्रसारयति Stretches his leg.

आयतिक्षम -वि.a भविष्यति शुभप्रदः Beneficial in future. (पं.तं. पृ.152)

आयतीगवम् -अव्य.Ind. यस्मिन् काले गावः गृहं प्रत्यायान्ति स कालः । सायंकालः The time when the cows return to cow-pens (प्र.स.2084) 'आयतीगवं मम गृहम् आगच्छ' । 'तदा न; तिष्ठतु आगमिष्यामि' ।

आयतीसमम् -अव्य.Ind. आयान् वत्सरः Coming year 'आयतीसमं विदेशं गमिष्यति' इत्यादयः । (प्र.स.2084)

आयमुखानि -आयद्वाराणि Sources of income.

आयःशूलिकः-तीक्ष्णोपायेन यः अन्विच्छति । साहसिकः One who employs cruel methods to achieve something 'आयःशूलिकता दस्यौ न भटानां विनिन्द्यते'

आयातकार्य-वि.a यस्य साहाय्यमपेक्ष्यते जनैः *One with whom people have some work or other* (क्षेमे)

आयुक्ती युद्धे -युद्धम् आयुक्तवान् One who was engaged in fight (सप्तमी)

आरमते -Sports आङ्पूर्वको रमधातुः आत्मनेपदी । 'रम्' with 'आ' takes A.P. (कौ. 2749)

आरम्भरुचिः -कार्यस्य प्रारम्भे वर्तमाना रुचिः Interest at the time of starting an undertaking.

आरम्भशूरः -कार्यप्रारम्भमात्रे अत्यासक्तिप्रदर्शकः One who shows too much of initial enthusiasm 'आरम्भशूराः खलु दाक्षिणात्याः' ।

आरात् वनात् -वनात् दूरे अन्तिके वा Near or away the forest. आराद्योगे पञ्चमी । आरात् (Ind.) governs पञ्चमी ।

आरूढः प्रदोषः-सायं समयः प्रवृत्तः The evening has set in. (भा.ना.च. 132)

आर्त्विजः -ऋत्विजः अर्हति (यजमानः) One who deserves to get priests.

आर्द्रंकृत्य-आर्द्रंकृत्वा } Having soaked.
आर्द्रीकृत्य-आर्द्रीकृत्वा } समासः वैकल्पिकः (Compound optional)

आर्धिक } (1) अर्धेन संबद्धः Connected
अर्धिक } with or relating to half (2)अर्धम् अर्हति Entitled to half-share (3) अर्धभागार्थं यः क्षेत्रं कर्षति One who polughs the field for half-share in the crop.

आर्यगृह्यः -आर्यैः यः गृह्यते, अभिनन्द्यते सः । आर्यपक्षपाती One who is respectable to or well received by respectable people. (कौ. 2870)

आर्यपुत्रः -आर्यस्य पुत्रः *Son of a respectable person* भार्यया पत्युः सगौरवं संबोधनादिषु प्रयुज्यते रूपकेषु *A respectful way of addressing or referring to the husband.* (Often used in Sanskrit dramas by noble ladies)

आर्यमित्राः -पूज्याः आर्याः Respectable gentlemen. एवम् आचार्यमित्राः इत्यादि । See 'अश्वमतल्लिका'

आर्यरूपः-आर्यवत् बहिः दृश्यमानः Having only the appearance of an *Ārya*. A hypocrite.

आर्यलिङ्गिन् -आर्यवेषधारी । वञ्चकः An impostor.

आर्षभ्यः (वत्सः)-ऋषभत्वेन उपयोक्तुम् अर्हः वत्सः । यः वत्सः वृषभावस्थाप्राप्त्यर्थं पोष्यते सः (बालमनोरमा) A steer sufficiently full-grown to be used or let loose. One fit to be castrated (Apte). A calf which is being brought up to grow into a bull. (कौ. 1676)

आर्हन्त्यम् -अर्हतः भावः कर्म वा The nature or action of a respectable person (2) पूज्यत्वम् अथवा योग्यता Fitness.

आलम्बकृत्य-प्रकाशं नीत्वा । हिंसित्वा Having made public. Having hurt. (ग.र.म. पृ.139)

आलोकशब्दः -(राजाद्यागमनसमये) 'जय, विजय' इत्यादिशब्दः । 'आलोकयन्तु, आलोकयन्तु' इति शब्दः Hailing victory. "See see' keep of keep off" the admonition at the time of the arrival of dignitaries. (कादम्बरी 30)

आलोष्ठीकृत्य-हिंसित्वा Having hurt or killed (ग.र.म.पृ.139)

आवसथिकः -आवसथे भवः । मठादिनिवासी One who lives in the house. Belonging to a school or college. (One who stays in a hostel) (कौ. 1625)

आविष्कृत्य / **आविष्कृत्वा** } बहिःस्थं कृत्वा Having opened or unveiled (वैकल्पिकसमासः) (ग.र.म.पृ.140)

आशितंगवीन -वि.a आशिताः आशनेन तृप्ताः गावः यत्र The land formerly grazed by cattle. (कौ. 2079)

आशितं भवः -(1) आशितः भवति अनेन इति आशितंभवः ओदनः The cooked rice by which one can be satisfied. (which is enough to feed) (2) आशितस्य भवनं (भावः) The state of being satisfied. (कौ.2962)

आशुमृतकः -शीघ्रं मृतः । तत्कालमृतः One who died suddenly (अ.शा.)

आशुतोषः -शीघ्रं यः तुष्यति । परमशिवः Lord *Śiva* who is quickly pleased.

आशुमृतकपरीक्षा -हठान्मृतस्य परीक्षा Post mortem examination (अ.शा.)

आश्चर्यम् (A) अद्भुतम् Wonder, wonderful

आचर्यम् (B) कर्तव्यम् That which is to be done (कौ. 1062)

आश्वम् / **आश्वयम्** } अश्वानां समूहः A group of horses (कौ.1257)

आश्वीनः -अश्वेन एकाहेन गन्तुं शक्यः देशः That which can be reached by horse in one day.

आसकलात् ब्रह्म -सकलमभिव्याप्य ब्रह्म अस्ति *Brahma* is in everything 'अभिव्याप्य' इत्यर्थे आङः प्रयोगे पञ्चमी स्यात् । 'आ' in the sense of 'including' governs पञ्चमी । 'आ बालेभ्यः हरिभक्तिः' इत्यादयः ।

आसनात् प्रेक्षते-आसने उपविश्य प्रेक्षते Sitting in the chair he sees. उपविश्य इत्यादीनाम् ('ल्यप्' प्रत्ययान्तानां) अप्रयोगे, तेषां गम्यमानत्वे अधिकरणस्य पञ्चमी स्यात् The अधिकरण of the implied ल्यबन्त (like 'उपविश्य', 'अधिरुह्य' etc.) is used in *Pañcamī*. 'मञ्चात् भाषते' (मञ्चम् अधिरुह्य भाषते) इत्यादयः ।

आसितं मुकुन्दस्य-इदं तत् स्थानं यत्र मुकुन्दः आस्त । आस्यते अस्मिन् इति आसितम् । आसन स्थानमित्यर्थः The place on which

Mukunda sat. It can be used in impersonal sense (भावार्थ) also. 'मुकुन्देन आसितम्' (भावार्थे) *Mukunda* sat. अध्रौव्यार्थानां धातूनाम् एवमेव प्रयोगः This applies to the roots conveying the sense of lack of movement. (कौ. 3087)

आसेविती सिद्धपतौ -सिद्धपतिम् आसेवितवान् One who had worshipped *Siddhapati*. 'आसेविती शम्भौ' इत्यादयः । (सप्तमी) ।

आस्थाकृत्य / **आस्थां कृत्वा** } आदरं कृत्वा, प्रतिज्ञां कृत्वा Having respected. Having promised. (ग.र.म.पृ.141)

आस्थानदिविरः-आस्थाने लेखकः An assembly clerk (क्षेमे)

आस्थानभट्टः-न्यायालये अधिकृतः, वैद्यः Medical Officer (क्षेमे)

आस्थाननलिनी धूर्तबकः-आस्थानमेव नलिनी । तत्र वञ्चकः बकः A cunning stork in the Lotus tank of royal assembly or Royal Court (कादम्बरी पृ.233)

आस्पदम् - यत्र सुखं स्थीयते तत् स्थानम् A safe place to live.

आपदम्-आ पदात् आपदम् Upto the foot (कौ.1061)

आस्यहैतिकः-अस्य हेतिः प्रहरणम् अस्य One who uses opponent's weapon as his weapon (उभय पदवृद्धिः)

अत्रास्यहैतिकश्चौरः भटमेव जघान तम् ।

आस्रायेत -आत्मनः दुःखम् अनुभवति Suffers his own misery.

आहतलक्षणः-गुणैः प्रसिद्धः Well known for good qualities.

आहते-ताडयति Dashes, beats 'आङ्' पूर्वकः हन धातुः आत्मनेपदी यदा अयम् अकर्मकः अथवा स्वाङ्गकर्मकः । 'हन्' with 'आ' takes A.P. when it is used as intransitive or as having one's own limb as कर्मन् ।

आहते-हठात् अभिमुखं धावति Dashes.

आहते उदरम्-उदरं ताडयति Beats his stomach.

आहत्यवचनम्-दृढतापूर्वकं वचनम् Challenging explanation. 'आहत्यवचनेनाद्य देयं सत्यापयत्ययम्' Forceful presentation/address.

आहरचेला-आहर चेलम् इति यत्र क्रियायाम् The act of saying bring the clothes. (प्र.स.2166)

आहरवनिता-आहर वनिताम् इति यत्र क्रियायां सा The act of saying 'bring women' 'आहरवनिता नक्तं प्रचलत्यधिकारिभवन एतस्मिन् । आहरमदिरा नक्तंदिवमिहचाश्नीतपिबतापि ॥'

आहरवसना-आहर वसनमिति यत्र क्रिया सा The act of saying 'bring the clothes' (प्र.स. 2166)

आहरवितता-'आहर विततं विस्तीर्णमिति यस्यां सा आहरवितता, विततं जालम् इत्यन्ये' (ग.र.म.पृ.159) The act of saying bring in plenty or bring the spreaded one, or bring the net.

आह्वः / **आह्वायः** } (1) युद्धम् Fight (कौ.3250) (2) आह्वानम् Calling (कौ.3250)

आहार्यबुद्धिः-स्तब्धः बुद्धिमान् A stubborn intelligent man.

आहिताग्निः / **अग्न्याहितः** } आहितः अग्निः येन सः One who installed sacred

fire. पदयोः क्रमे विकल्पः Order of words is optionally changed (प्र.स.2254)

आहोपुरुषिका-'अहमेव परमः' इति दर्पः The sense of 'what a great man I am!'

आह्नम् -(1) प्रतिदिनम् Daily. (2) दिने निर्वर्तितम् Performed in a day. (3) अह्नां समूहः A series of days.

आह्निक-वि.a अह्नि भवः, अह्ना निर्वृत्तः साध्यः वा Daily performed. Done every day or in a day. (नपुं) प्रतिदिनं क्रियमाणं कर्म A daily routine. 'अथवा आह्निकम् आस्तिक्यम्' (भा.ना.च.275)

आह्वयते-युद्धाय आह्वानं करोति Challenges for fight. स्पर्धायां द्योत्यायाम् आङः परः 'ह्वेञ्' धातुः आत्मनेपदी। ह्वेञ् with 'आ' takes A.P. when challenge is indicated (कौ.2704)

इ

इक्षुशाकटम्, **इक्षुशाकिनम्** } इक्षूणां भवनं क्षेत्रम् Sugar cane field. 'शाकट' 'शाकिन्' प्रत्ययौ। (suffixes) 'तिल शाकटम्' 'तिलशाकिनम्' इत्यादि।

इतस्तावत् -अत्रागम्यताम् Please come here 'आर्ये इतस्तावत्' (भा.ना.च.109)

'इति प्रथमोऽङ्कः'-इत्यादि, प्रथमाङ्कः समाप्तः इत्यर्थे 'इतिः', The first Act ends 'इति' indicates ending. इति 'द्वितीयोऽध्यायः

इदंप्रथ-मं-मतया-क्रि.वि. adv. इदमेव प्रथमं यस्य अथवा यस्मिन् कर्मणि Doing or occurring for the first time. 'मया इदंप्रथमं/इदंप्रथमतया अद्य इदं फलं भुक्तम्' इत्यादि।

इत्थंकारम् -इत्थम् Like this अर्थे भेदः नास्ति No change in the meaning. 'सः इत्थंकारं भाषते' इत्यादि। (कौ.3348)

इदं क्षेत्रं ज्येष्ठं प्रति, **इदं क्षेत्रं ज्येष्ठं परि**, **इदं क्षेत्रं ज्येष्ठम् अनु** } भागः इत्यर्थे प्रति, परि, अनुभिः योगे द्वितीया स्यात् This field is the share of the eldest son. In the sense of 'share' प्रति, परि and अनु govern द्वितीया

इनसभम्-इनस्य (राज्ञः) सभा इनसभम् The assembly hall of the king. राजशब्दभिन्नराजवाचकशब्दपूर्वः सभाशब्दः (सभाभवनवाचकः) तत्पुरुषान्ते नपुंसकः भवति। 'सभा' (Assembly hall) at the end of तत्पुरुषसमास takes neuter gender when it is preceded by the word denoting a king, but not the राजन् शब्द। एवं 'ईश्वरसभम्' (Assembly hall of the king) etc. (कौ.826)

इन्द्रकोशः-षः-षकः-(1) मृदु आसनम् A couch sofa, (2) अलिन्दः A plat form, (3) गृहं परितः अलिन्दः Pavement around the house.

इन्द्राय स्वाहा -'This is an offer to Indra' 'स्वाहा' शब्दः देवताभ्यः हविरादिदाने प्रयुज्यते। 'स्वाहा' शब्देन योगे चतुर्थी भवति। स्वाहा is used when something is offered in the fire to Gods 'स्वाहा' (indeclinable) governs चतुर्थी।

इन्द्रोक्तः -इन्द्रः इति उक्तः Said to be *Indra* एवं चन्द्रोक्तः इत्यादि (प्र.स.2153)

इयमस्मि-'अहमत्रास्मि, आगच्छामि' इति स्त्रियाः प्रतिवचनम् 'I am here'. See 'अयमस्मि'।

इरंमदः -वारिणा द्योतते या सा विद्युत् Lightning which burns with water. (कौ.2952)

इर्गल्यम्-अर्गलाय हितम् Useful for the bolt. (iron, wood etc.)

इ व-(1) उपमावाचकः Like. It indicates comparison. 'मुखं चन्द्रः इव' इत्यादि। (2) उत्प्रेक्षावाचकः 'As if' 'as though'. 'As it were' 'तमः अङ्गानि लिम्पतीव' The darkness is, as though smearing (sticking) (3) प्रायः। किञ्चित् A little somewhat perhaps अयं कटुरिव (4) किं शब्देन घटितः इव शब्दः संभावनाम्, 'अहं ज्ञातुमिच्छामि', 'त्वमेव वद' 'नूनम्' इत्याद्यर्थान् बोधयति Added to the interrogative words 'इव' indicates meanings like - Possibly I should like to know' 'Indeed', 'विना सीता देव्या किमिव हि न दुःखं रघुपतेः' (उत्तर. VI.30) "I would like to know what is not miserable to Rama in the absense of Sita?" **क इव**-कियान् कीदृशः। 'क इव कालः?' (माल-2) दीर्घः कालः अतीतः किल What a long time elapsed (5) क्रियाविशेषणैः सह प्रयुक्तः इव शब्दः 'एव', 'मात्रम्' इत्याद्यर्थान् सूचयति। 'इव' is frequently used with adverbs, especially such as involve restriction, by way of emphasis in the sense of 'even or just so', 'just', 'exactly' 'quite' 'indeed' 'very'. 'मुहूर्तमिव' (but for a moment), 'किंचिदिव' (just like a bit) ईषदिव, नाति चिरादिव।

इषीकतूलम्-इषीकायाः तूलम् Cotton of the *Iṣīka* plant समासे तूले परे इषीकाशब्दः ह्रस्वान्तः भवति। 'आ' of इषीका is shortened when followed by तूल (कौ.1006)

इष्टकचितम् -इष्टकाभिः चितम् Constructed or paved with bricks समासे चितशब्दे परे इष्टकाशब्दस्य ह्रस्वः भवति। 'आ' of इष्टका is shortened when followed by 'चित' in *Samāsa* (कौ.1006)

इष्टापूर्तम् -(नपुं) इष्टं च पूर्तं च तयोः समाहारः Performing sacrifices and doings acts like digging walls and other acts of charity. 'इष्ट' शब्दस्य दीर्घः। 'अ' in इष्ट is lengthened 'अग्निहोत्रं तपः सत्यं वेदानां चैव पालनम्। आतिथ्यं वैश्वदेवश्च इष्टमित्यभिधीयते।'

वापीकूपतडागादिदेवतायतनानि च।
अन्नप्रदानमारामः पूर्तमित्यभिधीयते॥

इष्टी यज्ञे-यज्ञेन इष्टवान् One who performed *yajñas*. (सप्तमी)

इहद्वितीया-इह द्वितीय आस्ताम् इति यस्यां क्रियायां सा The act where it is said 'the second one should be here' (प्र.स.2166)

इहपञ्चमी-इह पञ्चम आस्ताम् इति यस्यां क्रियायां सा The act where it is said "the fifth one should be here". (प्र.स.2166)

ई

ईतिबाधाः -'अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः। अत्यासन्नाश्च राजानः षडेते ईतयः स्मृताः' Heavy rains, drought, mice, maths, parrots, proximity of big officers, these six are called *Īti bādhas*.

ईषत्कर / **ईषत्कार्य** } वि.a अनायासेन कर्तव्यम् To be accomplished without much difficulty.

ईषदाढ्यंभवम् -अनायासेनैव अनाढ्येन आढ्येन भूयते It is possible to become rich for him who was not rich. ईषदाढ्यं भवं क्षिप्रं मन्त्रिभी राजपूरुषैः।

ईषल्लभ -वि.a अनायासेन लभ्यम् Easily available. Available for a little.

ईषदाढ्यंकरः -अनायासेनैव अनाढ्यः आढ्यः क्रियते Who can be made rich without

difficulty though he was not rich. 'ईषदाढ्यंकरो मन्त्रिजामातायं न चिन्त्यताम्'।

उ

उच्चनीचम्-उच्चैश्च नीचैश्च स्थितम् High and low-various multiform.

उच्चरते-उल्लङ्घ्य गच्छति Goes jumping over उत्पूर्वः चरधातुः सकर्मकतया प्रयुक्तः आत्मनेपदी। √'चर्' with 'उद्' when it is used as transitive takes A.P. धर्मम् उच्चरते (कौ. 2726)

उच्चावचम्-उदक् च अवाक् च। अनेकभेदम्। High and low. Uneven. Irregular of various kinds.

उच्चैः कृत्य अप्रियमाचष्टे / **उच्चैः कृत्वा अप्रियमाचष्टे** / **उच्चैकारम् अप्रियमाचष्टे** } अप्रियं विषयं उन्नतेन स्वरेण कथयति He tells something not liked, loudly. (कौ.3381)

उच्चैस्तमाम् आशंसति-अतिशयेन आशंसति Wishes or aspires very much (कौ. 2004)

उच्छिष्टफलकम्-उच्छिष्टानां द्रव्याणां निक्षेपार्थं दारुपत्रम् A wooden tray for throwing reminents of food (क्षेमे)

उत्करः / **उत्कारः** } राशिः A heap; Collection. धान्यस्य विक्षेपः Throwing (or sowing) the grain. (कौ.3201)

उत्कुरुते-परदोषान् आविष्कुरुते Exposes the defects of others हिंसार्थे कृञ् धातुः आत्मनेपद्येव In the sense of harming others, कृ is used only as A.P. (कौ.2705)

उत्तपते / **वितपते** } दीप्यति Shines 'उत्' 'वि' पूर्वः तपधातुः अकर्मकतया प्रयुक्तः आत्मनेपदी। स्वाङ्गकर्मकत्वेऽपि आत्मनेपदी। √'तप्' with उत् or 'वि' when it is used as intransitive or having one's own limb as कर्मन् should be used in A.P. उत्तपते वितपते वा पाणिम्। (कौ. 2694)

उत्तमर्णः -ऋणे उत्तमः उत्तमर्णः Superior in the loan transaction. Creditor. पदव्युत्क्रमः Change in the order of words (प्र.स.2199)

उत्तरतारम् / **उत्तरतीरम्** } उत्तरस्यां दिशि तीरम् Northern bank दिग्वाचके उपपदे तीरस्य वा तारादेशः। 'तीर' changes into 'तार' optionally when preceded by word denoting direction (कौ.1034)

उत्तरपूर्वा-उत्तरस्याश्च पूर्वस्याश्च दिशोः यत् अन्तरालं सा दिक् उत्तरपूर्वा Northeast एवं दक्षिणपश्चिमा Southwest उत्तरपश्चिमा Northwest दक्षिणपूर्वा Southeast इत्यादयः।

उत्तराहि ग्रामस्य वसति-ग्रामस्य किंचिद्दूरे उत्तरस्यां दिशि वसति Lives in the north to the village at a small distance. 'उत्तराहि' इत्यव्ययेन योगे षष्ठी। उत्तराहि (Ind.) Governs षष्ठी।

उत्तिष्ठते-प्रयतते Strives for salvation उत्पूर्वः स्थाधातुः उत्थानादन्यत्रार्थे आत्मनेपदी। √'स्था' with उत् is in A.P. in the sense other than getting up.

उत्थापनीयम् -उत्थापना प्रयोजनमस्य That the purpose of which is to raise or to drive away. 'उत्थापनीयोऽतिथीनां धूमो गेहे महानयम्।'

उत्पचनिपचा-ऊर्ध्वम् अधश्च पच इति यस्यां क्रियायाम् The act where it is said 'cook the upper part and lower part' (प्र.स.2166)

उत्पतनिपता-ऊर्ध्वं पत अधश्च पत इति यस्यां

क्रियायाम् The act where it is said jump up and fall down. (प्र.स.2166)

उत्पत्योत्पत्य विश्वामित्रमपूजयन्-(रामा. 1.2.6) They worshipped *Viśvāmitra* quickly/eagerly/with respect. 'उत्पत्योत्पत्य' इति आदरं संभ्रमातिशयं सूचयति The use of उत्पत्योत्पत्य indicates quickness, eagerness and respect etc., in doing an action उत्पत्योत्पत्य सर्वेऽपि चित्रं द्रष्टुं समागताः इत्याद्याः।

उत्पुच्छयते-'पुच्छम् उदस्यति' उत्साहं दर्शयति Raises and weaves the tail. Shows enthusiasm. 'दृष्ट्वैव दूरतो मित्रमत्रोत्पुच्छयते वृङः'

उत्सुकायते-अनुत्सुकः उत्सुकः भवति One who was not eager becomes eager.

उदपानमण्डूकः-उदकस्थानस्थितमण्डूकवत् लोकज्ञानशून्यः "A frog in reservoir". A person who does not have worldly experience.

उदकस्नानानि-महान्ति स्नानागाराणि Big baths (स्व.वा.)

उदकक्रिया-पितृभ्यः जलतर्पणम् Offering water to the manes.

उदकेविशीर्ण-वि.a 'जले प्रक्षिप्तं नष्टं च' निष्फलं कर्म "Thrown in water". Waste (अलुक् समासः) (प्र.स.2138)

उदक्ग्रामात्-To the north of the village प्राक् ग्रामात् To the east of the village.

उदग्भूमः-उदक्प्रवणा भूमिः यस्य सः उदग्भूमः The place where the ground is inclined towards North. See 'कृष्णभूमः'

उदजः (A) पशूनां चोदनम् Driving the animals.

उदाजः (B) मनुष्याणां प्रेरणम् Sending the human beings (कौ.3246)

उदन्यति - (A) उदकं पातुमिच्छति Wants to quench thirst with water.

उदकीयति -(B) पिपासाशमनभिन्न-प्रयोजनार्थम् उदकं वाञ्छति Wants water for some purpose other than drinking.

उदपेषं पिनष्टि-उदकेन पिनष्टि Crushes or pounds with water स्नेहने (आर्द्रताजनके) करणे उपपदे पिषधातोः णमुल् भवति The root पिष् with an object which is instrumental in making something wet as *Upapada* takes णमुल् (अम्) (कौ.3359)

उदरंभरिः-स्वोदरमात्रपूरणासक्तः । स्वार्थपरः Who fills his belly only. Selfish 'अम्' विशेषः।

उख्यम्-पात्रे पाकादिना संस्कृतं मीनादिकम् (fish etc.) Dressed or boiled in a pot.

उग्रंपश्यः-उग्रं यथा तथा यः पश्यति One who sees with cruel eyes. (कौ.2932) 'अम्' विशेषः।

उदकंकृत्य / **उदकं कृत्वा** — Providing water; वैकल्पिकः समासः; Compounded optionally 'अम्' विशेषः।

उदक्यः-(कालः) उदकम् अर्हति यः कालः The time when water is to be used. Time to take bath. (प्र.स.1652)

उदरपूरं भुङ्क्ते-उदरं यथा पूर्णं भवति तथा भुङ्क्ते Eats till the belly is filled (कौ.3352) 'णमुल्' (अम्)

उदाकुरुते-भर्त्सयति Threatens भर्त्सनार्थे कृञः आत्मनेपदं भवति In the sense of threatening the root कृ takes A.P.

उदारदर्शन-वि.a अतीव मनोहराकृतिः Person of magnificent appearance तथाहि ते

रूपमुदारदर्शने ! तपस्विनामप्युपदेशतां गतम् ॥ (कुमा. V.36)

उदीचयति -उदञ्चं करोति Turns towards North.

उदुम्बरकृमिः-See उदुम्बरमशकः

उदुम्बरमशकः-उदुम्बरफलान्तर्गतमशकसदृशः लोकज्ञानविहीनः "A mosquito-like insect with in the *Udumbara* fruit" A person who has not seen the world.

उद्गन्धि-उद्गतः गन्धः यस्मात् तत् That from which fragrance is spreading. उत्, पूति, सु. सुरभिशब्देषु पूर्वपदेषु बहुव्रीहेः अन्ते गन्धशब्दः इकारान्तः भवति। 'गन्ध' preceded by उत्, पूति, सु, or सुरभि takes 'इ' in the place of last 'अ' in a बहुव्रीहि

उद्गृहीती उद्योगे-उद्योगम् उद्गृहीतवान् One who started an effort (सप्तमी) उद्गृहीती इन्द्रियसंयमे इत्यादयः।

उद्ग्रीविका-अतीव उत्कण्ठा Standing tip toe.

उद्दालकपुष्पभञ्जिका-उद्दालकपुष्पाणि भज्यन्ते यस्यां क्रीडायाम् A sport in the Easter districts in which *Uddālaka* flowers are broken or crushed. (कौ.3286) 'कन्दुकताडिका' इत्यादयः कल्पयितुं शक्यन्ते।

उद्धमचूडा-उद्धम उत्क्षिप चूडाम् इति यस्यां सा अभिभवनं निर्भयता वा वर्तते इत्यर्थः The act in which the hair (head) is waved upwards (without caring any one or in fearlessness). It is like raising collar.

उद्धमचूडा-उद्धम (दह) चूडाम् (शिरः अथवा अग्रम्) इति यस्यां क्रियायाम् सा The act in which it is said burn the top or the head. (प्र.स.2166)

उद्धरोत्सृजा-कोष्ठात् उद्धर (धान्यादिकं) उत्सृज (अर्थिभ्यः देहि) इति यस्यां क्रियायाम् सा The act where it is said take out (money or grain etc.) and distribute (ग.र.म.163)

उद्धमविधमा-उद्धम विधम इति यस्यां क्रियायां सा उद्धमविधमा The action where it is said blow out and blow in all directions. (कौ. 774)

उद्धयः } **उज्झिता** } उज्झति उदकम् इति उद्धयः- नदः The (नद) river which releases water नदात् अन्यः उज्झिता If it is other than 'नद' river it is उज्झिता (कौ.2866)

उद्यच्छते-उद्गृह्णाति Lifts 'उत्' पूर्वकः यमधातुः आत्मनेपदी, यदि फलम् आत्मगामि। √यम् with उत् is in A.P. when the result goes to the doer. 'भारम् उद्यच्छते' इत्यादि (कौ.2742)

उद्युङ्क्ते-प्रयतते Makes effort 'उत्' पूर्वकः 'युज्' धातुः आत्मनेपदी। √युज् with उद् takes A.P.

उद्धरनिवपा-उद्धर निक्षप इति यस्यां क्रियायाम् The act in which it is said take out and keep. (प्र.स.2166)

उन्नसः -उन्नता नासिका यस्य One whose nose is raised prominant (कौ.858)

उन्मनायते-अनुन्मनाः उन्मनाः भवति One who gets excited or agitated in mind not being so earlier.

उन्मृजावमृजा-ऊर्ध्वम् अधश्च मार्जय इति यस्यां क्रियायाम् The act where it is said sweep or brush upwards and downwards (प्र.स.2166)

उपकुरुते-सेवते Serves सेवार्थे कृधातुः आत्मनेपदी। √'कृ' is used as A.P. in the sense of serving 'हरिम् उपकुरुते'

उपकृती मन्त्रे-मन्त्रम् उपकृतवान् Who helped in the counsel (सप्तमी)

उपक्रमते-प्रारम्भार्थे एव क्रमधातुः, 'प्र' 'उप' सहितः आत्मनेपदी √'क्रम्' with 'उप' or 'प्र' only in the sense of beginning takes A.P. (कौ. 2715) 'ग्रन्थमुपक्रमते' इत्यादि।

उपगिरम् } अव्य.Ind. गिरेः समीपम् Near
उपगिरि } the mountain. अन्ते विकल्पेन अकारः 'अ' at the end optionally (प्र.स.2091)

उपचतुराः-चतुर्णां समीपे ये सन्ति (त्रयः पञ्च वा) Near four (three or five) अकारान्तत्वं विशेषः

उपजरसम् -अव्य.Ind. जरायाः समीपे Near the old age (प्र.स.2091) अकारान्तत्वं विशेषः । 'सः उपजरसं सुवेषधारणश्रद्धालुः दृश्यते' इत्यादयः ।

उपडः, उपकः, उपियः, उपिलः, उपिकः, उपेन्द्रदत्तकः-तपस्वी (दयनीयः) उपेन्द्रदत्तः The pitiable उपेन्द्रदत्त (such expressions are common is modern languages also) (कौ.2035-6)

उपतिष्ठते-उपपूर्वः स्थाधातुः अधोनिर्दिष्टेषु अर्थेषु आत्मनेपदी । √'स्था' with 'उप' takes A.P. in the following senses (1) मन्त्रकरणे Standing near something reciting *mantras* 'आग्नेय्या आग्नीध्रमुपतिष्ठते (आग्नेय्याख्यया ऋचा आग्नीध्राख्यं मण्डपविशेषमुपेत्य तिष्ठति Stands at the hall called *Āgnīdhra* reciting आग्नेयीमन्त्र-s) (2) देवपूजायाम् Worship of gods आदित्यम् उपतिष्ठते (3)संगतिकरणे meeting or mixing 'गङ्गा यमुनाम् उपतिष्ठते' (4)मित्रकरणे making friends 'रथिकानुपतिष्ठते' (5) मार्गे - Path, Road पन्थाः स्रुघ्नम् उपतिष्ठते । प्राप्नोतीत्यर्थः । (6) लिप्सायां (किञ्चित् प्राप्तुम् अभिलाषायां) द्योत्यायां विकल्पेनात्मनेपदम् A.P. is optional when desire to get something is implied भिक्षुकः प्रभुम् उपतिष्ठते उपतिष्ठति वा (7)अकर्मकत्वे आत्मनेपदी भवति *Ātmanepadi* when it is used as an intransitive verb. भोजनकाले उपतिष्ठते - सन्निहितो भवति

उपदशाः-दशानां समीपे ये सन्ति (नव एकादश वा) 'Near ten'. Nine or eleven. 'उपशतम्' इत्यादयः ।

उपधाशुद्धः-प्रलोभनादिभिः अनाकृष्टः अधिकारी An officer who is found pure (in character) after secret tests through various temptations.

उपनदम् } अव्य.Ind. नद्याः समीपम् Near
उपनदि } the river अन्ते अकारः वैकल्पिकः । (प्र.स.2094)

उपनिषत्कृत्य-उपनिषदमिव कृत्वा Having made it like an *Upaniṣad*. Treating like an *Upaniṣad* (कौ.780)

उपपादिती धने-धनम् उपपादितवान् One who made arrangements for money (सप्तमी)

उपभोगक्षमः देशः -उपभोगानुकूलं स्थानम् A place fit for enjoyment. समासस्यान्ते 'क्षम' शब्दः योग्यतां, समर्थतां च द्योतयति । 'क्षम' at the end of a compound indicates fitness, worthyness etc. 'स्पर्शक्षमं रत्नम्' (अ.शा.I) 'तपःक्षमं शरीरम्' इत्यादि ।

उपयच्छते -स्वीकरोति Takes उपपूर्वः यमधातुः स्वीकारार्थे आत्मनेपदी । 'यम्' with 'उप', in

the sense of receiving takes A.P. 'भार्यामुपयच्छते' (कौ.2729)

उपयुङ्क्ते-उपयोगं करोति Uses उपपूर्वः युजधातुः आत्मनेपदी । √'युज्' with 'उप' takes A.P.

उपरमति, उपरमते वा-कर्मणः दूरीभवति Ceases to function. 'उप' पूर्वकात् अकर्मकात् रमधातोः परस्मैपदं वा । 'रम्' with उप optionally takes P.P. when it is used as intransitive (कौ.2751)

उपरमति / उपरमयति Makes someone to stop working रमधातुः परस्मैपदी प्रेरणार्थतयापि उपयुज्यते √'रम्' with 'उप' takes P.P. when it conveys the sense of the causative form. (कौ.2750)

उपराजम्-अव्य.Ind. राज्ञः समीपे Near the king अव्ययीभावे नकारान्तशब्दानां समासान्तगतानां नकारस्य लोपः भवति In the अव्ययीभाव the 'न्' at the end is dropped 'उपार्यमम्' (near the Sun) 'अध्यात्मम्' इत्यादयः (प्र.स.2092)

उपर्युपरि ग्रामम्-ग्रामस्योपरि समीपदेशे Over the village nearly 'काबूलमुपर्युपर्युपरि अमेरिकाविमानानि उड्डयन्ते स्म' इत्यादि । (कौ.2142) उपयुपर्युपरिशब्देन साकं द्वितीया प्रयुज्यते । उपर्युपरि (Ind. in the sense of just above) governs द्वितीया

उपलम्भ्यः - Gentleman who can be approached समीपं गन्तुं योग्यः साधुः

उपलभ्यः - उपलब्धुं योग्यः That which can be obtained. (कौ.2846)

उपविपाशन्-विपाशः (कस्याश्चित् नद्याः) समीपे Near the river *Vipāśa* (अकारान्तत्वम् विशेषः) (कौ.2090)

उपवीणयति-वीणया गायति Plays on the lyre.

उपशयः (1)- समीपे शयनम् Lying nearby

उपशायः (2)- पर्यायेण शयनम् Lying in turn.

उपशुनम् -अव्य.Ind. शुनः समीपे उपशुनम् Near the dog (कौ.945)

उपश्लोकयति-श्लोकैः उपस्तौति Praises with *Ślokas*.

उपसरः -(A) प्रथमं गर्भधारणम् First pregnancy.

उपसारः -(B) समीपगमनम् Approaching (कौ.3248)

उपसर्या (A) - (1)गर्भाधानार्थं वृषभेणोपगन्तुं योग्या गौः A cow who has to be mated with the bull for bearing the child.

उपसार्या (B) प्राप्तव्या अथवा गन्तव्या (काशी) *Kāśi* which can be visited (कौ.2852)

उपसादिती सदसि-सदः उपसन्नवान् One who attended the assembly (सप्तमी)

उपस्कारं काश्मीरकाः लुनन्ति-विक्षिप्य लुनन्ति Kashmiris throw seeds and harvest the crop. (प्र.स.18) उपपूर्वकात् 'कृ' धातोः लवनसम्बद्धेऽर्थे 'सुट्' (स्) भवति √'कृ' with उप gets स् when it is connected with cutting.

उपस्किरति सिंहः नरम् -भूमौ विक्षिप्य हिनस्ति Lion kills the man after throwing him down. (प्र.स.18) उपात् प्रतेश्च कृधातौ परे, हिंसार्थे 'सुट्' स्यात् । √'कृ' with 'उप' or प्रति gets 'स्' in the sense of killing.

उपस्कुरुते-गुणाधानं करोति Adds some good quality गुणाधाने अर्थे कृधातुः आत्मनेपदी एव The root 'कृ' only takes A.P. in the sense of adding something

good. विनयः विदुषः उपस्कुरुते Modesty brings refinement to a scholar

उपस्कृतं गच्छति-सविकारं गच्छति Walks in an awkward manner (प्र.स.पृ.17)

उपस्कृत्य व्याचष्टे-पदानि अध्याहृत्य व्याचष्टे Clarifies the meaning by borrowing words. (प्र.स.पृ.17)

उपस्थानगृहम्-अतिथ्यादिदर्शनगृहम् Drawing room. The hall where visiters are received.

उपस्थापनीयम्-उपस्थापना प्रयोजनम् अस्य That which is intended to be presented.

उपस्नानम् -स्नानोपकरणम् Things required to take bath 'गच्छ; मागधिकामानय उपस्नानेन, (भा.ना.च.165)

उपहरिं सुराः-सुराः हरेः हीनाः Gods are inferior to *Hari* हीनार्थे 'उप' इत्यनेन द्वितीया प्रयुज्यते । 'उप' in the sense of inferior governs द्वितीया । (कौ.451) 'उप मन्त्रिणं कार्यदर्शी' इत्यादयः ।

उपहस्तिका-ताम्बूलकरङ्कः Pan-box, vanity bag.

उपाकृती पशौ-पशुम् उपाकृतवान् One who had sacrificed an animal (सप्तमी)

उपाग्रहायणम् / **उपाग्रहायणि** — मार्गशीर्षपूर्णिमायाः समीपे Near *Purnimā* of *Mārgaśīrṣa* month. (समासस्यान्ते वैकल्पिकः अकारः (प्र.स.2094)

उपाध्याया / **उपाध्यायी** — अध्यापिका स्त्री A lady teacher

उपाध्यायादधीते-He learns from a teacher नियमपूर्वकविद्यास्वीकारे बोधकस्य पञ्चम्यां प्रयोगः When studies are done according rules, word denoting the person who teaches is used in पञ्चमी (कौ.592) 'दूरदर्शनीपाठं शृणोति' 'कम्प्यूटरं पश्यति' इत्यादौ न ।

उपाध्यायानी / **उपाध्याया** — उपाध्यायस्य भार्या Wife of a teacher

उपारूढगर्भा-परिवृद्धगर्भा One who is in an advanced stage of pregnancy

उपांशुदण्डः -रहसि दण्डनम् Silent or secret punishment

उपासिती गुरुकुले -गुरुकुलम् उपासितवान् । श्रद्धया अभ्यस्तविद्यः One who stayed at teacher's house. He has studied with devotion.

उप्तगाढं (बीजम्)-प्रथमं जले गाढं ततः उप्तं बीजम् The seed which was first put in water and then sown पदयोः व्युत्क्रमः Change in the order of words (प्र.स.2199)

उभयतो नगरं नदी -River is in either side of the city 'उभयतः' शब्देन योगे द्वितीया स्यात् । 'उभयतः' governs द्वितीया । उभयतो द्वारं द्वारपालौ ।

उभयविभ्रष्टः-उभाभ्यामपि प्रयोजनाभ्यां विहीनः Neither here nor there. Losing on both the sides.

उभयवेतनः-यः पक्षद्वयात् धनं गृह्णाति One who receives payment from both the contesting parties, 'उभयवेतनोऽयं महाभागः न्यायवादी' । (प्र.स.पृ.19)

उभयाञ्जलि / **उभाञ्जलि** — (अव्य.)- वदन्ति-ते द्विवारं नमस्कृत्य (नृपं) वदन्ति । Having saluted twice they speak. (to the king) (प्र.स.2268)

उभयादन्ति } **(अव्य)** हन्ति दन्ती -उभाभ्यां
उभादन्ति } दन्ताभ्यां प्रहृत्य गजः हन्ति Striking with both the tusks the elephant kills (प्र.स.2268)

उभयापाणि (अव्य) गृह्णाति } उभौ पाणी
उभापाणि } प्रसार्य
गृह्णाति Streching both the hands he takes (प्र.स.2268)

उभयाबाहु (अव्य) युध्यन्ते } द्वावपि बाहू
उभाबाहु } उद्धृत्य युध्यन्ते
Using both the hands, they fight (प्र.स.2268)

उभायाहस्ति (अव्य) ददाति } उभाभ्यां
उभाहस्ति } हस्ताभ्यां
धनादिकम् उद्धृत्य ददाति Taking out coins etc., with both the hands he gives (प्र.स.2268)

उमाकटम् -उमानां रजः The dust of the grain called उमा

उरःप्रतिपेषं युध्यन्ते-कृत्स्नम् उरः पीडयन्तः युध्यन्ते The fight hitting at each other's chest सर्वतो विध्यमाने स्वाङ्गे द्वितीयान्ते उपपदे णमुल् स्यात् When a स्वाङ्ग (one's limb of the body) is used as उपपद in द्वितीया the root gets णमुल् (अम्) when the limb is completely hit or tortured (कौ.3377) 'उरोविदारं प्रतिचस्करे नखैः' (शिशु. I) इत्यादि। See 'भ्रूविक्षेपं कथयति'।

उल्लोकयितव्य-वि.a शिरः उन्नमय्य द्रष्टव्यः That which is to be looked at with raised head. उल्लोकयितव्यः प्रासादः

उषासासूर्यम्-उषश्च सूर्यश्च *Uṣas* and *Sūrya.* (कौ.1928)

उष्ट्रक्रोशी-उष्ट्र इव क्रोशति One who blares like a camel काकरावी, गजगामी इत्यादयः

उष्ट्रखरम्-उष्ट्राश्च खराश्च तेषां समाहारः Group of camels and the donkeys समाहारे एकवचनम् (प्र.स.2317) एवं उष्ट्रशशम्

उष्णकः-(1) 'उष्णं करोति उष्णकः'। शीघ्रकारी। Quick in action (2) उष्णताजनकः ज्वरः। Fever.

उष्णंकरणम् -उष्णं करोतीति उष्णं करणम् That which makes hot. (कौ.1007)

उष्णभोजी-उष्णं भोक्तुं शीलम् यस्य One who is in the habit of eating hot food. एवं शीतभोजी, शीघ्रभोजी, प्रातः स्नायी इत्यादयः।

उष्णालुः-उष्णं न सहते He who can not withstand heat.

उष्णिका-अल्पमन्नं यस्यां सा उष्णिका, यवागूः Gruel which contains a little rice.

ऊ

ऊकभूताः (गावः)-समूहभूताः गावः Cows formed into a group ऊकीकृताः इत्यादयः (प्र.स.2153)

ऊढभार्यः } ऊढा भार्या येन सः One who
भार्योढः } married a wife पदयोः क्रमे विकल्पः. Order of words is changed optionally. (प्र.स.2254)

ऊढयति-ऊढं ऊढां वा करोति Makes something born (on head or cart etc.) marries off

ऊष्मायते-ऊष्म उद्वमति Emits heat or hot vapour

ऊधन्यम् -ऊधसे हितम् Beneficial to the udder (कौ.1662 ग.सू.)

ऊरुद्वयस } वि.a ऊरू प्रमाणमस्य जलस्य
ऊरुदघ्न } ऊरुद्वयसम् इत्यादि Thigh deep
ऊरुमात्र } (water etc.) प्रमाणार्थे द्वयसच् (द्वयस) दघ्नच् (दघ्न) मात्रच् (मात्र) इति प्रत्ययाः हस्तादिभ्यः अनन्तरं प्रयुज्यन्ते In the sense of measure (upto etc.) suffixes द्वयस, दघ्न and मात्र are added at the end of words like हस्त । जानुद्वयस, जानुदघ्न, जानुमात्र, तालवृक्षद्वयस, तालवृक्षदघ्न, तालवृक्षमात्र इत्यादयः ।

ऊर्ध्वजानुः } ऊर्ध्वं जानुनी यस्य सः Raising
ऊर्ध्वज्ञुः } the knees sitting on the hams (2) Long shanked (कौ.839)

ऊर्ध्वपूरं पूर्यते-(कुम्भः) ऊर्ध्वमुखः सन् पूर्यते The pot is filled with its face being upwards (कौ.3365)

ऊर्ध्वशोषं शुष्यति -(पादपः) ऊर्ध्वः सन् शुष्यति पादपः The tree becomes dry while standing (कौ.3365) (चेट्टु निलुवुना एंडिपोयिंदि -तेलुगु)

ऊर्ध्वमौहूर्तिक-वि.a ऊर्ध्वं मुहूर्तात् भवः That which happens after one *Muhūrta* (a few minutes) (कौ.2788)

ऊर्ध्वरेतस् } यस्य रेतः ऊर्ध्वं प्रसरति तादृशः
ऊर्ध्वस्रोतस् } आजन्मब्रह्मचारी An ascetic who abstains from sexual intercourse and merely having his semen flowing upwards.

ऊर्वष्ठीवम्-ऊरू च अष्ठीवन्तौ च तेषां समाहारः ऊर्वष्ठीवम् Thighs and knees (कौ.945)

ऊष्मायमाण-वि.a ऊष्मप्रसारकम् Which spreads heat.

ऋ

ऋक्सामे-ऋक् च साम च ऋक्सामे *Rk* and *Sāman* (अकारान्तः) (कौ.945)

ऋग्यजुषम्-ऋचश्च यजूंषि च तेषां समाहारः *Rks* and *Yajus* (अकारान्त) (कौ.945)

ऋणम् -A कालान्तरे प्रतिदास्यामीत्युक्त्वा गृहीतं धनादिकम् । Loan.

ऋतम् -B सत्यम् Truth, true.

ऋणार्णम्-ऋणस्यापनयनाय गृहीतम् अन्यदृणम् Loan taken to clear another loan.

ऋतिंकरः -गतिकारः That which makes movement.

ऋतुविभक्त-वि.a ऋतुभेदेन भिन्नः Which changes according to the change of the seasons.

ऋतुसुख -वि.a सर्वासु ऋतुषु सुखकरम् Pleasant in all seasons ऋतुसुखं दक्षिणाभिमुखं गृहम्

ऋते ज्ञानात्, सुखं नास्ति -ज्ञानाभावे सुखं नास्ति There is no happiness without knowledge 'ऋते' इत्यव्ययेन योगे पञ्चमी 'ऋते' (Ind.) governs पञ्चमी । 'ऋते यत्नात् किमपि न सिध्यति' इत्यादि ।

ऋभुक्षीणति -ऋभुक्षा (इन्द्रः) इव आचरति He behaves like *Indra*.

ए

एकदुःखसुख-वि.a अन्येषां दुःखेन दुःखवान् अन्येषां सुखेन सुखवान् Sympathetic, Sharing others' agonies and pleasures. 'एकदुःखसुखावेतावेधेतां दम्पती सुखम्' ।

एकधनम्-उत्तमं पारितोषिकम् । सगौरवम् उपायनम् An excellent gift. An honorific offering.

एकधनिन्-एकधनस्य ग्रहीता One who recieves एकधन See above

एकधाकारम्, एकधाकृत्य, एकधा कृत्वा-अनेकधाभूतं एकथा कृत्वा, Having combined into one (कौ.3383)

एकधाभावम्, एकधाभूय, एकधा भूत्वा-अनेकधाभूतम् एकधा भूत्वा Having become one. एवं द्विधाभावं, त्रिधाभावम् इत्यादयः। 'द्विधाभावं कुटुम्बोऽयं क्लेशान् भजति नित्यशः'। (कौ.3384)

एकधुरः, एकधुरीणः-एकां धुरं यः वहति Horse or bull which can draw or carry one particular load or yoke.

एकपात्रम्-विभिन्नजातीयानां बहूनामेकस्मिन् स्थाने भोजनम् Eating together by people of different castes.

एकपदी-सन्मार्गः यत्र एकदा एकैनैव गन्तुं शक्यते Foot path

एकपदे-अव्य.Ind. हठात् All on a sudden, Abruptly 'एकपदे अवघट्य तूष्णीकः पटहशब्दः संवृत्तः' (भा.ना.च.पृ.254)

एकपरि-अव्य.Ind. एकेन अक्षेण विपरीतं वृत्तम् (द्यूते । इदं क्रिकेटादि क्रीडानां विषयेऽपि आधुनिके काले उपयोक्तुं शक्यते) It turned against by the wrong move of one dice.

एकरसः-एकस्मिन्नेव रसः अभिरुचिः यस्य Finding pleasure only in one thing.

एकादशम्-एकादश (माषाः) अधिकमस्मिन् शते सहस्रे वा Hundred or thousand (*Māṣas* or *Suvarṇas* etc.) which contain eleven more *Māṣas* or *Suvarṇas*. (*Māṣa* and *Suvarṇa* are coins)

एकान्तयोगः-नियोगिनाम् एकत्र समावेशः Meeting of officers in one place

एकाहार्य-वि.a आहारविषये विधिनिषेधानवेक्षी Having the same food, without differentiating between the allowed and prohibited food.

एतयति-एनीं (चित्रवर्णां) करोति Makes something as of bariegated colours.

एदिधिषुःपतिः-ज्येष्ठायाम् अनूढायां कृतोद्वाहायाः यवीयस्याः स्वसुः पतिः Husband of a younger sister whose elder sister has not been married.

एवंकारम्-एवम् Like this. 'सः एवंकारं चर्वति' (कौ.3348)

एवं गते-इदम् एवं संवृत्तम्, अस्मिन् समये, एवं स्थिते सति When this is the condition or situation. While so, If so 'मदनिके, एवं गते किं कर्तव्यम्?' (भा.ना.च.242)

एवं स्म पिता ब्रवीति - पिता एवमुक्तवान् Father has said like this अपरोक्षेऽपि भूतानद्यतने लट् स्यात् 'स्म' योगे A verb with 'स्म' is used in लट् though the action is not परोक्ष (unseen by the speaker) (कौ.2779)

एष समासः-संग्रहेणोक्ते इदम् This is the essence of what is said. 'In short'. (भा.ना.च.130)

एहियवम्-'एहि, यौमि' इति यस्मिन् कर्मणि उच्यते तत् The act where it is said come, I shall meet or mate ? (कौ.754.ग.सू.)

एहिद्वितीया-द्वितीयस्य आह्वानं यस्यां क्रियते सा एहिद्वितीया The act where the second person is invited (प्र.स.2166)

एहिरेगच्छरा-रे आगच्छ, रे गच्छ इति यस्यां क्रियायाम् The act of saying (with disrespect) 'come; go'. (प्र.स.2166)

एहिप्रघसा-एहि प्रघस (अत्यधिकाशिन्) इति

यस्यां क्रियायाम् The act of saying "come O! glutton". एवम् 'अपेहि प्रघसा' (प्र.स.2166)

एहिमन्ये ओदनं भोक्ष्यसे इति भुक्तः सोऽतिथिभिः-'एहि, ओदनं भोक्ष्यामि इति मन्यसे, सः भुक्तः पूर्वमेव अतिथिभिः' इति परिहासवचनम् अत्र उपपदतया (उपधातुतया) प्रयुक्तः मन्यधातुः केवलम् उत्तमपुरुषैकवचने एव प्रयुज्यते। प्रधानस्य भुजादि धातोः मध्यम पुरुषे यथासंभवं विभिन्नवचनेषु प्रयोगः "Oh! come on. You are thinking of eating cooked rice. It was already eaten by guests". The main root accompanied by the root मन् 'to think' is used in second person and the root मन् is used in the first person singular only. All this when there is *parihāsa* implied (कौ.2162). 'एहि, मन्ये रथेन यास्यसि, न हि यास्यसि। यातः तेन ते पिता।' (काशिका1.4.106) 'एहि मन्ये मन्त्रिपदं लप्स्ये इति' इत्यादीनि।

एहिरेयाहिरा-एहि रे याहि रे इति यस्यां क्रियायां सा The act of saying (with disrespect) 'come; go'. प्र.स.2166

एहिवाणिजा-एहि वाणिज इति यस्यां तिथौ, क्रयादि क्रियायां वा सा एहि वाणिजा। केचित्तु आयान्ति गच्छन्ति वाणिजाः यस्याम् इति वदन्ति (ग.र.म.158) The act of sales and purchase etc., when it is said come Oh! merchant or the day when it is said "come merchant!" or the day or action when merchants come and go.

एहिविघसा-एहि विघस (उच्छिष्टभोजिन्) इति यस्यां क्रियायां सा एहिविघसा The act of saying "come O! eater of left out food". (प्र.स.2166)

एहिस्वागता-एहि स्वागतम् इति यस्यां क्रियायां सा एहिस्वागता The act when it is said "come; welcome" (प्र.स.2166)

एहीडम्-'एहि, ईडे स्तौमि इति यस्मिन् कर्मणि तत् एहीडम्' (कौ.754 ग.सू.). 'एहि आगच्छ ईडे स्त्रि इति यस्मिन् कर्मणि तत् एहीडम् विवाहादि कर्म' (ग.र.म.159) The act where it is said, "Come, I shall praise you". The act in marriages etc; where it is said" come on O! girl".

ऐ

ऐकागारिकः-'एकम् असहायम् अगारं प्रयोजनम् अस्य मुमुषिषोः ऐकागारिकः चोरः One who is interested in an isolated house, a thief (कौ.1776)

ऐकान्यिकः-एकम् अन्यत् वृत्तम् अस्य। यस्य अध्ययेन प्रवृत्तस्य परीक्षाकाले विपरीतोच्चारण-रूपं स्खलितम् एकं जातम् सः One who has committed a mistake, or wrong pronunciation at the time of examination while one is engaged in recitation.

ऐक्षुभारिकः, **ऐक्षुकः** } इक्षुभारम् अथवा इक्षून् हरति, वहति, आवहति वा ऐक्षुभारिकः One who steals, bears or bring the load of the sugar cane.

ऐदम्पर्यम् -अस्य विवक्षितः अर्थः The essential purport (of this)

ऐदंयुगीन-वि.a अस्मै युगाय साधुः Fit for this yoke. Fit for this *yuga* (age) (कौ.16 51)

ऐहलौकिकम्-इहलोके भवम् Mundane (उभयपदवृद्धिः)

ओ

ओजायते-(1) ओजस्वी इव आचरति Behaves as though having power (2) ओजस्वी भवति Becomes powerful.

ओदनपाणिनीयाः-ओदनार्थं पाणिनीयस्याध्ययनं कुर्वन्ति ये (न तु पाणिनीये श्रद्धया) Those who study *Vyākaraṇa* just for the sake of food. आवसथशास्त्रीयाः "Those study *Śāstra* just for staying in the hostel" इत्यादयः ।

औत्तरपथिकम्-उत्तरपथेन आहृतं गच्छति वा That which was brought by northern route or going to northern route.

औदनिक-वि.a ओदनं नियतमस्मै दीयते He to whom (cooked) rice is regularly given.

ओदनीय, ओदन्य-वि.a. ओदनाय हितम् good or fit for preparing (cooked) rice.

औक्षकम्-उक्षाणां समूहः A herd of bulls

औत्थितासनिकः-आसनानां निक्षेपे नियुक्तः अधिकारी A officer incharge of seating arrangement.

औदरिकः-बुभुक्षया अत्यन्तपीडितः उदरे प्रसितः (उत्सुकः) औदरिकः A glutton

औदश्वित्कः-उदश्विता संस्कृतः That which is flavoured dressed (flavoured) by adding curds in which one fourths of water is mixed.

औपपादिकः-हठात् उन्नतिं प्राप्तः पुरुषः A person suddenly risen to power. A upstart.

औपवस्त्रम्-उपवस्ता प्राप्तोऽस्य Found suitable for a fast. समीपनिवासी यस्य प्राप्तः That for which a neighbour has come.

औपवासिकः -उपवासे साधुः (1) Fit for fasting (2) Fit for living nearly (कौ.16 54)

औपसंख्यानिक-वि.a अनुबन्धतया निर्दिष्टम् Mentioned in a supplementary addition.

औपस्थायिकः-किंकरः An attender

औपस्थितिक-समीपवर्ती सेवकः Personal attender.

औपानह्यम्-उपानहे साधु चर्म Leather fit for making shoes.

औपयनिकम् -उपायनम् Gift, present

औरभ्रकम्-उरभ्राणां समूहः Herd of sheep

और्ध्वदमिकः, और्ध्वंदमिकः-ऊर्ध्वे भवः That which occurs later on (ग.र.म. पृ.351)

और्ध्वमौहूर्तिक-वि.a ऊर्ध्वमुहूर्ते भवः That which occurs after one मुहूर्त (a short time)

औलूकम् -उलूकानां समूहः Group of owls

औषधसेवया समं व्यायामं कुरु- Do exercise also while taking medicine. See पुत्रेण सह आगतः पिता

औषधसेवा-औषधग्रहणम् Taking medicine एवं 'मद्यसेवा' इत्यादयः ।

औष्ट्रकम्-उष्ट्राणां समूहः A herd of camels

क

कंसं घातयति-कंसवधम् आचष्टे, कृष्णकृतकंसवधकथां श्रावयति पौराणिकः इत्यर्थः He narrates the story of killing *Kamsa*.

कः कालः -कियतः कालात् ? सुदीर्घकालात् प्रभृति इत्यर्थः Since what a long time. How long. कः कालः त्वामन्विष्यामि (भा.ना.च.17)

कः कोऽत्र भोः-Who is there ? used by a superior person (like a king) while calling a servant or attender.

कः हेतुः वसति ? कं हेतुं वसति ? केन हेतुना वसति ? कस्मै हेतवे वसति ? कस्मात् हेतोः वसति ? कस्य हेतोः वसति ? कस्मिन् हेतौ वसति? - हेतुशब्देन तत्पर्यायैः

निमित्तादिशब्दैश्च किम्, तत् इत्यादिना सर्वनाम्नां प्रयोगे ते शब्दाः सर्वासु विभक्तिषु प्रयुज्यन्ते When the word 'हेतु' or its synonims are used along with *Sarvanāmas* like किम्, तद् etc., in a sentence, those words take all the *vibhaktis* optionally.

कक्षायते-पापं चिकीर्षति Intends to do a sinful act.

कक्ष्याबन्धनम्-क्लिष्टं किंचित् भारोन्नयनादिकं कर्तुम् उद्युक्तेन उत्तरीयादिभिः कटिप्रदेशे बन्धनम्। क्लिष्टकर्माचरणसन्नद्धता Tying the upper cloth etc., to the waist while preparing oneself to do a strenuous work. Titening the belt. To be ready to do an important work (भा.ना.च.142)

कचाकचि-कचे कचे च गृहीत्वा प्रवृत्तं युद्धम् Fighting by pulling each others hair.

कच्चन / **कच्चित्** (अव्य.Ind.) अनुकूलोत्तरश्रवणाशापूर्वकं कुशलप्रश्नादौ प्रयुक्ते अव्यये These are indeclinables of interrogation (often translatable by "I hope") 'कच्चित् (अथवा कच्चन) त्वं सम्यक् पठसि?' 'कच्चित् (अथवा कच्चन) सर्वे कुशलिनः ?' इत्यादि।

कटकीय / **कटक्य** वि.a कटकाय हितम् (उपयोगि) Useful for a bracket or formation of an army-circle.

कडङ्करीय / **कडङ्कर्य** कडङ्करं, माषमुद्गादिकाष्ठम् अर्हतीति (वन्यमृगः) The animal which is in the habit of eating the stalks of black gram plants etc.

कडारांशुकम् / **अंशुककडारम्** कडारवर्णम् अंशुकम् Cloth of yellowish white colour. Order of words optional पदक्रमे अनियमः (प्र.स.2206)

कणेहत्य-अव्य.Ind. तृप्तिप्राप्तिपर्यन्तम् An indeclinable expressing the satisfaction of a desire (satiation) कणेशब्दः सप्तमीप्रतिरूपकः निपातः श्रद्धातिशये वर्तते ''कणेहत्य पयः पिबति' Drinks milk to his heart's content or till he is completely satisfied 'कणेहत्य दूरदर्शनीं पश्यति' इत्यादयः। (कौ.767)

कण्टकप्रतिसरः-कण्टकचितया आमसतन्त्र्या निर्मिता संवृतिः Cat-o-nine tails, a whip with knotted cords, to punish wrong doers.

कण्ठेकालः -'कण्ठेस्थः कालः यस्य सः' । शिवः "One on whose neck there is black spot". Lord Siva मध्यमपदलोपी बहुव्रीहिः अलुक्समासः । 'स्थ' in 'कण्ठेस्थकालः' is dropped and सप्तमीविभक्ति termination is retained in *Samāsa* (कौ.830)

कण्वायते-कण्वं, पापं करोति Commits sin

कतिपयेन मुक्तः / **कतिपयात् मुक्तः** He was released by a few methods. कतिपयशब्दः तृतीयायां पञ्चम्यां वा प्रयुज्यते। 'कतिपय' is used either in तृतीया or पञ्चमी । See 'स्तोकान्मुक्तः' ।

कत्त्रयः-कुत्सिताः त्रयः The bad three 'कु' changes into कत् when it is followed by 'त्रि' in a compound. 'त्रि' परकस्य 'कु' इत्यस्य 'कद्' आदेशः। (कौ.1027)

कथंकारम्-कथम् How? 'मया कथंकारं पठनीयम्?' (कौ.3348)

कथंकथिकः-प्रश्नशीलः 'कथं कथमिति यः पुनः पुनः पृच्छति' One who is of inquisitive mind and goes on questioning 'कथंकथिक मा प्रश्नैः पीपिडोऽस्मान् नमोऽस्तु ते'।

कथाश्रयः-सम्भाषणविषयभूतः Topic or subject of conversation 'संभाषेषु कथाश्रयो गुणवतां लब्धप्रियाणां प्रियः' (भा.ना.च.292)

कदश्वः-कुत्सितः अश्वः A wicked horse अजादौ शब्दे परे, समासे, 'कु' इत्यस्य कद् आदेशः। 'कु' changes into कद् when followed by a word beginning with vowel (कौ.1027) 'कदन्तम्' 'कदभ्यर्थना' इत्यादयः।

कदा आगतोऽसि ? अयमागच्छामि-When did you come ? I am coming. "When will you go? I am going.' **कदा गमिष्यसि ? एष गच्छामि** । वर्तमानस्य सामीप्ये विकल्पेन वर्तमानवत् प्रयोगः भवति। 'अयम् आगाम्' 'एषः गमिष्यामि' इत्यपि साधुः To indicate that an action has just taken place or going to happen immediately 'लट्' is used instead of लुङ् or लृट् optionally. In the above examples 'अयमागाम्' 'एष गमिष्यामि' also are correct (कौ.2789)

कदा भोक्ष्यते ? कदा भोक्ता ? कदा भुङ्क्ते? कर्हि भोक्ष्यते? कर्हि भोक्ता? कर्हि भुङ्क्ते?-When will he eat ? 'कदा' इत्यनेन 'कर्हि' इत्यनेन वा योगे भविष्यदर्थे विकल्पेन लट् स्यात्। तदभावे लुट् लृड्वा When कदा or कर्हि is used the verb is optionally used with 'लट्' instead of लुट् or लृट् (कौ.2784)

कद्रथः-कुत्सितः रथः Bad chariot (कौ.1029)

कद्वदः -कुत्सितः वदः (वक्ता) Bad speaker (कौ.1029)

कनयति-युवानं करोति Rejuvenates, makes to regain youth.

कन्धरायते-(कन्धरा अस्य अस्तीति कन्धरः) अकन्धरः कन्धरः भवति One who did not have strong shoulder gets strong shoulder.

कन्यादर्शं वरयति-'यां यां कन्यां पश्यति तां तां वरयति' सर्वाः कन्याः वरयति Whom so ever girl he sees he wants to marry her. कर्मवाचकोपपदात् दृशधातोः णमुल् (अम्) to the root 'दृश्' which has कर्मवाचक as उपपद, णमुल् (अम्) is added. फलदर्शं भक्षयति । पुस्तकदर्शं पिपठिषति इत्यादयः (कौ.3350)

कपाटघ्नः-(चोरः) कपाटं हन्तुं शक्तः (A thief) Who is capable of breaking the door panel (कौ.2977)

कपिष्ठलं -(A) कपिष्ठलाख्यं गोत्रम् Name of a *Gotra* (family)

कपिस्थलं -(B) कपीनां स्थलम् Place of monkeys.

कपोलपाली-सुन्दरौ कपोलौ Beautiful cheeks. See गोमतल्लिका

कबरा (A) चित्रवर्णा Of variegated colour

कबरी (B) केशपाशः Lock of hair (कौ.500)

कम्बलदायः याति-कम्बलं दातुं याति He is going there to give blanket. See 'काण्डलावो व्रजति' । एवं 'कुम्भकारो व्रजति' कुम्भं कर्तुं व्रजति इत्यर्थः । (Goes there to make a pot) इत्यादयः । (कौ.3181)

कम्बलपारायणीयाः-ये कम्बलार्थं पारायणं कुर्वन्ति Those who perform पारायण just to get blankets. ओदनपाणिनीयाः इतिवत् ।

कम्बल्यम् -कम्बलोपयुक्तम् ऊर्णापलशतम् Wool of hundred *palas* useful for blanket.

कम्बोजमुण्डः, यवनमुण्डः-कम्बोज इव

मुण्डः, यवन इव मुण्डः। दीक्षितेन मुण्डितव्यम्। कम्बोजाः यवनाश्च मुण्डा भवन्ति । एवमिमौ वृथामुण्डौ इति एकोऽर्थः (ग.र.म.पृ.157)
1. One who is with shaven head (tonsured head without proper reason like a man of *kambhoja* country (2) like the *yavana*.

कं भोजयसि, भोजयिष्यसि, भोजयितासि? कतरं भोजयसि, भोजयिष्यसि, भोजयितासि ? कतमं भोजयसि, भोजयिष्यसि, भोजयितासि ?-Whom shall you feed ? 'किम्' शब्दस्य किम् शब्दनिष्पन्नानां च शब्दानां प्रयोगे लुटः, लृटः च स्थाने वा लट् प्रयुज्यते When किम् and its derivatives are used लट् is optionally used लुट् or लृट् (कौ.2785)

करणम् -(1) कार्यस्थानम्। कार्यालयः Office (2) सत्यापकं प्रमाणम् Proof, evidence.

करुणायते-करुणावान् भवति Becomes kind आत्मनः करुणाम् अनुभवति He feels his own pathos

करीषंकषा (वात्या)-करीषमपि अपहरति या तादृशी वात्या A strong wind or gale which makes even dung or cakes of dung on the ground or wall fly.

करेण कुणिः-करविकारकृतकुणित्ववान् He is कुणि (men of defective arm) on account of defect in hand. See 'अक्ष्णा काणः'।

कर्णजाहम्-कर्णस्य मूलम् Root of the ear एवम् अक्षिजाहम्, केशजाहम्, नखजाहम्, पादजाहम्, गुल्फजाहम्, भ्रूजाहम्, शृङ्गजाहम्, दन्तजाहम्, ओष्ठजाहम्, मुखजाहम्, आस्यजाहम्, पृष्ठजाहम्, वक्त्रजाहम्, फलजाहम् इत्यादयः। (पा.सू.5.2.24)

कर्णवेष्टकीय / **कर्णवेष्टक्य** } वि.a कुण्डलोपयोगी Useful for the ear-rings

कर्णवेष्टिककम्- (मुखम्) कर्णवेष्टकाभ्यां सम्पादि कर्णवेष्टिककम् । कर्णालङ्काराभ्याम् अवश्यं शोभते इत्यर्थः The face which would certainly look beautiful with ear-rings.

कर्णाकर्णि-अव्य. Ind. कर्णात् कर्णम् From ear to ear. 'भवितेति भवान् मन्त्री कर्णाकर्णि श्रुतं मया'।

कर्णाटकलहः-विना युक्तं कारणं कलहः Quarrel without any proper reason 'कर्णाटकलहप्रयोगं करोमि' (मृ.श.VI)

कर्णे चुरचुरा / **कर्णे टिरटिरा** / **कर्णे टुरटुरा** } (1) 'कर्णे असह्यवाक्प्रलापी'। असभ्यप्रवृत्तिः। Whispering something in the ears. Behaving without propriety (प्र.स.2139) (2) कर्णे चुरचुरशब्दः, टिरटिरशब्दः, टुरटुरशब्दः The desturbing sound 'चुर् चुर्', 'टिर् टिर्', 'टुर् टुर्' made in the ear (कौ.725)

कर्णजपः-(A) सूचकः पिशुनः A tale carrier.

कर्णजपः-(B) कर्णे जपिता गुरुः मशको वा A preceptor or anything like mosquito making noise in the ears.

कर्णेन बधिरः-कर्णविकारकृतबाधिर्यवान् Deaf on account of defect in the ear. See अक्ष्णा काणः।

कर्त्रीयति-कर्तारमात्मन इच्छति Wants performer of work for himself.

कर्मन्-तत्तत्कार्येषु अभ्यासः Training (अर्थशास्त्रम्)

कर्मकरः-(A) भृतकः । भृत्यै यः कर्म करोति A person who works for wages.

कर्मकारः-(B) भृतकादन्यः कर्मणः कर्ता A

person who does some work (कौ.2936) 'न कर्मकर आयातः कर्मकारोऽस्यतो गृहे'।

कर्मठः-कर्मसु यः घटते One engages himself in work.

कर्मण्यम् (शौर्यम्)-कर्मणा संपादि (शोभते) कर्मण्यम् (Bravery) which would shine more by action.

कर्मनिषद्या-कर्मकराणाम् आवासस्थानानि Residential quarters of workers (अर्थशास्त्रम्)

कर्मनिष्पाकः-अविच्छिन्नं कर्म Continuous work (अर्थशास्त्रम्)

कर्ममासः-वेतनार्थं गणनीयः मासः Month for calculating the wages of works.

कर्मसचिवः-कर्मानुष्ठानसहायः सचिवः A minister for actions, for execution.

कर्मान्तः-कर्मागारः Workshop (अर्थशास्त्रम्)

कर्मान्तिकः-कर्मान्ते कर्मकरः Worker in a factory etc. (अर्थशास्त्रम्)

कर्हि भुङ्क्ते-See कदा भुङ्क्ते etc. (कौ.2784)

कलमशिखाहतः-लेखिन्या निहतः। प्रतिकूलतया लेखनेन कृतापकारः Beaten or harmed by the pen. Harmed by false allegations. (क्षेमे.)

कलहायते -कलहं करोति Quarells.

कलिङ्गेषु अवात्सीः? नाहं कलिङ्गान् जगाम-प्रायः लिटः प्रयोगः अपरोक्ष भूत एव भवति। अतः उत्तमपुरुषे अस्य प्रयोगः अनुपपन्नः। परन्तु सत्यस्य अपलापे द्योत्ये अस्य प्रयोगः भवति यथा अस्मिन् उदाहरणे "Did you live in *Kaliñga deśa* ? I did not go at all to *Kaliñga*". Here जगाम is used लिट् first person. A verb can be used in लिट् even though the action is not unseen by the speaker where there is complete denial of a fact or action is implied 'किं त्वं तं बालम् अनिन्दः ? नाहं तं ददर्श' इत्यादि। (कौ.2774)

कल्याणधर्मन्-कल्याणः धर्मः यस्य One who practises auspicious Dharma. बहुव्रीहेः अन्ते धर्मशब्दः नकारान्तो भवति। 'धर्म' becomes नकारान्त at the end of *Bahuvrīhi* (कौ.863) एवं 'कृतधर्मा' 'दृष्टधर्मा' इत्यादयः।

कल्यवर्तम्- (1) प्रातरशनम् Breakfast (2) अत्यल्पमूल्यं वस्तु A trivial thing or gain (1) सुखं न आमयपरिभूतम् अकल्यवर्तं च' (भा.ना.च.पृ.21) (2) 'अर्थकल्यवर्तस्य कारणात् वसन्तसेना व्यापारिता' (मृ.शक.9)

कवचं बिभ्राणः-कवचधारणयोग्यवयाः One who is of the age of wearing armour वयोद्योतने धातुभ्यः चानश् (आन) To indicate the age चानश् (आन) is added to the roots whether they are A.P. or P.P. (कौ.3109) 'युगं वहमानः गौः, 'शकटं कर्षमाणः अश्वः' इत्यादयः।

कवचहरः-कवचधारणयोग्यवयाः One who is of the age of wearing armour 'कृष्णकञ्चुकहरः' (न्यायवादी) इत्यादयः।

कवयति-कविरिव आचरति Behaves like a *Kavi*.

कविचौरः-इतरेषां काव्येभ्यः शब्दार्थादिकं हरन् कविः A poet who steals from others' works, a plagiarist (ग.र.म.पृ.156)

कवीयति-कविम् आत्मन इच्छति One who wants to be a poet for him

कदुष्णम्, कवोष्णम्, कोष्णम् -किंचित् उष्णम् A little hot (कौ.1034)

कश्यः-कशाम् अर्हति (अश्वः) A horse which deserves whipping (प्र.स.1641)
कष्टम्-(A) (1) Misary (2) Difficult. That which is difficult to understand like *Śāstra*.
कषितम्-(B) निघृष्टम् Rubbed
कष्टमातुलः -सपत्नीमातुः भ्राता Brother of a step mother.
कष्टायते-पापं कर्तुम् उत्सहते Shows interest in sinful actions.
कस्कः-कः कः Who and who
काकम्-Group of crows काकानां समूहः
काकगृहः-यः काकान् गृह्णाति One who catches crows.
काकचर्या-यथा काकः केवलं जीवनभावपर्याप्ततया लब्धं यत् किंचित् जलं पिबति तद्वत् यथालब्धपायित्वम् Sipping lightly, like a crow, just enough to stay alive.
काकतालीयम्-पततः काकस्य निपतता तालेन चित्रीयमाणः संयोगः काकतालीयम्। तत्तुल्यः काकतालीयः यादृच्छिकः (ग.र.म.पृ.258) Anything accidental like the palm-fruit falling on a flying crow.
काकथा-कथनीयम् किमस्ति ? Where is the need to tell. where is the quistion of. 'का कथा बाणसन्धाने' (अभि.शा.III) 'महागजाः पलयन्ते मशकानां तु का कथा'।
काकरवाः-मध्यवर्गीयाः भृत्याः Middle class servants (पं.तं.पृ.6)
काक्ष-वि.a कुत्सितम् अक्षं काक्षम्। अथवा कुत्सिते अक्षिणी यस्य सः A bad sense organ (*Indriya*) or one with bad eyes, bad looks. Evil eye समासे 'कु' शब्दस्य कादेशः अक्षशब्दे परे। 'कु' changes into का when followed by अक्ष in a compound (कौ.1030) 'स्वैरसेना द्रुपदराजसुतां रुदन्तीं काक्षेण पश्यति' (भा.ना.च.445)
का गतिः-उपायान्तरं नास्तीत्यर्थः What is the other way. There is no way to avoid it. 'का गतिः? श्रूयताम्' (भा.ना.च.पृ.278)
काजलम्-ईषत् जलं काजलम्। अल्पार्थे कु इत्यस्य का इत्यादेशः। काम्लम्, काधनम् इत्यादयः (कौ.1031)
काणवृषभः } Blind bull पदपौर्वापर्ये
वृषभकाणः } अनियमः Order of the words is optional (प्र.स.2200)
काण्डलावो व्रजति-काण्डान् लवितुं व्रजति He is going for cutting the stalks कर्मवाचके उपपदे ण्वुलर्थे ण्वुलं बाधित्वा अण् भवति क्रियार्थायां क्रियायां द्योत्यायाम् When a कर्मवाचक is used as an *upapada* to the root, the root takes अण् instead of ण्वुल्। See 'कृष्णदर्शको याति' 'धनसंचायो याति' इत्यादयः। (कौ.3181)
काथिकः-कथायां साधुः One who is good at narrating stories (कौ.1654)
कादाचित्क-वि.a यत् कदाचिदेव भवति Incidental, occasional.
कानीनः-कन्यायाः अपत्यं पुमान् Son of an unmarried woman (कौ.1119)
कान्तारपथिक-वि.a कान्तारपथेन आहृतम्। कान्तारपथेन गच्छति Brought by the forest route or one who travels by forest route.
कांदिशीक-वि.a 'कां दिशं गच्छेयम् इति चिन्ताकुलः'। भयाकुलः One who is perplexed about which way to go. One who is fleeing.
कापिशायनम्-कपिशदेशनिर्मितं मधु Liquor

prepared in a place called *Kapiśa* (कौ.1339)

कापथम्-कुत्सितः पन्थाः Bad Road. Wrong way पथिन् शब्दे परे कुशब्दस्य कादेशः। 'कु' changes into का when followed by 'पथिन्' (कौ.1030)

कापुरुषः, कुपुरुषः-कुत्सितः पुरुषः A wicked man कुत्सितार्थस्य कुशब्दस्य पुरुषशब्दे परे वा कादेशः। अल्पार्थस्य तु कादेशः नित्यः। 'कु' optionally changes into का when followed by पुरुष in the sense of bad. But in the sense of a little there is no option, कापुरुष only (कौ.1032)

कामम्-अव्य.Ind. (1) यथेच्छम् Agreably to desire (2) तथा भवतु नाम Well, very well (a particle of assent) 'It may be that' मनागनभ्यावृत्त्या वा कामं काम्यतु यः क्षमी' (शिशु.II 43) (3) 'इदं सत्यमेवस्यान्नाम' इत्यर्थे। Granted or admitted (that), true that, no doubt (generally followed by तु, तथापि Yet, still) 'कामं न तिष्ठति मदाननसंमुखी सा भूयिष्ठमन्यविषया न तु दृष्टिरस्याः' (अभि.शा.I.31) (4) नूनम् In deed really. 'संरुद्धचेष्टस्य मृगेन्द्र कामं हास्यं वचस्तद्यदहं ब्रवीमि' (रघु.II43) (Often implying unwillingness or contradiction) (5) 'इदमेव युक्तम्' better, rather (usually with न)
'काममामरणात्तिष्ठेत् गृहे कन्यर्तुमत्यपि।
न चैवैनां प्रयच्छेत्तु गुणहीनाय कर्हिचित्' (मनु.9.89)

कामकारः-यथेष्टं कर्तुं स्वातन्त्र्यम् Freedom to act 'अर्धरात्रे बहिर्न गच्छेत्। कामकारः अन्यदा'।

कामंगामी-स्वेच्छया यः गच्छति अथवा करोति One who goes or acts according to his wish.

कामदुघा-वि.a कामान् दोग्धि इति कामदुघा One who yields desired objects.

कामात्मा-फलाभिलाषशीलः One who is full of desires (मनु.2.2)

कामुकी-A मैथुनेच्छा स्त्री A woman who wants capulation.

कामुका-B यत् किञ्चित् कामयमाना स्त्री She who wants something (कौ.500)

कालान्तरित-वि.a कालान्तरे कर्तव्यमिति निर्णीतम् Postponed 'हन्त! कालान्तरितं कार्यम्' (भा.ना.च.135)

काम्बोजमुण्डः-See कम्बोजमुण्डः

काम्लम्-किञ्चित् आम्लम् A little sour

कायविक्रयः-स्वैरिणीजीवनम् 'Selling the body' Prostitution.

कायदण्डः-कायस्य स्ववशे स्थापनम् Controlling the body.

कारिकाकृत्य-क्रियां कृत्वा Having done the work (कौ.762)

कारयति भृत्यं कटम्, कारयति भृत्येन कटम्-Makes the servant prepare the mat. णिजन्तः कृधातुः विकल्पेन द्विकर्मकः The root कृ, used as causative governs two objects optionally 'कारयति पाकं पाचकम्। कारयति पाकं पाचकेन' इत्यादि।

कारीषः अग्निः अध्यापयति-(म.भाष्यम्) The fire of the cow-dung cakes makes the pupil study *veda* (in winter) एवम् 'अधिकारः एव पालनं चालयति' 'क्षुत् सेवां कारयति' इत्यादयः।

कार्तिक्याः आग्रहायणी मासे-कार्तिकपूर्णिमायाः मार्गशिरपूर्णिमायाश्च मध्ये अन्तरम्

एको मासः *Āgrahāyaṇī* is at one month from *Kārtikī*. यतः कालनिमानं ततः पञ्चमी कालात् सप्तमी च भवति The point from which the time is measured is used in पञ्चमी and the word indicative of time is used in सप्तमी। 'शुक्लप्रतिपदः अमावास्या मासे' इत्यादि।

कार्मणम्-वाचं (वार्तादिकं) श्रुत्वा क्रियमाणं कर्म The work done (action taken) on hearing the message. (कौ.2104)

कार्मान्तिकः-कर्मान्तानाम् अध्यक्षः Director of factories.

कार्मिकः-यः कर्म करोति A works man (अर्थशास्त्रम्)

कार्यः-अवरः अधिकारी A subordinate officer.

कार्यशब्दिकः- 'कार्यः शब्दः' इति य आह He who says 'make noise' or one who says word is not eternal.

कार्वटिक } **खार्वटिक** } वि.a द्विशतग्रामाणां प्रधानस्थानम् Head quarters of 200 villages.

कार्षापणिक-वि. a कर्षापणेन क्रीतम् Bought for one कर्षापण (a coin) एवं रौप्यिकम्, पौण्डिकम्, डालरिकम् इत्यादि।

कालदौरात्म्यम्-कालस्य वैपरीत्यम्, दुष्टत्वम् Cruelty of time (क्षेमे)

कालधर्मः -मरणम् Death.

कालप्रहर्ता-उचिते काले शत्रूणामाक्रान्ता One who strikes at appropriate time (पं.तं.पृ.120)

कालविपर्ययः-कालातिपातः Delay

कालाहारः-कालस्य वृथा यापनम् (क्षेमे) Spending away the time. Waste of time.

कालिकम्-प्रकृष्टः दीर्घः कालः अस्य Prolonged activity which takes long time.

काली-(A) कालवर्णा स्त्री A black woman

काला-(B) क्रूरा A woman of cruel nature (कौ.500)

काल्माषिकम्-कल्माषे साधुः Fit for, or skilful in, variegated colour.

काल्यम्-कालः प्राप्तः अस्य That for which time has come.

कावचिकम् -कवचधारिणां समूहः A group of armoured men.

काव्यहेवाकिन्-काव्यरचनासक्तः Highly interested in composing poems (क्षेमे)

काव्यव्यसनी-काव्यरचनायां पठने वा नितरामासक्तः One who is addicted to compose or read poetry (पद्प्राभृतकम्)

काष्ठकर्म-दारुणि क्रियमाणं तक्षणादिकम् Wood work (भा.ना.च.पृ.142)

किं राजा-कुत्सितः राजा A bad king

किं सखा -कुत्सितः सखा A bad friend

किं कर्तव्यताविमूढः-किं वा कर्तव्यमिति निर्णेतुम् अशक्तः One who is perplexed about what to do (काद.पृ.73)

किंकाम्यति -किम् आत्मनः इच्छति What does he want for himself.

किंकृतम्-कुतः कारणात् कृतम् ? Done by what reason? 'किं कृतेयमुत्सारणा?' (भा.ना.च.पृ.3)

किंतराम् } **किंतमाम्** } किं वा अधिकतरम् ? किं वा अधिकतमम् ? What more important ? What the most important? किंतमां नृप आह; किं तमाम् ? जिज्ञासित-बहुविशेषतया प्रष्टव्यस्य प्रकर्षादेव प्रश्नः (प्र.स.1921)

किंगौः -कुत्सितः गौः Bad bull

किण्वीय } वि.a किण्वाय (मादकद्रव्याय)
किण्व्य } उपयुक्तम् That which causes fermentation in the manufacture of spirit.

किं तर्हि-तथा न चेत् किमन्यत् ? Why then, what then ?

किं नः छिन्नम्-अस्माकं किमपि न अपहास्यते What do we lose ?

किं (प्र.द्वि.) निमित्तं वसति ? केन निमित्तेन वसति ? कस्मै निमित्ताय वसति ? कस्मात् निमित्तात् वसति ? कस्य निमित्तस्य वसति । कस्मिन् निमित्ते वसति ? -See 'कः हेतुः वसति ।'

तत् (प्र.द्वि.) निमित्तं वसति । तेन निमित्तेन वसति । तस्मै निमित्ताय वसति । तस्मात् निमित्तात् वसति । तस्य निमित्तस्य वसति । तस्मिन् निमित्ते वसति ।-See 'कः हेतुः वसति'

किमिति-कुतो हेतोः Why?

किमुत-कथनस्य आवश्यकता का ? विना कथनं ज्ञायते इत्यर्थः Where is the question? Where is the need to mention ? 'प्राकृतोऽपि पुमान् नावमन्तव्यः किमुत राजा' (ग.र.म.पृ.7)

किं पचानः-कदर्थः । दरिद्रः Miser. Poor

किं बहुना?-अधिकतया कथनं नावश्यकम् Why telling in so many words. "In short". 'किं बहुना भाषितेन ?' (भा.ना.च.पृ.156)

किरते-(1) हर्षप्रकटनम् (2) जीविका (3) स्थानकरणम् इत्यर्थेषु कृधातोः आत्मनेपदं भवति 'कॄ' to throw takes A.P. in the sense of throwing something (1) on account of joy (2) for the sake of gleaning the food particles and (3) getting a place to rest (1) अपस्किरते वृषो हृष्टः (2) अपस्किरते कुक्कुटो भक्षार्थी (3) अपस्किरते श्वा आश्रयार्थी (कौ.2687)

किल-(1) आत्मना अदृष्टस्य अन्यैः उक्तस्य विषयस्य अनुवादं सूचयति It is added to a sentence to indicate that what is said by somebody is being reported. 'भर्तृदारक ! उत्तिष्ठोत्तिष्ठ । भर्तृदारिका भणति उत्तिष्ठ किल । भा.ना.च.पृ.145) (2) पूर्ववृत्तकथादिकथनेऽपि उपयुज्यते It is used while narrating the stories etc. दशरथो नाम राजा किल बभूव

किलाकिलः-ला-आनन्दसूचकध्वनिः A sound expressing joy or pleasure.

किंवृत्ताः-वार्ताहरचारादयः Servants like messengers and spies etc. (प.तं.पृ.6)

कुक्षिपरिवर्तः-अग्निमान्द्यम् Up set of the stomach 'अधन्यस्य मम को किलानाम् अक्षिपरिवर्त इव कुक्षिपरिवर्तः संवृत्तः' (भा.ना.च.21)

कुक्षिंभरिः-स्वकुक्षिमात्रं यः बिभर्ति । स्वार्थैकमात्रपरः 'One who fills his belly'. Selfish.

कुञ्जरं दन्तयोः हन्ति-दन्तार्थं गजं व्यापादयति He kills the elephant for the sake of its tusks क्रियाप्रयोजन (फल) वाचकं पदं सप्तम्यां स्यात् यदि तत् फलं कर्मवाचकेन सह संयोगसमवायाभ्यामन्यतरेण संबन्धेन संबध्यते । The फल for which an action is done is used in सप्तमी provided the फल is connected with the object of the action either by संयोग संबन्ध or समवायसम्बन्ध

Here the *phala* of the action is the tusks which are connected with the elephant, the कर्म of killing, connected by *Samavāya Sambandha* एवम् - 'ग्रैवेयके बालिकाम् आस्कन्दते' 'सुवर्णे पेटिकां भिनत्ति चोरः' इत्यादयः।

कुटीकुटम्-कुट्यश्च कुटानि च तेषां समाहारः कुटीकुटम् Small and big cottages द्वन्द्वे एकवचनम् एव। (प्र.स.2317)

कुटीयति-कुट्यामिव आचरति Feels as though he stays in a hut 'कुटीयति प्रासादे' while living in a mansion he feels as though he dwells in a hut.

कुटुम्बिनी-कुटुम्बानां समूहः Group of families.

कुड्यच्छायम्, **कुड्यच्छाया** } छायान्तः तत्पुरुषः वा क्लीबे सा छाया एकस्यैव चेत्। 'छाया' at the end of तत्पुरुष, when it is the shadow of one object only, is optionally used in नपुंसकलिङ्ग (कौ.828)

कुण्डदासः, **दासकुण्डः** } जारजः दासः Slave, born of illicit connections. पदपौर्वापर्ये अनियमः Order of words optional (प्र.स.2200)

कुण्डलिनी-कुण्डलानां समूहः A heap of earrings.

कुण्डी-(A) दग्धा अथवा दग्धव्या Anything that is burnt or to be burnt (कौ.500)

कुण्डा-(B) पात्रम् A vessel.

कुतूहलविमर्दकारिन्-कुतूहलं यः अपनयति That which kills the interest or eagerness 'अलमनेन परिषत्कुतूहलविमर्दकारिणा परिश्रमेण' (मृ.शक.I)

कुन्दुमकृताः (पशवः)-संघरूपेण एकत्र स्थापिताः पशवः Cattle collected into a group. (प्र.स.2152)

कुप्य-(A) वि.a सुवर्णरजतभिन्नं धनम् Wealth other than gold and silver. Forest produce

गोप्य-(B) वि.a रहसि रक्षणीयम् That which is to be protected in a secret place (कौ.2865)

कुप्योपजीविन् - आरण्यधनादिपर्यवेक्षकः Superintendent of forest produce.

कुब्जाकिरातम्-कुब्जाश्च किराताश्च तेषां समाहारः The hump-backed and the dwarf. (समाहारद्वन्द्वे नपुंसकैकवचनम्) (प्र.स.2317)

कुब्जवामनम्-See above 'कुब्जाकिरातम्'

कुब्रह्मः, कुब्रह्मन्-कुत्सितः ब्राह्मणः A bad *brāhmaṇa* (कौ.806)

कुमारायते-कुमारीव आचरति Behaves like a young girl.

'पञ्चाशद्वर्षदेशीया सा कुमारायतेऽङ्गना।
स च सप्ततिवर्षीयः प्रयत्नेन कुमारति॥'

कुमारीतल्लजः-जकः (पुं) सुन्दरी कुमारी Beautiful girl (ग.र.म.155)

कुमारीपुत्रकः-यथा कुमारीपुत्रः कश्चित् सभायां प्रविशन् लज्जते तथाऽन्योऽपि एवंविधः सः कुमारीपुत्रकः One who is hesitant to move about in respectable circles (like the son of an unmarried girl) (ग.र.म. पृ.225)

कुमारीश्वशुरकः-यस्य पुत्रः कुमार्या सह दृष्टः सः कुमारीश्वशुरः। यथा पुत्रदोषेण स लज्जते तथा अन्योऽपि लज्जमानः कुमारीश्वशुरकः One who feels shy like a man whose son was seen with an unmarried girl. (ग.र.म. 225)

कुमार्यैदाक्षाः-कुमार्यर्थं ये दाक्षप्रणीतं शास्त्रम् अधीयते ते Those who study the *Śāstra* of दक्ष just for the sake of girls (brides)

कुम्भदासी-(1)भोजनप्रिया दासी A maid interested in gulping pots of food but not in work (2) कुट्टनी A loud procuress (used as an abuse) 'हन्त कुम्भदास्या वृत्तान्तं तत्रभवते निवेदयामि' (भा.ना.च.पृ.121)

कुरुकुरुक्षेत्रम्-कुरवश्च कुरुक्षेत्रं च तेषां समाहारः कुरुकुरुक्षेत्रम् The country of *Kuru* and *Kurukṣetra*. See गङ्गाशोणम् (प्र.स.2313)

कुरून् स्वपिति-कुरुदेशे निद्राति He sleeps in the country called *Kuru*. अकर्मकधातुभिः योगे देशः कालः अध्वा च कर्मसंज्ञकः भवति When an intransitive root is used the country (place), time and the way to be covered by journey which are अधिकरण and so are to be used in सप्तमी are treated as कर्मन् and so are used in द्वितीया। Here कुरु is the name of a country and so it is used in द्वितीया because स्वपिति is intransitive 'आन्ध्रान् वसति' इत्यादयः।

कुलनीवी-कुटुम्बधनम् Family property

कुलपतिः-

'मुनीनां दशसाहस्रं योऽन्नदानादिपोषणात्।
अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः॥'

One who teaches ten thousand scholars providing with food etc. is *Kulapati*.

कुल्यावापः-यत्र कुल्यासाहाय्येन कृषिः क्रियते The place where cultivation is done with the help of canals.

कुशकाशम् / **कुशकाशाः** } कुशाश्च काशाश्च *Kuśa* grass and *Kāśa* grass तृणवाचकपदानां द्वन्द्वः वा एकवद्भवति। द्वन्द्वः with words denoting varities of grass (तृण) is optionally used in singular number 'दूर्वामुञ्जम्, दूर्वामुञ्जाः इत्यादयः। (प्र.स.2318क्त)

कुशलकलितः-कुशल इति कलितः Recognised to be skillful (प्र.स.2153)

कुशाग्रबुद्धिः-'कुशाग्रसदृशबुद्धिः'. सूक्ष्मबुद्धिः Having a penetrating intellect sharp, shrewd.

कुशाग्रीया-कुशाग्रसदृशी Like the end of *Kuśa* blade very sharp.

कुसुमैः केशान् उपस्कुरुते-कुसुमैः केशान् शोभायुक्तान् करोति Decorates the hair with flowers.

कूटकेशवत्-वि.a कृत्रिमकेशधारिन् Wearing a wig.

कूटकुचकञ्चुकम्-कृत्रिमस्तनकञ्चुकम् A bodice containing falsies (false breasts) (क्षेमे)

कूटसंकेताः-कृत्रिमवञ्चकचिह्नानि Secret signals.

कूपकच्छपः-कूपस्थकच्छपवत् लोकज्ञानविहीनः He who does not know the world, like a tortoise in a well (कौ.7 25) एवम् - कूपमण्डूकः, कुम्भमण्डूकः इत्यादयः।

कूप्यम्-कूपाय हितम् Useful for (digging) well.

कूलङ्कषा (नदी)-कूलं कषतीति-पूर्णप्रवाहा नदी The river which fully touches the banks.

कूलमुद्रुजः-कूलम् उद्रुजति पीडयति वृषभादिः प्रवाहो वा That which strikes, against the

bank of a river (ox etc or flow of water).

कूलमुद्वहः-कूलम् उद्धरन् उत्क्रम्य प्रवहन् वा जलप्रवाहः That which overflows the banks of the river.

कृच्छ्रात् मुक्तः
कृच्छ्रेण मुक्तः } कष्टेन मुक्तः He was released with difficulty. कृच्छ्रशब्दात् पञ्चमी तृतीया वा। 'कृच्छ्र' governs either पञ्चमी or तृतीया। See स्तोकान्मुक्तः (अलुक्समासः)

कृच्छ्रात् लब्धः-Got with difficulty. See. 'स्तोकान्मुक्तः'। अलुक्समासः. (प्र.स.2117)

अनुकरोति भगवतो नारायणस्य-(काद.10) 'अनु' पूर्वेण कृधातुना योगे विकल्पेन षष्ठी तृतीया वा प्रयुज्यते। 'कृ' with 'अनु' governs optionally षष्ठी or द्वितीया।

कृच्छ्रायते-(1) पापं चिकीर्षति, अनुभवति Has wicked designs (2) कष्टम् Suffers pain.

कृतक्षण-वि.a कस्मैचित् कार्याय दत्तसमयः One who has given time for something

कृतपूर्वीकटम्-पूर्वं यः कटं कृतवान् सः One who had earlier made a mat. 'पीतपूर्वी पयः' 'भुक्तपूर्वी ओदनम्' इत्यादयः। (कौ.864)

कृतप्रवेशः-अन्तः गन्तुम् अनुज्ञा यस्य अस्ति सः One who has permission for admission.

कृतबुद्धिः-बुद्धिमान् Learned. Educated. wise

कृतमतिः-दृढनिश्चयः Firm. Resolute

कृतयति-कृतम् उपकारं गृह्णाति Accepts help done by others.

कृतलक्षणः-गुणैः प्रसिद्धः Well-known by good qualities

कृतविद्यः-सम्यक् कृतविद्याभ्यासः One who has studied well. Educated person.

कृतसङ्केत-वि.a संभूय गन्तव्यम् इति, अथवा अमुष्मिन् काले देशे वा मिलितव्यमिति पूर्वमेव कृतनिर्णयः Having preplanned to come together or to meet in one place. 'अद्य कृतसङ्केतानीव अस्माकं सर्वसंकटानि' (भा.न.च.पृ.174)

कृतहस्तः-वि.a कर्मसु कुशलः Skillful in work. Man with trained hand.

कृताकृतम्-कृतं च तत् अकृतं च। अर्धसमापितं कर्म Half-done (प्र.स.2154)

कृतात्मन्-निगृहीतमनाः One who has controlled himself.

कृतान्नम्-संसिद्धम् अन्नम् Ready food.

कृतापकृतम्-इष्टानिष्टत्वात् एकमेव सम्यक् कृतं च अपकृतं च Not properly done. Half-heartedly done. प्र.स.2154

कृतावस्थ-वि.a इदमेवं भवेत् इति निश्चिततया उक्तम् Guaranteed.

कृतास्त्रः-अस्त्रप्रयोगकुशलः One who has mastered the art of weapons

कृती धर्मे-धर्मं कृतवान् One who had performed *Dharma* (सप्तमी)

कृत्यकरः-धनवस्तुवाहनादि संरक्षणकरः An administrator of property etc.

कृत्वाचिन्ता-केवलं वादार्थं कञ्चन विषयम् अभ्युपगम्य विचारः Consideration of some hypothetical issue just for the sake of argument.

कृन्तविचक्षणा } 'कृन्धि हे विचक्षण' इति
कृन्धिविचक्षणा } 'कृन्धि विचक्षणम्' इति वा यस्यां क्रियायाम् (प्र.स.2166) The act where it is said "Oh! skillful man roll it or roll it skillfully. 'कृन्धि (वेष्टय) विशिष्टं चक्षणं (भक्षणं) इति यस्यां क्रियायाम् आह The

act where it is said "collect the food" 'कृन्धि विक्षीणीहि' इति यस्यां सा . . . कार्पासविषया क्रिया' (ग.र.म.पृ.161) The act where it is said roll and clean the cotton.

कृन्तविचक्षणा -'कृन्त (छिन्धि) विचक्षण इति यस्यां क्रियायाम् कृन्तविचक्षणा The act where it is said "Oh! skillful man, cut it".

कृपणायते-आत्मनः कृपणं (दैन्यं) जानाति Feels his own piteable condition

कृपायते-कृपां करोति Shows kindness. Becomes kind.

कृष्टपच्याः-(A) कृष्टे (क्षेत्रे) स्वयमेव ये पच्यन्ते ते Those which ripen by themselves in a ploughed land.

कृष्टपाक्याः-(B) कृष्टे पक्तव्याः Those which are to be made ripe in the ploughed land.

कृष्णभूमः-कृष्णा भूमिः यस्य सः That which has black ground कृष्ण-उदक्-पाण्डु-संख्यापूर्वः भूमिशब्दः बहुव्रीहौ अकारान्तः भवति। भूमि changes भूम when it is preceded by the words कृष्ण, उदक्, पाण्डु and the words denoting number in a *Bahuvrīhi* compound. (कौ.943)

कृष्णरूप्य / **कृष्णचर** } वि.a कृष्णस्य भूतपूर्वो गौः The bull which earlier belonged to कृष्ण

Suffixes 'रूप्य' and चरट् to the word ending षष्ठी in the sense of it was like that earlier (भूतपूर्व) 'षष्ठ्या रूप्य च' (कौ.2000) एवं-'कुबेरस्य भूतपूर्वा कुबेररूप्या अथवा कुबेरचरी लङ्का' (प्र.स.1916)

कृष्णश्चेत् भुङ्क्ते त्वं गाश्चारय-If *Kṛṣṇa* takes his food you look after the cows. विध्यर्थकस्य (लोडादेः) उपलक्षकतया (यदा सा क्रिया भवति तदा इत्यर्थे) प्रयुक्तस्य धातोः विकल्पेन लडपि भवति (लुट् लृटोः स्थाने) when ordering etc. (लोडर्थ) is involved the adjacent root is used in लट् optionally instead of लुट् or लृट्। पक्षे 'कृष्णः चेत् भोक्ता (अथवा भोक्ष्यति) त्वं गाश्चारय'। एवं-पिता चेत् बहिः गच्छति त्वं गृहे एव तिष्ठ' इत्यादयः। (कौ.2787)

कृष्णं दर्शको याति-कृष्णं द्रष्टुं याति He is going for seeing *Kṛṣṇa* क्रियार्थायां क्रियायां द्योत्यायां तुमुन् प्रत्ययस्य स्थाने 'ण्वुल्' (अक) प्रत्ययोऽपि वा प्रयुज्यते। अत्र गमनक्रियायाः प्रयोजनं दर्शनम्। 'ण्वुल्' (अक) is added to the roots when one action is intended for another action, instead of 'तुमुन्' प्रत्यय, which also is added in the same sense. Here the action of going is intended for the action of seeing. 'युधिष्ठिरं याजकः याति', 'शिष्यान् पाठकः याति', 'धनम् आर्जकः विदेशं गच्छति' इत्यादयः। 'रात्रौ याति बहिश्चोरः परेषां हारको धनम्' 'वित्तं संचायको याति दिवायं निपुणो वणिक्'

कृष्णः अतिदेवान्-कृष्णः देवेभ्यः अधिकः अथवा देवानां पूज्यः *Kṛṣṇa* is greater than the Gods or *Kṛṣṇa* is to be respected by Gods. पूजायाम् अतिक्रमणे (अतिशये) च 'अति' इत्यव्ययेन योगे द्वितीया स्यात्। 'अति' in the sense of 'being greater' or to be respected' governs द्वितीया। 'अतिपरिषत् सभ्यान् मन्त्री' इत्यादयः।

कृष्णायते-कृष्ण इव आचरति Behaves like *Kṛṣṇa* एवम् 'पण्डितायते', 'बालायते' इत्यादयः।

कृष्णाय राध्यति } कृष्णविषये पृष्टो गर्गः
कृष्णाय ईक्षते } शुभाशुभं पर्यालोचयति । When questioned *Garga*, the priest, thinking of (weighing) the good and bad aspects, connected with *Kṛṣṇa*. 'राध्' 'ईक्ष्' धात्वोः प्रयोगे, यस्य विषये केनापि प्रश्नः कृतः सः चतुर्थ्यां प्रयुज्यते When the root 'राध्' or 'ईक्ष्' is used the person about whom question is put earlier is used in चतुर्थी । 'भिषक् रुग्णाय राध्यति' । 'न्यायवादी चोराय ईक्षते' इत्यादयः ।

कृष्णीकृतम्-अकृष्णं कृष्णं कृतम् That which was not black was blackened एवं - 'मन्दीकृतम्' 'शुक्लीकृतम्' इत्यादि । (कौ.2117-18)

केशग्राहं युध्येते } केशेषु गृहीत्वा युद्धं
केशेषु गृहीत्वा युध्येते } कुरुतः They are fighting holding each other by tuft of hair.

सप्तम्यन्ते तृतीयान्ते वा उपपदे सन्निकर्षे द्योत्ये धातोः णमुल् (अम्) भवति । When proximity is indicated the root gets णमुल् (अम्) optionally when सप्तम्यन्त or तृतीयान्त is used as उपपद । (कौ.3371) 'पादग्राहं क्रीडतः' 'अधरस्पर्शं चुम्बति' इत्यादयः ।

केशचूडः-केशसंघातः चूडा यस्य सः केशचूडः. One who has lock of hair as his head-ornament. 'संघात' in 'केशसंघातचूड' is optionally dropped मध्यमपदलोपी बहुव्रीहिः (कौ.830) एवं 'पुष्पचूडा' (पुष्पमालाचूडा) इत्यादयः ।

केशपक्षः, केशपाशः, केशहस्तः-सुन्दरकेशानां समूहः Lock of hair

केशरञ्जनम्-रागेण केशरञ्जनम् Colouring of hair (क्षेमे)

केशाकेशि-अव्य.Ind. केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं केशाकेशि 'Hair to hair'. fighting by pulling each other's hair (कौ.846)

केवामी(ली)कृत्य-हिंसित्वा Having killed (ग.र.म.139)

कैदारक } वि.a केदाराणां समूहः
कैदार्य } A multitude of corn fields.

कैशिका } केशानां समूहः Lock of hair.
कैश्यम् }

केशकः-केशेषु प्रसितः, केशरचनातत्परः One who is interested in the decoration of the hair.

कोषपानम्-धनापहरणम् Swindling of money

कौक्षेयकः-छुरिका A dagger

कौटतक्षः-(स्व)कुट्यां भवः तक्षा । स्वतन्त्रः तक्षा A carpenter who can live in his own house being independent (not being a common worker for the whole village) (कौ.797)

कौटिल्यसारः-स्वभावतः नितरां कुटिलः Essentially crocked (by nature)

कौटेयः-कुट्यां जातः अथवा भवः Born or living in a hut.

कौतस्कुतः-कुतः कुतः आगतः From which different places has (he) come ? (ग.र.म.पृ.44) 'कस्कः कौतस्कुत इति नगर्यां पर्यवेक्ष्यताम् । सर्वोऽप्यदृष्टपूर्वोऽत्र कौतस्कुत्या परीक्ष्यताम्' ॥

कौतस्कुती-कुतः कुतः आगतः इति प्रश्नः Enquiring where from you have come'. 'where from he has come'. etc. (ग.र.म.पृ.43)

कौतुकमङ्गलम्-विवाहाद्युत्सवात् पूर्वं क्रियमाणं

मङ्गलकर्म An auspicious function performed to mark the beginning of ceremonies like marriages etc.

कौतुकागारः-गारम्-गृहम्-केलिगृहम् Pleasure house.

कौपीनम्-पापम् (कूपपतनमर्हतीति कौपीनम्) sin.

कौमारभृत्यः-शिशुपोषणे निपुणः One who is skillful in bringing up children. Paediatrician (अर्थ)

कौलटिनेयः }
कौलटेयः } कुलटायाः अपत्यम् पुमान् A bastard.
कौलटेरः }

कौलीनम् - लोकापवादः Scandal, evil report

कौलेयकः-श्वा A dog.

कौलमाषी-कुलमाषाः प्रायेण अन्नम् अस्याम् Region in which that in which a grain कुलमाष is the main food (staple food) (कौ.864)

कौसल्यामातृ (पुं)-कौसल्यापुत्रः (कौसल्या माता यस्य सः कौसल्यामाता) One having *Kausalyā* as his mother (son of *Kausalyā*) एवं 'सुमित्रामाता' इत्यादयः। 'सुमित्रामातः। अस्मद्राज्यभ्रंशः तव उद्वेगं जनयति!' (भा.ना.च.पृ.260)

क्रमते-(1) अप्रतिबन्धे (2) उत्साहे (3) विस्तृतौ च अर्थे उपपराभ्यां योगे, ताभ्याम् अयोगे वा क्रमधातुः आत्मनेपदी The root 'क्रम' takes A.P. in the following senses (1) अप्रतिबन्ध- Absense of obstruction गणिते क्रमते तस्य बुद्धिः His mind goes into (understands) Mathematics without any obstruction (2) उत्साहः Enthusiasm अध्ययनाय क्रमते Shows enthusiasm for studies. (3) विस्तृतिः spreading क्रमन्ते अस्मिन् शास्त्राणि। स्फीतानि भवन्ति *Śāstras* spread here only in the above senses उप and परा can be added optionally to the root क्रम्। If any other उपसर्ग is added the root takes P.P. even in the above senses. एष्वर्थेष्वेव क्रमधातुः उप-पराभ्यां युज्यते। अर्थान्तरेषु परस्मैपदित्वमेव (कौ.27 12)

क्रमाभिविनीत-वि.a क्रमेण विश्वासपात्रीभूतः One who has slowly and gradually won the confidence.

क्रयविक्रयिकः-क्रयविक्रयनियमानां वेत्ता He who knows the rules of sales and purchases.

क्रयाक्रयिका-महाल्परूपः क्रयः Purchase on large scale and small scale. (प्र.स.2154)

क्रशयति-कृशं करोति Makes week

क्रियाकारः-नूत्नतया क्रियायाम् आयुक्तः। अन्यार्थं क्रियां यः करोति सः A beginner worker. An agent. Tyro - a fresh student (अर्थशास्त्रम्)

क्रियाद्वेषिन्-कार्यविघातकः साक्षी A hostile witness

क्रियावादिन्-A plaintiff complaint

क्रियासमभिहारः-पौनःपुन्यं भृशार्थश्च Too much and again. 'क्रियासमभिहारेण विराध्यन्तं क्षमेत कः?' (शिशु.II)

क्रीतानुशयः-क्रीतस्य वस्तुनः विक्रेत्रे प्रत्यर्पणम् Returning a thing purchase to the seller.

क्रूरम् अभिक्रुध्यति } Is angry with the
क्रूरम् अभिद्रुह्यति } cruel person

Harms the cruel person. उपसर्गसहिताभ्यां

'क्रुध' 'द्रुह' धातुभ्यां सह द्वितीयान्तं प्रयुज्यते, न पुनः चतुर्थ्यन्तम् The roots 'क्रुध्' and 'द्रुह्' with any उपसर्ग govern द्वितीया but not चतुर्थी। See 'हरये क्रुध्यति'।

क्रियावान्-क्रियायाम् उद्युक्तः Engaged in any practical work. 'यस्तु क्रियावान् पुरुषः स विद्वान्'।

क्रेयम् -(A) क्रेतुं योग्यम् That which may be purchased but not offered for sale.

क्रय्यम्-(B) क्रयाय आपणे प्रसारितम् That which is offered for sale. (कौ.66)

क्रोधमूर्छितः-क्रोधाविष्टः Full of anger. Overcome with anger.

क्रोशम् आस्ते-क्रोशपरिमिते मार्गे आस्ते He stays or camps in the road of one क्रोश (two miles) See 'कुरून् स्वपिति'।

क्रोशं कुटिला नदी-क्रोशपरिमिते मार्गे सर्वत्रापि नदी कुटिला The river is in curved flow through out the distance of one क्रोश। अध्ववाचकाः शब्दाः अत्यन्तसंयोगे द्वितीयायां प्रयुज्यन्ते Words denoting measurement of distance are used in द्वितीया when it is meant something is there or is happening throughout the road of that distance 'शकटः क्रोशं शिलाशकलाघातेन शब्दं करोति' इत्यादयः।

क्रौञ्चबन्धं बद्धः-क्रौञ्चपक्षिबन्धनसदृशः बन्धविशेषः क्रौञ्चः। तद्रूपेण बद्धः Tied in the method of क्रौञ्चबन्ध The way in which क्रौञ्च bird is tied is called क्रौञ्च. Tied in that method. एवम् - मयूरबन्धं बद्धः। वराहबन्धं बद्धः। चोरबन्धं बद्धः। अट्टालिकाबन्धं बद्धः. इत्यादि। (अट्टालिका बन्ध=A base or foundation in architecture) (कौ.3363)

क्रौशशतिकः-(1) क्रोशशतं गच्छति One who covers the distance of hundred *kośas* (2) क्रोशशतात् अभिगमनम् अर्हतिभिक्षुः An ascetic who deserved to be approached (to receive him) from a distance of hundred क्रोशs.

क्लिष्टाक्लिशितेन-क्लिष्टेन अक्लिष्टेन च With strain and without strain. 'suffering and non-suffering'. क्लिष्टाक्लिष्टेन वर्तते He lives not with complete suffering or with its complete absence. (प्र.स.2154)

क्लीबते / **क्लीबायते** } क्लीब इव आचरति। भीरु भवति। Behaves like an impotentent man. Becomes timid.

क्लेशक्षमः-क्लेशं सोढुं तस्मादपगन्तुं च समर्थः। One who can withstand difficulties overcomes problems (चरकसंहिता विधानस्थान VIII)

क. . . क-निरन्तरयोः वाक्ययोः प्रयुक्तः अयं शब्दः असंभाव्यतां, भेदातिशयादिकं च सूचयति? When repeated in coordinate sentences imply "great distance", "incongrity" 'क सूर्यप्रभवो वंशः क चाल्पविषया मतिः' (रघु.I.2) 'क राजा हृदय प्रमाथिनी क च ते विश्वसनीयमायुधम्' (मालविका.III.2)

क्षणिकोदारः-क्षणमात्रम् उदारः Noble or generous for a moment (क्षेमे.)

क्षणः गृहीतः-समयः दत्तः। अनुज्ञा दत्ता। निमन्त्रणादिकम् अङ्गीकृतम् Time is given or allotted. Invitation is accepted (अभि.शा.II)

क्षत्रियभीरुः-भीरुः क्षत्रियः A timid person of warrior class (ग.र.म.पृ.156)

क्षमं ग्रहीतुम्-निरोद्धुं युक्तम् It is proper to hold back 'शरणाज्ज्वलितेन दह्यमानं न हि निश्चिक्रमिषुः क्षमं ग्रहीतुम्' (बुद्धश्च V. 37 VII.41)

क्षय्यम् -A क्षेतुं शक्यम् That which can be destroyed

क्षेयम् -B क्षेतुं योग्यम् That which ought to be destroyed.

क्षर्य वि.a-क्षराय हितम् Useful to *Kṣara* (body or cloth etc.).

क्षीण / **क्षित** } वि.a आक्रोशे दैन्ये च विकल्पेन रूपम् Reduced. Deplated. One of these forms are optionally used when abusing some one or when indicating pitiable condition. (निन्दायाम्) क्षीणायुर्भव, क्षितायुर्भव। (दैन्ये) क्षीणोऽयं तपस्वी, क्षितो वा।

क्षित-वि.a पूर्वोक्तार्थभिन्नेऽर्थे । क्षिता कृष्णेन दैत्याः *Daityas* are destroyed by कृष्ण (कौ.3081.प्र.स.546, 547)

क्षीरस्यति-क्षीरमात्मन अतीव लालसतया इच्छति Longs very much for milk.

क्षुत्क्षामकण्ठः-क्षुधाक्षामकण्ठः One whose throat has become dry on account of hunger (प.तं.पृ.18)

क्षुण्णमनाः-पश्चात्तापपीडितः Penitent, Repentent.

क्षुब्ध-वि.a A (1) मन्थनदण्डः Churing rod (2) द्रवद्रव्यसंपृक्ताः सक्तवः Corn gruel.

क्षुभित-वि.a (B) जनितक्षोभः जातक्षोभो वा Agitated (कौ.3048)

क्षेत्रियः - क्षेत्रान्तरे, शरीरान्तरे चिकित्स्यः व्याधिः A disease which can be cured only in the next body (next birth).

क्षेमंकर / **क्षेमकार** } क्षेमं यः करोति Beneficial

क्षैरेयी-क्षीरेण संस्कृता Dressed in milk

क्षोदक्षम-वि.a परीक्ष्यापि यः साधुरिति निर्णेतुं शक्यः Capable of standing the test, scrutiny or investigation.

खञ्जकुक्कुरः; कुक्कुरखञ्जः-lame dog. पदपौर्वापर्ये अनियमः Order of words is optional (प.स.2200)

खट्वाप्लुतः / **खट्वारूढः** } 'पूज्यानां समक्षं खट्वायामुपविष्टः' जाल्मः Low man without modesty.

खरकुटी-नापितस्य मुण्डनशाला । तत्सदृश्यपि खरकुटी Hair cutting saloon (ग.र.म.पृ.227)

खरणसः - खरस्य नासिकेव नासिका यस्य सः

खरणाः - One who has a donkey's nose. खरस्य नासिकेव नासिका यस्य सः (कौ.856)

खर्यम्-खरेभ्यः हितम् Fit for the donkeys. 'विवाहे खर्यमाहारं किं पचानोऽददादयम्'।

खल्वाटबिल्वीयः-खल्वाटशिरसि बिल्वपतनवत् आकस्मिकः उभयवस्तुसंयोगः। Accidental contact of two things like the *Bilva* fruit on the head of bald headed man. (ग.र.म.238)

खलतिभिषक्; भिषक्खलतिः-खल्वाटः भिषक् Bald headed doctor पदक्रमे अनियमः Order of words optional (प्र.सं.2200)

खलिनी; खल्या-खलानां समूहः Multitude of thrasting floors or of rogues.

खलु उक्त्वा-न वक्तव्यम् Should not say निषेधार्थकेन 'खलु' इत्यव्ययेन क्त्वान्तं प्रयुज्यते। 'खलु' in prohibitive sense governs in-

declinable participle (क्तान्त) निर्धारितेऽर्थे लेखेन खलूक्त्वा खलु वाचिकम् (शिशु.II.70)

खलेबुसम्-अव्य.Ind. खले बुसम् अस्त्यत्र काले इति स कालः खलेबुसम् The time when chaft is in the thrashing ground (प्र.स.2084)

खलेयवम्-अव्य. Ind. खले यवाः अस्मिन् काले स कालः The time when the *yavas* are in the thrashing ground. (प्र.स.2084)

खल्वाटकर्परः-केशविहीनः शिरःकपालः Bald head (क्षेमे)

खादतमोदता-खादत मोदध्वम् इति सततं यत्राभिधीयते "Eat drink, be mercy"- the place where it is always said like this.

खादतवमता-'खादतोदरंपूरं ततः वमत' इति सततं यत्रोच्यते सा खादतवमता The act where it is said eat to the fill and vomit.

खादताचमता-खादत ततः आचमत (पिबत) इति यत्र सततम् उच्यते सा The act of saying constantly eat and drink.

खादाचामा-खादत आचाम्यत इति यस्यां क्रियायाम् । The act where it is said 'eat and drink.' 'खादाचामायां को नाम कस्य न सहायः' (ग.र.म.163)

खारीक-वि.a यत्र खार्याः धान्यस्य वापः क्रियते The field in which the grain of one *Khāri* is to be sown.

खार्यम्-खार्या क्रीतम् Bought for one *Khārī* (a measure of rain etc.)

खुरणसः; खुरणाः-खुर इव नासिका यस्य One whose nose is like the hoof of horse.

खेशयः, **खशयः** (अलुक्समासः) आकाशे यः शेते सः That which spreads in the sky. Words ending in consonant or in 'अ' retain their locative termination optionally when the *samāsa* ends with शय, वास and वासिन् । हलन्तानाम् अकारान्तानां च शब्दानां सप्तम्याः वा अलुक् 'शय-वास-वासि'षु परेषु । (कौ.976)

खोडाश्वः, **अश्वखोडः** खञ्जः अश्वः Domestic horse पदक्रमे अनियमः (प्र.स.2200)

गगनस्थलीकृषिः-'आकाशे कृषिः' । असंभाव्यकार्ययत्नः Farming in the sky, an impossible act.

गङ्गाशोणम्-गङ्गा च शोणश्च अनयोः समाहारः The river *Gangā* and *śoṇa*. ग्रामवर्जदेशानां नदीनां भिन्नलिङ्गानां द्वन्द्वः एकवत् स्यात् । द्वन्द्व consisting of words of different genders denoting (1) rivers (2) countries and cities is used in singular number. (प्र.स.2313)

गच्छ पुनर्दर्शनाय-अद्य गच्छ । आवयोः पुनः मेलनं भवतु Go, we may meet again. Affectionate way of bidding farewell.

गजता-गजानां समूहः Herd of elephants

गजनिमीलितम्-'परितः के सन्ति इति द्रष्टुमपि अनीहमानस्य गजस्य सावज्ञमिव अर्धनेत्रनिमीलितम्' । अवज्ञा । अनादरः Half looks of an elephant. Sense of carelessness. Indifference. शृण्वन्तोऽपि च गजनिमीलिते नाधीरयन्तः खेदयन्ति हितोपदेशदायिनो गुरून्' (काद.पृ.225)

गञ्जदिविरः-कोशाधिकारी Treasury officer.

गड्डुलशाण्डिल्यः; शाण्डिल्यगड्डुलः-कुब्जः शाण्डिल्यः Hump backed *Śāndilya* पदपौर्वापर्ये अनियमः Order of words is optional (प्र.स.2200)

गणिकः-गणे साधुः Gregarious or sociable person.

गणतिथः-गणपूरकः Forming or completing a group.

गणिती ज्योतिषि-ज्योतिः गणितवान् One who made calculations in astronomy (सप्तमीविभक्तिः)

गण्यः-गणं लब्धा One who is going to collect a group.

गण्डभेददासी-निन्दावचनम् ग्रन्थिभेददासी इतिवत् A rebute meaning theiving woman slave 'गण्डभेददास्याः शीलं जानन्नपि . . . छलितोऽस्मि।' (कौ.2145)

गतगतः } विरहात्, पीड्यमानानामुक्तिः Alas!
गतगता } He had gone. Alas ! She had gone (कौ.2145)

गतप्रत्यागतम्-एककालीनत्वात् एकमेव गतं च प्रत्यागतं च Going and returning immediately (प्र.स.2154)

गतानुगतिकः-विना विचारं यः आचारादिषु अन्यान् अनुसरति A blind imitator 'गतानुगतिको लोकः' (चाणक्यनीतिसूत्रम् 5-103)

गतार्थः; अर्थगतः-गतः अर्थः येन सः One who got the wealth पदयोः क्रमे अनियमः Order of words is optionally changed (प्र.स.2254)

गन्तुम् अर्हसि-त्वं गच्छ Please go तुमुन्नन्तेन सह प्रयुज्यमानः अयं धातुः सादरं नियोगं सूचयति। 'अर्हसि' is used along with तुमुन्नन्त indicating polite way of as King to do something. 'पातुमर्हसि' 'श्रोतुमर्हसि' 'क्षन्तुमर्हसि' इत्यादयः।

गन्धर्वनगरम्-ऐन्द्रजालिकस्य मायया सृष्टं प्रत्यक्षतः दृश्यमानं नगरम् यत् अल्पकालानन्तरम् अन्तर्हितं भवति A city in the sky (which does not really exist) shown by a magician.

गमनप्रणामः-गमनसमये अनुज्ञां ग्रहीतुं प्रणामः Salutation to a superior person at the time of departure (का.पृ.28)

गम्भीरवेदिन्-अविगणिताङ्कुशप्रहारः गजः An elephant who does not care the goad.

गरयति-गुरुम् आचष्टे करोति वा One who tells about *guru* or says that so and so is my *guru* or who makes something heavy.

गल्या-गलानां, कण्ठानां समूहः (many voices) 'सहस्रं जनाः आगताः' 'वादानां सहस्रम्' इति वा अर्थे सहस्रं गल्यायाः आगतम् प्रवर्तते' इत्यादि प्रयोगाः स्युः।

गव्या-गवां समूहः Herd of cows or bulls.

गर्धयते-वञ्चयति cheats वञ्चनार्थकः णिजन्तः गर्धधातुः आत्मनेपदी। गृध् with णिच् (in its causative form) takes A.P. in the sense of cheating. माणवकं गर्धयते। अर्थान्तरे तु 'श्वानं गर्धयति' (लोभयति)

गर्भभर्मण्या-गर्भपोषणम् Nourishing the child in womb.

गर्भदासः-सी आजन्मनः दासः/दासी Born slave (often used as a reproach).

गर्भसंस्था-प्रसूतिभवनम् Maternity hospital

गर्भे तृप्तः-गर्भमात्रेण तृप्तः। अलसः 'Contented in the Womb'.

गर्भे सुहितः-as a child. Indolent.

गर्भे दृप्तः- Lazy (अलुक्समासः निन्दायाम्) गर्भमात्रेण जातपुत्र इव तृप्तः, संतुष्टः, इष्टः satisfied with mere pregnancy as though blessed with a son (प्र.स.2139)

गर्वायते-गर्ववान् भवति Becomes proud

गलहस्तः-निष्कासनार्थं कण्ठे निक्षिप्तः हस्तः Seizing by throat throling.

गवयति-गाम् आचष्टे Says about cow.

गवाविकम्-गावश्च अविकाश्च एषां समाहारः Cows and sheep द्वन्द्वे एकवचने एव । (प्र.स.2317)

गवाश्वम्-गावश्च अश्वाश्च तेषां समाहारः Cows and horses समाहारद्वन्द्वे एव (प्र.स.2317)

गाविनी-गवां समूहः Herd of cows.

गवैडकम्-गावश्च एडकाश्च एतेषां समाहारः गवैडकम् Cows and sheep द्वन्द्वे एकवचन एव। (प्र.स.2317)

गव्यम्-(A) गोभ्यः हितम् Proper or fit for the cattle (B) गोः (1) निमित्तम् (2) संयोगः (3) उत्पातो वा गव्यः-गव्यम् । That which is, the cause for (acquiring) a cow (2) or connected with the cow (3) or a bad omen connected with the cow (कौ.17 04)

गव्यति-गाम् आत्मन इच्छति Wants a cow or bull for himself.

गर्गान् शतं दण्डयति -He imposes fine of hundred (Rupees) on *gargas* दण्ड् धातुः द्विकर्मकः. The root दण्ड् and its synonims govern two objects.

गहनायते-पापं चिकीर्षति Wants to sinful acts.

गां जानीते-He knows (recognises) the bull. उपसर्गरहितः ज्ञाधातुः आत्मनेपद्यपि भवति। √ज्ञा without उपसर्ग may be used in *ātmanepadī* also.

गां दोग्धिपयः-He draws milk from the cow दुह धातुः तत्समानार्थकाश्च द्विकर्मकाः The root दुह् and its synonims govern two objects.

गाणनिक्यम्-आदाय व्ययादि गणाना Accounts, Budget.

गाणिक्यम्-गणिकानां समूहः A group of the courtesans.

गात्रस्नायं वर्षति-गात्रं यथा स्नाति तथा वर्षति It rains as to make the body drenched. गात्रपुरुषशब्दार्थाभ्यां परस्य स्नाधातोः णमुल् (अम्) The root स्ना preceeded by गात्र or पुरुष gets णमुल् (अम्) when the measurement of the rain is indicated (प्र.स.पृ.129)

गार्भिणम्-गर्भिणीनां समूहः A group of pregnant women.

गीर्यति- गिरम् आत्मन इच्छति He wants speaking capacity for himself गीर्यत्यतितरां मित्र तपस्वी किंकरोत्वयम् ।
सेवतां वासरक्षेत्रे भक्त्या ज्ञानसरस्वतीम् ॥

गुडापूपिका (पौर्णमासी)-गुडापूपाः प्रायेण अन्नमस्याम् The *pūrṇamāsī* day when the cakes prepared with jaggery are mainly taken as food.

गुरुसमुत्थ-वि.a अधिकतया अधिकप्रयत्नेन वा समुत्थापितम् Mobilised with great effort or on a large scale.

गुलुगुधाकृत्य-पीडयित्वा । क्रीडित्वा । Having troubled. Having played. (ग.र.म.पृ.136)

गुह्यसधर्मन्-रहस्यं ज्ञातुं योग्यः One who can share the secret.

गूढाजीव-वि.a रहोमार्गेण धनस्यार्जकः One who has secret income 'सर्वेऽपि राजपुरुषा गूढाजीवा न संशयः'

गृहप्रवेशनीयम्-गृहप्रवेशनं प्रयोजनम् अस्य That which is intended to be taken inside the house.

गृहरन्ध्रम्-कुटुम्बकलहादिकम् Family discussions

गृहस्य उपरि
गृहस्य उपरिष्टात् } Above the house 'उपरि' 'उपरिष्टात्' इत्यव्ययाभ्यां योगे षष्ठी The indiclinables 'उपरि' and 'उपरिष्टात्' govern षष्ठी । 'वृक्षस्योपरि' इत्यादि।

गृहस्य पुरः
गृहस्य पुरस्तात् } In front of the house 'पुरः' 'पुरस्तात्' इत्यव्ययाभ्यां योगे षष्ठी The indeclinables 'पुरः' 'पुरस्तात्' govern षष्ठी 'तव पुरः' इत्यादयः।

गृहीती विद्यासु-विद्याः गृहीतवान् Who has received *vidyās* (सप्तमी)

गृह्यकाः-पञ्जरादिबन्धनेन परतन्त्रीकृताः शुकादयः Domestic/domesticated animals (parrots etc.) 'ऋणग्रहणेनायं तव गृह्यकः संवृत्तः' । (कौ.2870)

गृह्या-नगरसमीपस्थः ग्रामः A village near the city.

गेयः-(1) गायतीति गेयः A singer. (2) गातुं योग्यः Which is to be sung. (कौ.2894)

गेहानुप्रपातं गच्छति-गेहम् अनुप्रपत्य अथवा गेहं गेहम् अनुप्रपत्य गच्छति Dashing into the house again and again or dashing into every house 'तीर्थानुप्रपातं भ्रमति भ्रमरः' इत्यादयः। (कौ.3378)

गेहानुप्रपादं गच्छति-गेहम् अनुप्रपद्य अनुप्रपद्य अथवा गेहं गेहम् अनुप्रपद्य गच्छति Reaching house again and again or reaching every house 'तीर्थानुप्रपादं स्नाति' इत्यादयः। (कौ.3378)

गेहानुप्रवेशं चरति-गेहम् अनुप्रविश्य अनुप्रविश्य अथवा गेहं गेहम् अनुप्रविश्य चरति He enters the house again and again or entering every house 'वनानुप्रवेशम् अटति' इत्यादयः। (कौ.3378)

गेहानुस्कन्दं गच्छति-गेहम् अनुस्कन्द्य अथवा गेहं गेहम् अनुस्कन्द्य गच्छति Occupy in the house again and again or occupying every house he is going 'योधानुस्कन्दम् आक्रमते' इत्यादयः। (कौ.3378)

गेहेक्ष्वेडिन्-स्वगृहे एव उच्चैः वदन्। भीरुः। Bellowing at home only. A coward.

गेहेदाहिन्-'गृहे प्रतापदर्शकः' भीरुः Sharp at home only. A coward.

गेहे दृप्तः-'गेह एव दर्पप्रदर्शकः' भीरुः Showing pride in the house only.

गेहे धृष्टः-'गृहे एव धार्ष्ट्यप्रदर्शकः भीरुः Bold at home. A coward.

गेहे नर्दिन्-'गृहे एव उच्चैः नदन्' भीरुः Shouting defience at home only - a coward. A dung. hillcock.

गेहे मेहिन्-'गृहे एव मेहमानः' अलसः 'Making water at home'. Indolent.

गेहे मेलिन्-'गेहे एव मिलनशीलः' 'बहिर्गन्तुं भीतः 'One who meets people only in his house'. Hesitent to go out.

गेहे विजिती-गेहे एव स्थित्वा इदमुचितम्, इदमनुचितम् इति विचिनोति न सभामध्ये कार्ये वा One who talks about propriety or impropriety etc; sitting in his house only but not in the assembly of the learned or when a problem arises.

गेहेशूरः-स्वगृहमध्य एव शौर्यप्रदर्शकः A house hero. A carpet knight. Boasting coward.

गेहेविचिती-स्वगृहे एव विजेता Victorious at home.

गेहेव्याडः-'गृहे आरण्यजन्तुः' । अधीरः । विकत्थनः । A braggadocio, Braggart, Boaster.

गोगोष्ठम्-गवां स्थानम् Place of the cows. 'गोष्ठ' इति प्रत्ययः अजादिशब्देभ्योऽपि प्रयोक्तुं शक्यते । 'गोष्ठ' is a suffix which may be added to words 'अज' 'गज' etc. 'अजगोष्ठम्' 'गजगोष्ठम्' इत्यादि। (कौ.1830 वा)

गोणा-A काचन स्त्री Name of a woman

गोणी-B गोणनिर्मिता भस्त्रा । आवपनम् A bag

गोघ्नः-गां हन्ति अस्मै इति गोघ्नः (अतिथिः) One for whom cow or bull is slaughtered (कौ.3172)

गोता-गवां समूहः A herd of cows or bulls

गोत्रेण गार्ग्यः-अस्य गोत्रं गार्ग्यं गोत्रमित्यर्थः He is गार्ग्य by *gotra* i.e. his *gotra* is गार्ग्यगोत्र । 'नाम्ना दशरथः' इत्यादि ।

गोदोहम् आस्ते-गोदोहकालम् आस्ते इत्यर्थः He stays for the time required for milking a cow. See 'कुरून् स्वपिति'

गोपा-A गवां पालिका स्त्री A woman rearing cows.

गोपी-B गोपस्य भार्या Wife of a cowherd.

गोपी स्मरात् कृष्णाय शपते-स्मरार्ता गोपी उपालम्भेन कृष्णं स्वाशयं बोधयति इत्यर्थः On account of her love गोपी criticises somebody so that *Kṛṣṇa* would know her love with him. शपधातोः प्रयोगे बोधयितुमिष्टः चतुर्थ्यां प्रयुज्यते When the root 'शप्' is used the person whom something is intended to be made known is used in चतुर्थी । 'चोरः भटाय शपते' आत्मनः निर्दोषतां प्रकटयितुम् अन्यं कंचन निन्दतीत्यर्थः। (कौ.572)

गोपोषं पुष्णाति-गोभिः पुष्णाति Nourishes with cows. See 'स्वपोषं पुष्णाति' ।

गोप्रकाण्डम्-(नपुं) उत्तमः गौः Good cow or bull पण्डितप्रकाण्डम् इत्यादि See 'अश्वमतल्लिका' ।

गोमहिषम्-षाः-गावश्च महिषाश्च तेषां समाहारः गोमहिषम्, गोमहिषाः Cows and Buffalos पशुवाचकानां द्वन्द्वः वा एकवद् भवति The *Dvandva* of domestic animals (पशु) is optionally used in singular number (प्र.स.2318)

गोमचर्चिका-(स्त्री) श्रेष्ठः श्रेष्ठा वा गौः A good cow or bull. See 'गोमतल्लिका'

गोमयपायसीयम्-गोजन्यत्वात् गोमयमपि पायसमेव इति वचनवत् अर्थरहितो वादः An absurd argument like the contention of a stupid person that the cow-dung is made of milk, because it comes from the cow. (ग.र.म.239)

गोषु दुह्यमानासु गतः-यदा गावः दुह्यन्ते स्म तदा गतः He went when milk was being drawn from the cows. See note on सतिसप्तमी in the appendix.

गोष्ठे पण्डितः-गोष्ठे एव यः पाण्डित्यं प्रदर्शयति न सभासु 'Wise man in a cow pen'. अस्मिन्नेवार्थे **'गोष्ठेक्ष्वेडिन्'**, **'गोष्ठे पटुः'**, **'गोष्ठे शूरः'** **'गोष्ठे प्रगल्भः'** इत्यपि प्रयोगाः All the above words are used in the sense of braggart, vain, boaster.

गोष्ठश्वः-गोष्ठे श्वा (इव) गोष्ठश्वः। तद्वत् परोपद्रवकर्ता (प्र.स.2349) The dog at the cow pen. A person who threatens others like that dog. (कौ.945)

गोष्पदम्-(1) गवाम् स्थानम् A place of cows (2) गोष्पदप्रमाणम् So much in size as cow's foot print **अगोष्पदम् (अरण्यम्)** गवां निवासाय अनर्हम् Not fit for the cows to live (प्र.स.18)

गोष्पदपूरं } **गोष्पदप्रम्** } वृष्टो देवः। गोष्पदं यथा पूर्यते तथा वृष्टः It rained till the foot step mark of the cow is filled कर्मवाचकोपपदात् पॄ (पूर्)धातोः वर्षप्रमाणे द्योत्ये णमुल् (अम्) स्यात्। पूर इत्यत्र ऊकारश्च वा लुप्यते। 'पूर्' When it is preceded the word denoting कर्मन् gets णमुल् (अम्) at the end when measurement of rain is indicated 'ऊ' in 'पुर्' is optionally dropped 'घटपूरम् अथवा घटप्रं ववर्ष' इत्यादि (कौ.3353)

गोवृन्दारकः-श्रेष्ठः गौः 'God like bull'. A good bull. पूज्यमानं वृन्दारक-वराह-नाग-कुञ्जर-पुङ्गव-वृषभ-व्याघ्र-शार्दूल-हंस-सिंह-ऋषभादिभिः उपमीयते। तद्वाचकैश्च समासः। Men and other beings are compared with वृन्दारक (God) वराह (boar) नाग (Elephant) कुञ्जर (elephant) पुङ्गव (bull) वृषभ (bull) व्याघ्र (tiger) शार्दूल (tiger) हंस (swan) सिंह (lion) ऋषभ (bull) to indicate their superiority/greatness. They are combined with them in a compound.

गौः पूज्या } **गावः पूज्याः** } Cow should be worshipped (All the cows should be worshipped) जातिवाचकः शब्दः एकवचने प्रयुक्तोऽपि विकल्पेन (प्रकरणानुसारं) बहुत्वार्थं बोधयति Any word denoting species (जाति) may be used in singular number to denote all the beings of that species (कौ.817)

गौडिक-वि.a गुडे साधुः Fit for preparing gaggary.

गौणिक-वि.a गुणे साधुः That which can add some good qualities.

गौरपुरुषः } **पुरुषगौरः** } गौरवर्णः पुरुषः White man पदयोः पौर्वापर्ये. अनियमः. Order of words is optional (प्र.स.2200)

गौरुतल्पिकः-गुरुभार्यागामी One who violates teacher's bed.

गौष्ठीनः-गोष्ठे भूतपूर्वः देशः The site of an old cow - Pen.

ग्रन्थिभेदिन्-चोरः A pick pocket.

ग्रामं समया कुल्या प्रवहति-Rivulet is flowing by the side of the village 'समया' इत्यव्ययेन योगे द्वितीया भवति। 'समया' (Ind.) governs द्वितीया

ग्रामं सर्वतः वृक्षाः सन्ति-On all sides of the village there are trees सर्वतः शब्देन योगे द्वितीया भवति। 'सर्वतः' governs द्वितीया

ग्रामं गच्छति } **ग्रामाय गच्छति** } He goes to the village गमनार्थानां धातूनां कर्म द्वितीयायां चतुर्थ्यां वा प्रयुज्यते गमने चेष्टापि यदा भवेत्। यत्र चेष्टा नास्ति 'मनसा हरिं व्रजति' इत्यादौ तत्र केवलं द्वितीयैव When a root the meaning of which involves movement, is used, its object (the place to which one goes) is used either in द्वितीया or चतुर्थी, In sentences like मनसा हरिं व्रजति (He goes to Hari by his mind) this rule

does not apply because there is no movement of the body involved in this going.

ग्रामगणेशः-ग्रामनायकः Leader of the village

ग्रामगृह्या (सेना)-ग्रामबहिर्भूता (सेनादिः) The army camping outside the village. एवं 'नगरगृह्या' 'शरीरगृह्या' इत्यादयः (कौ.2870)

ग्रामतक्षः-सर्वग्रामसाधारणः तक्षा A carpenter who has to serve the whole village. See कौटतक्षः (कौ.797)

ग्रामता-ग्रामाणां समूहः A group of villages

ग्रामनियोगः-ग्रामे अधिकारः Appointment as a village officer.

ग्रामपतिः (स्त्री)- A woman who is a village head.

ग्रामयाजक-जिन्-ग्रामस्थानां सर्वेषां पुरोहितः 'A village priest'. A priest who conducts religious ceremonies for all classes of people and is consequently considered as a degraded *Brāhman*.

ग्रामयात्रा -उत्सवादिषु ग्रामस्थानां सम्मेलनम् Village fair (क्षेमे)

ग्रामस्य अन्तिकम् / **ग्रामस्य अन्तिकात्** / **ग्रामस्य आन्तिकेन** / **ग्रामस्य अन्तिके** — ग्रामसमीपे। ग्रामसमीपस्थे देशे। Near the village. At a place near the village. See 'ग्रामस्य दूरम्' । 'ग्रामस्य समीपम्' इत्यादि।

ग्रामस्य उत्तरतः-ग्रामस्य उत्तरभागे North or in the North to the village 'उत्तरतः' इत्यनेन योगे षष्ठी । उत्तरतः (Ind.) governs षष्ठी।

ग्रामस्य दक्षिणतः-ग्रामस्य दक्षिणे भागे South or in the South to the village 'दक्षिणतः' इत्यनेन योगे षष्ठी।' दक्षिणतः' षष्ठी

ग्रामस्य दूरम् / **ग्रामस्य दूरात्** / **ग्रामस्य दूरेण** / **ग्रामस्य दूरे** — Long distance or at a long distance from the village दूरान्तिकशब्दौ तत्पर्यायाश्च द्वितीयायां, तृतीयायां, पञ्चम्यां, सप्तम्यां वा प्रयुज्यन्ते; प्रातिपदिकार्थमेव बोधयन्ति । कदाचित् अधिकरणार्थेऽपि प्रयुज्यन्ते । प्रक्रियासर्वस्वानुसारम् इमे शब्दाः यथासंभवं सर्वान् विभक्त्यर्थान् बोधयन्ति (1) The words 'दूर' अन्तिक and their synonims take द्वितीया, तृतीया, पञ्चमी or सप्तमी and denote only distance and proximity respectively while विभक्तिप्रत्यय does not convey any meaning (2) In some places these words convey the sense of अधिकरण i.e. at a distance or 'at a distant place' etc. (3) According to *prakriyā sarvasva* they convey the sense of all *vibhaktis* (प्र.स.2629)

ग्रामस्य दूरम् / **ग्रामात् दूरम्** — Away from the village. दूरार्थैः शब्दैः योगे पञ्चमी षष्ठी वा स्यात्। 'दूर' and its synonyms govern either पञ्चमी or षष्ठी

ग्रामात् बहिः-Out side the village 'बहिः' इत्यव्ययेन योगे पञ्चमी स्यात् । बहिः (Ind.) governs पञ्चमी।

ग्रामीण, ग्राम्य-वि.a ग्रामे भवः Living in a village.

ग्रामेयकः-ग्रामे जातः Born in a village

ग्रामेवासः-सी / **ग्रामवासः-सी** — यः ग्रामे वसति Living in a village. See 'खेशयः' (कौ.976) See 'खेशयः'

ग्राम्यधर्मः-मैथुनम् Mating

ग्राम्यधृष्टः-धृष्टः ग्राम्यः An impudent villager (ग.र.म.156)

ग्राहकागमः-वस्तुक्रेतॄणामागमनम् Availability or coming of customers (पं.तं.पृ.5)

ग्रैवेयकः-कण्ठाभरणम् Necklace

ग्रहः-(A)1. ग्रहणम् Catch 2. ज्योतिश्शास्त्र-प्रसिद्धः ग्रहः Planet (कौ.3267)

ग्लहः-(B) द्यूते पणरूपेण यद् गृह्यते।

घटिकास्थानम्-(1) शुल्कस्थानम् A ware house near the tolgate or customers house (2) पाठशाला Place of higher studies

घटिंधयः-यः (जलादिपूर्णां) घटीं पिबति One who drinks a pitcherful (of water of liquor etc.)

घट्टकुटीप्रभातम्-घट्टकुटी (शुल्कस्थान) गमनं वर्जयित्वा मार्गान्तरेण शकटिकया गन्तुं प्रवृत्तः शाकटिकः रात्रौ सर्वतः भ्रामं भ्रामं पुनः प्रभाते घट्टकुटीमेव किल प्राप। तदिदं घट्टकुटी प्रभातमित्युच्यते। One cartman wanted to avoid the tolegate and go to his destination by around about way. After wandering throughout the night he reached same tolegate in the morning. प्रथमम् इदं मास्तु इत्युक्त्वा अन्ततः तस्यैवाङ्गीकारे अयं न्यायः प्रवर्तते - 'तदिदं घट्टकुटी प्रभात मासीत्' इति After resisting a thing at the beginning if one is forced to accept the same thing that is analogous to 'घट्टकुटी प्रभात'।

घनाघनः-हन्तीति घनाघनः One who kills or strikes.

घातकः
वधकः } हन्ता Killer

घुणाक्षरीयम्-घुणो तिकरणात् (दारुणि) कथंचित् निष्पन्नम् अक्षरं घुणाक्षरम्। तदिव यत् अकुशलेन दैवात् निष्पद्यते तत् घुणाक्षरीयम् (ग.र.म.पृ.239) When an insect goes on cutting a piece of wood accidentally a letter may be formed. Anything which happens without doers intelligent work is compared with this letter formation.

घुष्टा (रज्जुः) A -उत्पादिता आयामिता वा रज्जुः Made or lengthened rope.

घुषितं (वाक्यम्)-(B) शब्देन प्रकाशिताभिप्रायं वाक्यम् A sentence used for proclimation.

घृतनिधायं निहितं जलम्-घृतमिव सुरक्षितं जलम् Water that is kept like ghee एतादृशेषु वाक्येषु औपम्यं सूच्यते There is similarity indicated in this construction 'इक्षुभञ्जं बभञ्ज' इक्षुमिव बभञ्ज इत्यर्थः Broke him like a sugar cane. 'अमृतपायम् अपिबत्' अमृतमिव अपिबत्। 'रूप्यकाणि काकिणीक्षेपं क्षिपति' इत्यादयः।

घृतरौढेयाः-घृतार्थं ये रौढेयम् अधीयते Those who study *Rauḍhēya* the works of a writer called *Rauḍha* to get ghee. See 'ओदनपाणिनीयाः' (काशि.6.2.69)

घोरसदृशः-अतीव घोरः Fearful, dreadful

चक्रपथः-शकटगमनार्हः मार्गः Road for vehicles.

चक्रबन्धं बध्नाति-चक्रे बध्नाति Binds on the wheel. Ties to the wheel. सप्तम्यन्तोपपदस्य बन्धधातोः णमुल् (अम्) भवति। स एव धातुः प्रधानक्रियायां प्रयुज्यते।

The root 'बन्ध्' with any word in सप्तमी as *Upapada* (preceeding word) gets णमुल् (अम्) at the end and the same root is used in the main verb वृक्षबन्धं बध्नाति (वृक्षे बध्नाति) । काराबन्धं बध्नाति (कारायां बध्नाति) इत्यादयः ।

चञ्चा-चञ्चासदृशः पुरुषः । क्षेत्रेषु विहगादि भीषणार्थं तृणैः निर्माय स्थापिता पुरुषाकृतिः चञ्चा A man who is like चञ्चा, a straw filled body (kept in fields to frighten the birds), a scare crow.

चञ्चूर्यते-गर्हितं चरति Moves or acts in bad manner.

चतुष्कर्णो मन्त्रः-द्वाभ्यां कृतः मन्त्रः Deliberation in which only two persons participate (to ensure secrecy) (पं.तं.पृ.16)

चपलज्ञातः-चपल इति ज्ञातः Known as fickle minded (प्र.स.2153)

चपलायते-अचपलः चपलः भवति One who was not fickle becomes fickle minded.

चमरीं केशेषु हन्ति-चमरीं केशार्थं हन्ति Kills the *camarī* (an animal of that name) for its hair. 'कुञ्जरं दन्तयोः हन्ति' ।

चयः-समुदायः A heap. अस्मादेव चि धातोः अधोनिर्दिष्टेषु अर्थेषु 'कायः' निष्पद्यते । (1) निवासः Dwelling place. 'काशी निकायः' (2) अग्निचयनकर्ता One who collects *Agni* for sacrifice. 'अग्निकायः' = अग्निचित् (3) शरीरम् Body which is a bundle of bones, blood and skin etc. अस्थिचर्मादीनां समूहः -'कायः' । (4) राशिः A heap गोमयनिकायः (कौ.3213)

चरणलिहः-अतीव दैन्यप्रदर्शकः दाससदृशः Licking the soles of the feet. Slavish. अकारान्तः

चरणौ स्पृशति-पादाभिवन्दनं करोति Touches the feet offering obeisance to a revered person like a teacher.

चराचरः-चरतीति चराचरः One who walks or goes.

चर्मपूरं स्तृणाति-यथा चर्म पूर्यते तथा स्तृणाति He spreads (cloth etc.) as to cover the skin. कर्मवाचके चर्मणि उपपदे पूरधातोः 'णमुल्' 'अम्' भवति The root पूर् gets णमुल् (अम्) when it is preceded by 'चर्मन्' which is कर्मन् । 'चर्मपूरं लिम्पति' इत्यादयः । (कौ.3352)

चर्मायते-चर्म भवति Becomes the skin.

चलहट्टा-या विक्रेयवस्तुजातं वीथीषु नयति A female hawker with a mobile shop (क्षेमे)

चलाचलः-चलतीति चलाचलः That which shakes.

चाक्रिकः-दुष्टैः सह भ्रमन् Moving in bad company (क्षेमे)

चातुर्दशिकः-निषिद्धवेदाध्ययनायां चतुर्दश्यां अधीते सः One who learns *Veda* on *caturdaśī* day on which the study of *Veda* is prohibited.

चातुर्वैद्यम्-चतस्रः विद्याः Four *Vidyas*.

चात्वारिंशत्कः-चत्वारिंशता क्रीतः Bought for forty

चात्वारिंशानि-See त्रैंशानि ।

चान्द्रायणिक-वि.a चान्द्रायणं वर्तयति One who observes the vow called चान्द्रायण

चारकीणम्-चरकाय हितम् Good for the wanderer.

चारित्रेण अतिगृह्यते } चारित्रेण अन्यानतिक्रम्य
चारित्रतः अतिगृह्यते } वर्तते He overcomes all by his good conduct.

चार्वाघाटः, चार्वाघातः-शूरः A brave person.

चिकिनः-See अवटीट

चित्ताकृत्य; चित्ताकृत्वा-Having thought over. (ग.र.म.140)

चित्रीयते-विस्मयते अथवा विस्मापयते Wonders. Makes others wonder.

चिन्ताकृत्य, चिन्ताकृत्वा-See चित्ताकृत्य.

चिपिट-See अवटीट

चिरं खलु कालः देवदत्तस्य ग्रामं गतस्य-It was long ago that *Devadatta* had gone to the village. 'चिरं खलु कालः सुप्तस्य शिशोः इत्यादि।'

चूताशोकम्-काः-चूताश्च अशोकाश्च तेषां समाहारः चूताशोकम् । अथवा चूताश्च अशोकाश्च चूताशोकाः *Cūta* trees and *Aśoka* trees. वृक्षविशेषवाचकानां द्वन्द्वः विकल्पेन एकवचने प्रयुज्यते । द्वन्द्व with the names of the trees is optionally used in singular number एवं 'तालनारिकेलम्' 'तालनारिकेलाः' इत्यादयः । (प्र.स.2318)

चूर्णपेषं पिनष्टि-चूर्णीकृतं पुनः पिनष्टि Pounds the powder again and again. A redundant action. See 'शुष्कपेषं पिनष्टि'

चेक्रियः-यः पुनः पुनः क्रीणाति One who goes on buying.

चेलक्नोपं वृष्टो देवः-यथा वर्षेण वस्त्रं सिच्यते तथा अवर्षत् God rained so as to make the cloth wet कर्मवाचके द्वितीयान्ते वस्त्रार्थे उपपदे 'क्नुप्' धातोः 'णमुल्' (अम्) भवति वर्षपरिमाणे द्योत्ये The root क्नु preceded by words denoting cloth which is कर्मन्, gets 'णमुल्' (अम्) at the end when measurement of the rain is indicated 'वसनक्नोपम्' वस्त्रक्नोपम्' इत्यादयः (कौ.3354)

चैत्रात् पूर्वः फाल्गुनः-*Phālguna* is earlier than (precedes) *Caitra* कालावधिवाचकानां पूर्वादीनां शब्दानां प्रयोगे अवधिभूतस्य पञ्चमी Words like 'पूर्व' which denote the limit of time govern पञ्चमी 'फाल्गुनात् परः चैत्रः' इत्यादयः ।

चोरङ्कारम् आक्रोशति-चोर इति वदन् आक्रोशति Calling thief, he is abusing कर्मणि उपपदे, निन्दायां द्योत्यायां कृञ् धातोः 'णमुल्' (अम् स्यात्) when कर्मन् is उपपद (Preceeding word) and abuse is implied the root 'कृ' gets णमुल् (अम्)। 'एवं बधिरङ्कारम् उच्चैः आह्वयति' । 'अन्धङ्कारं दर्शयति' इत्याद्याः

चोर चोर घातयिष्यामि त्वाम्-Oh! thief, Oh! thief. I shall get you killed चोरं प्रति अवाच्यवादोऽयम् । एतादृशे अवाच्यवादे द्विरुक्तिः This is something which should not be uttered. In such places the word is repeated.

चोरात् त्रायते-He protects from the thief रक्षणार्थानां शब्दानां प्रयोगे यस्मात् कस्यचित् रक्षणं तस्य पञ्चमी Words meaning 'to protect' govern पञ्चमी । जलतैलादिभ्यः पुस्तकं रक्षणीयम् इत्यादयः ।

चोरात् बिभेति-Is afraid of the thief भयार्थकानां शब्दानां प्रयोगे भयहेतोः पञ्चमी Words denoting fear govern पञ्चमी । 'व्याघ्रात् त्रस्यति' इत्यादयः ।

चौडम्-चूडा प्रयोजनमस्य That which has चूडा arrangement of hair as its reason or result (intended for चूडा) तस्य प्रातः बहिः गमनं चौडम् The purpose of his going out in the morning is to have a hair cut. 'चौडीया कर्तरी' इत्यादयः।

चौरस्य कुलम्-(अलुक्समासः) A family of thieves. निन्दायां षष्ठ्याः अलुक् When निन्दा is implied षष्ठी प्रत्यय is retained in the *Samāsa*. 'घातकानां वंशः इत्यादयः। (कौ. 979) सत्यकथने न अलुक्।

छत्रव्यंसकः-'छत्रवत् व्यंसकः छत्रव्यंसकः'। छत्रं हि प्रसारितं सत् सुन्दराकारमाभाति। स्वयं तु स्थातुम् अशक्तम् अन्येन प्रयत्नवता धार्यते। एवमन्योऽपि यः सदा परावष्टम्भबलस्थितिः सुन्दराकारोऽपि स एवमुच्यते' (ग.र.म.पृ.157) "One who is the cause of trouble like an umbrella". The umbrella, though looking beautiful when it is spread cannot stand by itself and has to be taken in hand with effort. Similarly any one who, though with good personality, has to be supported by others is called छत्रव्यंसक।

छत्रोपानहम्-छत्रं च उपानहौ च तेषां समाहारः छत्रोपानहम् Umbrella and the shoes. See 'वाक्त्वचम्' (कौ.930)

छन्दस्यम्-छन्दसा (इच्छया) कृतम् Done by one's desire or will.

छात्रव्यंसकः-छात्रवत् व्यंसकः। छात्रो हि यथा लब्धभिक्षामात्रवृत्तिकृतसन्तोषः निर्व्यापारतया कार्यतः व्यंसकः तद्वत् अन्योऽपि एवमुच्यते। छात्ररूपेण वञ्चको वा लोकस्य छात्रव्यंसकः। "One who is the source of trouble like a student:. Just as a student who is content with merely getting begged food (with stay in hostel) does not do any other useful work and so is the source of trouble, any other man who is like that student is called 'छात्रव्यंसक'। Or a person who deceives people calling himself a student (like the so called students of to-day who collect scholarships with the help of false certificates is called छात्रव्यंसक Any other man who deceives people by similar methods is called that name (ग.र.म.पृ.157) छात्र इव प्रह्वः धूर्तः छात्र व्यंसकः One who is obedient like a student but is a cheat (प्र.स.2166)

छात्रं शास्त्रम् अध्यापयति-Makes the student study *Śāstra* (teaches *Śāstra* to the student) शब्दकर्मकाः धातवः णिजन्ताः द्विकर्मका भवन्ति The roots which have *Śabda* as their कर्मन् govern two objects when they are used as causative. 'पुत्रं पाठं पाठयति' इत्यादयः।

छादिषेयाणि (तृणानि)-छदिः तृणपटलः। तृणपटलार्थम् उद्दिष्टानि तृणानि The grass which is meant for the ceiling of the huts, made of grass.

छिद्रान्वेषिन्-अन्येषां दौर्बल्यं यः अन्विष्यति Looking out for the faults or flaws. Seeking the week points of others 'छिद्रानुजीविन्' 'छिद्रानुसारिन्' इत्यादयः।

छिन्नशीर्षः / **शीर्षच्छिन्नः** } छिन्नं शीर्षं यस्य सः One whose head is cut. पदयोः क्रमे अनियमः The order of words is changed optionally (प्र.स.2354)

छेदिकः (वेतसः)-छेदं नित्यम् अर्हति The cane bush or creeper which should very often (regularly) be cut.

जगाम यथागतम्-स्वस्थानं प्रतिनिवृत्तः "Went back by the same way as he had come". Returned.

जङ्घाबलं प्रादर्शयत्-पलायितः Took to his heels.

जञ्जप्यते-गर्हितं जपति Mutters in a bad manner.

जञ्जभ्यते -गर्हितं जम्भते Bends the limbs or the body in a bad manner.

जटाभिः तापसः-जटाज्ञाप्यतापसत्ववान् He is recognised as an ascetic on account of his matted hair 'वेषेण राजभटः' 'कण्ठलम्बिनालिकया भिषक्' इत्यादयः।

जटाभिः लापयते-जटाभिः हेतुना पूजामधिगच्छति He wins respect on account of his matted hair 'भस्मराङ्कवेण लापयते' इत्यादि। (कौ. 2592)

जटिलो विस्मापयते-जटाधारी पुरुषः (जनान्) विस्मितान् करोति The man with matted hair causes wonder यदा प्रयोजकहेतुः (पुरुषादिः) स्वयमेव विस्मयं जनयति तदा 'विस्मापयते' इति, आत्मनेपदे एव च प्रयोगः। यथा अत्रोदाहरणे। यदा पुरुषः कस्यचित् साधनस्य प्रदर्शनादिना विस्मयं जनयति तदा 'विस्माययति' इति प्रयोगः। यथा - 'सः महाशिलोत्क्षेपणेन विस्माययति' इत्यादौ। The root 'स्मि' in causative form takes A.P. as 'विस्मापयते' if person himself causes wonder. But if he makes others wonder with some instrument or हेतु it takes P.P. as 'विस्माययति' as in 'सः महाशिलोत्क्षेपणेन विस्माययति' (कौ.2596) 'शूरः विस्मापयते'। 'शूरः शस्त्रेण विस्माययति' इत्यादि। (प्र.स.3265)

जनता-जनानां समूहः The group of people (men)

जनाभिसारः-जनानामेकत्र समावेशः Meeting of the people (क्षेमे)

जन्याः-जनीं वधूं वरगृहं ये प्रापयन्ति Those who bring the bride to the bride groom's place. (कौ.1634)

जपम् अनु प्रावर्षत्-वर्षकारणभूतस्य जपस्य अनन्तरं प्रावर्षत् It rained when the *Japa* (which was the cause) was completed. लक्षणे द्यौत्ये अनुना द्वितीयान्तं प्रयुज्यते। 'अनु' which indicates the time of some occurrance, as a result of some earlier action governs द्वितीया।

जम्पती-जाया च पतिश्च जम्पती Wife and husband.

जय्यम्-A जेतुं शक्यम् Which can be conquered.

जेयम्-B जेतुं योग्यम् Which should be conquered.

जलक्षयलेखा-भूमौ निलीनेन जलेन कृता लेखा The line or mark formed after the water dries or sinks in the ground. 'नववलयिनो वृक्षा मूले जलक्षयलेखया' (भा.ना.च.पृ.294)

जहिजोडः-जोडं जहि इति पुनः पुनः यः आह He who says again and again 'Kill *Joda*' (a man of that name) (कौ.754) एवम् 'जहिरिपुः'। 'जहिपापः' इत्यादयः।

जहिस्तम्बः-'जहि स्तम्बम्' इति यः पुनः पुनराह सः जहिस्तम्बः He who says again and again "Kill the स्तम्ब" (A small insect or plant) (कौ.574)

जाङ्गलपथिकः-अरण्यमार्गेण आनीतः। अरण्यमार्गसंचारी Brought by forest route. One who travels by forest road.

जाड्यात् बद्धः-He was arrested on account of his foolishness हेतुतया प्रोक्तः गुणः पञ्चम्यां प्रयुज्यते When a *Guṇa* (quality) is said to be the cause of something it is used in पञ्चमी । 'विनयात् पूजितः' इत्यादि।

जातदन्तः / **दन्तजातः** } जाताः दन्ताः यस्य सः One whose teeth have appeared पदयोः क्रमे अनियमः Order of words is optional (प्र.स.2254)

जातपुत्रः / **पुत्रजातः** } जातः पुत्रः यस्य सः One who has a son born (blessed with a son) पदयोः क्रमे अनियमः Order of words is optionally changed (प्र.स.पृ.2254)

जातश्मश्रुः / **श्मश्रुजातः** } जातानि श्मश्रूणि यस्य One with moustaches appeared पदयो क्रमे अनियमः Order of words is optionally changed. (प्र.स.2254)

जातिस्मरः-स्वपूर्वजन्मसंबद्धान् विषयान् यः स्मरति Remembering one's condition in former birth.

जातोक्षः-जातश्चासौ उक्षा च जातोक्षः। अथवा जातः उक्षा यस्य सः A bull which is born or a calf which has grown into bull or one who has a bull which is born (समासस्य अकारान्तत्वम्) (कौ. 945)

जानवादिकः / **जानेवादिकः** / **जानोवादिकः** } जनवादे साधुः One who is good at speaking to the people. (सौ.1654) Orator.

जायाघ्नः ना-हस्तादौ जायाहननसूचक (रेखादि) लक्षणवान् नरः The man who has the sign indicating that he would (kill) lose his wife.

जयति शतं देवदत्तम्-'जि' धातुः द्विकर्मकः He wins hundred from *Devadatta.* 'जि' 'to conquer' governs two objects.

जिज्ञासते-ज्ञातुमिच्छति Wants to know सन् प्रत्ययान्तः ज्ञाधातुः आत्मनेपदे एव प्रयुज्यते । 'जिज्ञासते' is the form of ज्ञा with 'सन्' प्रत्यय (in the sense of इच्छा) It takes A.P. only. (कौ.2731)

जितहस्तः-स्वायत्तहस्तः One who has full control over his hands while treating patients. (च.सं. विधानस्थान.VII).

जित्यः-A (हलिः) बलेन क्रष्टव्यः महान् हलः The plough which is to be drawn with strength.

जेयः-B जेतुं योग्यः That which is to be suppressed or conquered (कौ.2868)

जिह्वा सन्दष्टा-मुखं पिहितम् "Tongue is bitten" meaning 'mouth is shut' प्रायः हस्तेन मुखपिधानादि पूर्वकम् इदम् उच्यते The use of this phrase perhaps involves some gesticulation 'एषा संदष्टा मे जिह्वा' (भा.ना.च.पृ.29)

जीवकः-यस्य चिरजीवनं पित्रादिभिः आशास्यते सः He whose long life is wished by others like father and mother आशीरर्थे 'ण्वुल्' (अक) प्रत्ययः धातुभ्यः । 'अक' is added to the roots in आशीर्वाद । 'अयं शिशुः जीवकः (चिरं जीवतु)' 'अयं नन्दकः (नन्दतु) इत्यादि। (कौ. 2912)

जीवग्राहं गृह्णाति-जीवन्तं (सजीवं) गृह्णाति। He catches him alive. 'ग्रह' with जीव as उपपद takes णमुल् (अम्) at the end and the same root is used as the main root. 'जीव' शब्दे उपपदे ग्रहधातोः 'णमुल्' (अम्); स एव च धातुः प्रधानक्रियायां प्रयुज्यते।

जीवनाशं नश्यति-जीवन्नेव नश्यति। अतर्कितः म्रियते इत्यर्थः Perishes while living. Dies unexpectedly (कौ.3364) See 'जीवन्मरणम्' also.

जीवधनम्-जीवत्पश्वादिरूपं धनम् Property in the form of living creatures. Live stock.

जीवन्मरणम्-जीवत एव मरणम्। मरणसदृशं जीवनम् The life which is as full of suffering as death itself. 'किमनेन जीवन्मरणेन, विसर्जयिष्याम्यात्मानम्' (भा.ना.च.पृ.151)

जीवपतिः, जीवपत्नी - जीवद्भर्तृका स्त्री A woman whose husband is alive.

जीविकाकृत्य-जीविकामिव कृत्वा Having made it as though it is a source of livelihood. (कौ.780)

जेगिल्यते-गर्हितं गिलति Gulps in an awkward manner. (कौ.1632)

ज्यापयति-वृद्धं करोति Makes old 'महान् हि मानसः क्लेशः ज्यापयत्यचिरान्नरम्'।

तक्षायस्कारम्-तक्षाणश्च अयस्काराश्च तेषां समाहारः तक्षायस्कारम् Corpenters and ironsmiths कारूणां शूद्राणां द्वन्द्वः एकवत् स्यात् *Dvandva* consisting of words denoting the *Śūdras* of various professions (artisans) is used in singular number (प्र.स.2316) एवं 'रजकनापितम्' इत्यादयः।

तज्जातः-कस्मैचित् कार्यविशेषाय जातः (उद्दिष्टः)। तत्र सहजनैपुण्यवान् One who is intended or meant for that particular work. Having inherent skill in a work. 'अतक्षा तक्षणोद्युक्तः दारु सर्वं हि भक्षयेत्। हन्यात् कार्यं मन्त्रमूढः तज्जातांस्तेषु योजयेत्'।

तण्डुलान् ओदनं पचति-He cooks ओदन with rice. 'पच' धातुः द्विकर्मकः. The root पच् governs two objects. 'वार्ताकम् उपदंशं पचति, इत्यादि।

तण्डुलीय / **तुण्डुल्य** } वि.a तण्डुलेभ्यः हितम् Good for the rice

ततस्ततः-ततः किं संवृत्तम् ? What next ? केनचिदुक्तानां वार्तानां श्रवणे श्रोत्रा मध्ये मध्ये एवम् उच्यते Generally used while listening to somebody reporting or saying something.

तत्रभवान्-पूज्यः अमुकः 'That respectable man'. An honorific term used while referring to a respectable person in his absence. दूरस्थस्य पूजार्हस्य निर्देशे उपयुज्यते। 'असाधुदर्शी खलु तत्रभवान् काश्यपः' (अ.शा.I)

तत्त्वनिष्ठुरम्-अप्रियं सत्यम् A pungent, unpalatable truth 'व्रजामि चैवाद्य नृपास्तु ते शिवं वचः क्षमेथा मम तत्त्वनिष्ठुरम्' (बु.च.VI69)

तथागतः-तादृश्यां स्थितौ वर्तमानः One who is in such a situation.

तथाहि-इदं युक्तमेव इत्यर्थे प्रयुज्यते Used in the sense of it is but proper 'तथाहि ते शीलमुदारदर्शिने तपस्विनामप्युपदेशतां गतम्' (कु.V.36)

तद्विद्यसंभाषा-समानविद्यैः साकं विषयविमर्शः Discussion with the people of same learning and profession. (च.सं.विमान-स्थान.VIII)

तनुवृष्टिः / **वृष्टितनुः** } अल्पा वृष्टिः A little rain. पदपौर्वापर्ये अनियमः The order of words is optional.

तन्त्रकः (पटः)-तन्त्रात् अचिरादाहृतः पटः। नूतन इत्यर्थः The cloth which has just come from the loom (कौ.861)

तपः तपति-तपः आचरति Performs Penance. Here 'तपति' means performs.

तपस्यति-तपः चरति Performs Penance

तमरहस्यम्-अधिकं रहः Strictly secret, strictly confidential (प्र.स.2355)

तमस्काण्डः-घनं तमः Thick darkness (ग.र.म.पृ.153)

तलस्पर्शिपाण्डित्यम्-शास्त्रगतसर्वरहस्यवेदि गभीरं पाण्डित्यम् Deep scholarship.

ताडघः-(A) ताडनेन यः हन्ति सः मल्लादिः One who kills by striking. Strong person like wrestler.

ताडघातः-(B) One who beats मल्लादन्यः ताडनमात्रकर्ता

तरुणिरूपा-प्रशस्या तरुणी Praise worthy young woman. See सुन्दरितरा

तातपादाः-पूज्यः पिता Respected father. आचार्यपादाः आचार्यचरणाः इत्यादि See अश्वमतल्लिका

तापसापसदः-नीचः तापसः An ascatic of mean nature. (ग.र.म.पृ.156)

तारका-(A) नक्षत्रम् A star

तारिका-(B) तारयित्री That which helps in crossing (Boat etc.)

तावतिकः }
तावत्कः } तावता क्रीतः Which is bought for so much

तिन्दुकज्योतिषीयम्-ज्योतिषि तिन्दुकस्य पतनमिव तिन्दुकज्योतिषीयम्। यादृच्छिकम्। तिन्दुकः शीघ्रप्रज्वलनशीलः तृणविशेषः Accidental like a *Tinduka*-stalk (which catches fire quickly) falling near the fire (ग.र.म.239)

तिमिंगिलः-तिमिंगिलति यः। मत्स्यविशेषः That which devours तिमि, A kind of fish (कौ.1007)

तिमिंगिलगिलः-तिमिंगिलमपि यो गिलति तादृशो महान् मत्स्यविशेषः A big fish which devours तिमिंगिल (कौ.1007)

तिराययति-तिर्यञ्चमाचष्टे करोति वा Who says that it is oblique or horizontal or makes some thing oblique or horizontal.

तिर्यक्कृत्यगतः }
तिर्यक्कारं गतः } समाप्य गतः He went after completing (कौ. 3382)

तिलकटः-तिलानां रजः Dust of the sesame plants or seeds.

तिलंतुदः-तिलानि तुदतीति। तिलघातकः One who crushes sesame seeds. Oil crusher.

तिलतैलम्-तिलानां स्नेहः Oil of sesame 'तिलानाम् इदम्' अथवा 'तिलेभ्यो भवम्' इति तैलशब्दस्य तिलस्नेहः इत्येवार्थः। परन्तु स्नेहान्तरेऽपि तस्य प्रयोगात् 'तैलच्' प्रत्ययम् अङ्गीकृत्य सर्षपतैलम्, 'नालिकेरतैलम्' इत्यादि रूपाण्यपि साध्यन्ते By accepting a suffix तैलच्, forms like 'सर्षपतैलम्' 'नालिकेलतैलम्' are justified.

तिलेभ्यः प्रतियच्छति माषान्-ऋणत्वेन वा अन्यथा वा गृहीतान् तिलान् माषरूपेण प्रत्यर्पयति Gives blackgram for the sesame (in lue of the sesame which were taken. प्रतिदानार्थेन प्रतिना योगे पञ्चमी। प्रति in the sense of 'giving back' governs पञ्चमी। Here पञ्चमी is used instead द्वितीया

(बालमनोरमा-600) 'चुम्बनात् प्रतियच्छति आश्लेषम्' इत्यादयः।

तिल्यम्-तिलेभ्यो हितम् Good for the sesame

तिष्ठते-परस्मैपदी स्थाधातुः (1) भावाविष्करणम् (2) निर्णेतृत्वेन कस्यचित् आश्रयणम् इत्यर्थयोः आत्मनेपदी भवति। 'स्था' which is originally pp. takes A.P. (1) in the sense of expressing the mind and (2) Depending upon somebody. (1) गोपी कृष्णाय तिष्ठते - गोपी स्वाशयं प्रकाशयति (2) 'संशय्य कर्णादिषु तिष्ठते यः' (किरा.I) Depends on कर्ण and others for advice.

तिष्ठद्गु-अव्य Ind. तिष्ठन्ति गावः अस्मिन् काले Evening time when the cows stand for milking.

तीर्थध्वाङ्क्षः-तीर्थे ध्वाङ्क्ष इव। (निन्दायाम्) लुब्धः चपलस्वभावश्च A crow at a sacred bathing place. A very greedy or unsteady person.

तुन्दपरिमृजः-A यः हस्ततलेन तुन्दं परिमृजन् किमपि अकुर्वाणः तिष्ठति। अलसः A well fed and idle person who sits brazing his belly.

तुन्दपरिमार्जः-B केनापि कारणेन यः तुन्दं परिमृजति One who purses his hand on his belly for some reason (Not lazy) 'सर्वे तुन्दपरिमृजा आचार्याः कालघस्मराः। छात्राश्चोदनकाणादा वीथीं वीथीं चरन्त्यमी' 'भक्तावसथसंतुष्टाश्छात्रा नगरवायसाः।'

तुल्यम्-तुलया संमितम् Weighed with balance. Equal.

तूष्णीकटः-तूष्णीं यः तिष्ठति Silent, तूष्णीं शीलः Reticent.

तूष्णींदण्डः-रहसि दण्डः Secret punishment. Murder (अर्थशास्त्रम्)

तूष्णींभूय, तूष्णीं भावम्, तूष्णींभूत्वा-मौनी भूत्वा Having become silent. (कौ.3385)

तृणजम्भा-तृणं भक्ष्यं यस्य, अथवा तृणसदृशा दन्ताः यस्य One eats grass or who has grass like teeth. See 'सुजम्भा'(कौ.864)

तृणच्छन्नकूपः-तृणच्छन्नकूपवत् अज्ञातानर्थहेतुः One who is highly dangerous like a well covered by grass. 'क इदानी-मन्यो धर्मकञ्चुकप्रवेशिनः तृणच्छन्नकूपोपमस्य तवानुकृतिं प्रतिपत्स्यते' (अभि.शा.V)

तृण्या-तृणानां समूहः Heap of grass

तृतीयसारः-सारवत्सु तृतीयः Third best (अर्थशास्त्रम्)

तृतीयाकरोति-क्षेत्रे तृतीयं कर्षणं करोति Ploughs the field for the third time.

तृतीया प्रकृतिः-नपुंसकः An impotent person.

तृतीयक-वि.a तृतीयः वृद्ध्यादिः यस्मिन् यस्मै वा दीयते That in which or to whom the third is given as वृद्धि (interest) etc. See पञ्चकः

तृपायते-अतृपत् तृपत् भवति। (तृपत्=चन्द्रः, समुद्रश्च) Becomes the moon or ocean 'तृपायते जलम्' (कौ.2667)

तृप्रायते-आत्मनः तृप्रं (दुःखं तृप्तिं वा) जानाति Knows his own misery or satisfaction.

तृप्रालुः-तृप्रं दुःखं पुरोडाशं वा न सहते One who cannot bear sorrow or does not like पुरोडाश

तृणोलपम्-तृणानि च उलपानि च तेषां समाहारः The grass and *Ulapa*-grass. द्वन्द्वे एकवद्भावः। Singular in द्वन्द्व (प्र.स.2717)

तेन राजा सहायवान्-सः राज्ञः सहायः A King has a helper in him. 'रामः लक्ष्मणेन भ्रातृमान्'। 'रामेण दशरथः पुत्रवान्'। 'तेन अहं मित्रवान्' इत्यादयः।

तैर्थम्-तीर्थे दीयते कार्यं वा That which is given or is to be performed in a sacred place.

तैलकम्-अल्पं तैलम् A little bit of oil.

तैलम्पाता-तिलानां पातः यस्यां सा तैलम्पाता स्वधा Offering to manes in which sesame seeds are dropped along with water.

तैलीनम् / **तिल्यम्** } तिलानां क्षेत्रम् The field of sesame.

तौर्यत्रिकम्-नृत्य-गीत-वाद्यानां त्रयम् The union of song, dance and instrumental music. Triple symphony.

त्रितय-वि.a त्रयः अवयवाः अस्य Having three parts.

त्रिचतुराः-त्रयो वा चत्वारो वा Three or four (अकारान्तकम्)

त्रिनिष्कम् / **त्रैनिष्कम्** } त्रिभिः निष्कैः क्रीतम् Bought for three *Niṣkas*

त्रिंशम् (शतम् अथवा सहस्रम्)- त्रिंशत् अधिका यस्मिन्। त्रिंशदधिकशतं त्रिंशदधिकसहस्रं वा Hundred or thousand (*Māṣas* or *Suvarṇas*) which contain thirty more (*Māṣas* or *Suvarṇas*) It means one hundred and thirty or one thousand and thirty. 'शतं देह्यद्य मासान्ते त्रिंशं ते दास्यते मया। श्रुत्वा वार्धुषिकः प्राह मार्वालो नेति नेत्यसौ'।

त्रिंशकः-त्रिंशता क्रीतः Bought for thirty

त्रिशणम्, त्रिशाण्यम्, त्रैशाण्यम्-त्रिभिः शणैः क्रीतम् Bought for three शणs (a weight four *Māṣas*)

त्र्यायुषम्-त्रयाणाम् आयुषां समाहारः त्र्यायुषम् Three life-spans (कौ.945) (अकारान्तत्वम्)

त्वक्स्रजम्-त्वक् च स्रजश्च तासां समाहारः त्वक्स्रजम् Skin and garlands. See 'वाक्त्वचम्। रोगिभिषजम्' इत्यादयः। (कौ.730)

त्वचयति-त्वचं गृह्णाति Takes the skin. 'त्वचयति व्रणः' Wound is healing and skin is forming (प्र.स.525)

त्वचिसारः-वंशः "Strong in the Bark" A bamboo. अलुक्समास.

त्वद्यति-त्वामात्मन इच्छति Wants you for himself or herself.

त्वद्यति-त्वमिव आचरति Behaves like you.

त्वापयति-त्वाम् आचष्टे Talks about you

दक्षिणतारम् / **दक्षिणतीरम्** } Southern Bank. See उत्तरतारम्

दक्षिणपूर्वा-दक्षिणस्याश्च पूर्वस्याश्च दिशोरन्तरालम् South east (कौ.845)

दक्षिणा ग्रामात्-ग्रामावधिकायां दक्षिणस्यां दिशि To the South of the village. 'आच्' प्रत्ययान्तानां 'दक्षिणा' इत्यादिपदानां योगे पञ्चमी Indeclinables like दक्षिणा formed by adding 'आच्' (आ) govern पञ्चमी

दक्षिणापथः-दक्षिणभारतम् South India.

दक्षिणाहि ग्रामात्-ग्रामावधिकायां दक्षिणस्यां दिशि दूरे To the South of the Village at a distance. आहिप्रत्ययसहितैः 'दक्षिणाहि' इत्यादिभिः अव्ययैः योगे पञ्चमी Words like दक्षिणाहि (Ind.) formed by adding 'आहि' govern पञ्चमी

दक्षिणीयः } दक्षिणामर्हति One who
दक्षिण्यः } has to receive *Dakṣiṇā* (fee)

दक्षिणेन ग्रामम् } 'दक्षिणेन' इति एनबन्तेन
दक्षिणेन ग्रामस्य } अव्ययेन योगे द्वितीया षष्ठी वा भवति। 'दक्षिणेन' (Ind.) द्वितीया or षष्ठी।

दक्षिणेर्मा (मृगः)-दक्षिणे ईर्मं, व्रणं, व्याधेन कृतं यस्य सः मृगः (The dear) on whose right side wound was caused by a hunter पूर्वोक्तेऽर्थे 'ईर्मं शब्दः नकारान्तः भवति। 'ईर्म' becomes ईर्मन्' in the above sense (कौ.865)

दण्डपाणिः-पाणौ दण्डः यस्य सः One who holds a stick in his hand. प्रहरणार्थेभ्यः शब्देभ्यः सप्तम्यन्तं बहुव्रीहौ उत्तरपदं भवति When a word denoting weapon is used the word ending in सप्तमी in बहुव्रीहि becomes the second word. 'चक्रपाणिः' 'शूलपाणिः' 'गदाहस्तः' इत्यादयः। (कौ.900)

दण्डप्रतिकर्ता-दण्डे दातव्यस्य धनस्य स्थाने यः शारीरं कर्म करोति सः अपराधी One who does manual labour in lieu of paying fine.

दण्डादण्डि-दण्डैश्च दण्डैश्च प्रहृत्य इदं युद्धं प्रवृत्तम् The fight where sticks are used to beat each other.

दण्डेन घटः-दण्डेन हेतुना घटः निर्मितः Pot is made with a stick (The potter turns the wheel with a stick) *Hetu* of something is used in तृतीया

दण्डोद्यमः-दण्डदानेन भीषणम् Threatening with punishment.

दण्डोपघातं गाः कालयति } दण्डेन
दण्डेन उपघातं गाः कालयति } उपहतान् गाः कालयति He drives away the bulls beating with a stick तृतीयान्ते (करणे) उपपदे हिंसार्थकधातुभ्यः विकल्पेन 'णमुल्' (अम्) भवति। (ततः समासो वैकल्पिकः) The roots meaning हिंसा (inflicting pain) get 'णमुल्' (अम्) when तृतीयान्त (करण) is used as उपपद। (Compounding is optional) 'खड्गलावं रिपुं मारयति' 'खड्गेन लावं रिपुं मारयति', 'दण्डताडं चोरं प्रद्रावयति' 'दण्डेन ताडं चोरं प्रद्रावयति' इत्याद्याः।

दण्ड्यः द्वादशसुवर्णभारेण-द्वादशभिः सुवर्णभारैः दण्डनीयः। (तस्मात् एतावतः धनस्य बलाद्ग्रहणमेव दण्डः) To be punished by imposing a fine of twelve *Suvarṇa bhāras* (an amount in olden days) एवं 'दण्ड्यः सहस्ररूप्यकैः' 'दण्डनीयः हस्तच्छेदेन', 'दण्डनीयः सर्वस्वहरणेन' इत्यादयः

दत्तहस्त-वि.a कृतसाहाय्यः Having a hand given for support.

दधिघृतम् } दधि च घृतं च Curds and
दधिघृते } ghee व्यञ्जनानां द्वन्द्वः वा एकवद्भवति। The द्वन्द्व of names of condiments is optionally used in singular number. 'एलाजीरकम्' इत्यादि।

दधिस्यति, दध्यस्यति-दधि आत्मन अतीव लालसतया इच्छति Desires curds ardently.

दन्तवीणां वादयन् -शीतबाधया हनुचलनेन अप्रयत्नमेव दन्तघट्टनशब्दं कुर्वन् Make twittering noise of teeth when jaws shiver on account of severe cold. (पं.तं.पृ.83)

दन्तादन्ति-अव्य. Ind. दन्तैः दन्तैश्च दंशित्वा इदं युद्धं प्रवृत्तं दन्तादन्ति Tooth against tooth biting one another.

दन्दश्यते-गर्हितं दशति Bites in a bad manner.

दन्दह्यते-गर्हितं दहति Burns in a bad manner

दर्भपूतीकम्-दर्भाश्च पूतीकाश्च तेषां समाहारः *Darbha* grass and *pūtika* grass. द्वन्द्वे एकवचने एव Only in singular number in *Dvandva* (प्र.स.2317)

दर्शनात् आरभ्य / **दर्शनात् प्रभृति** } From the time of seeing 'आरभ्य' 'प्रभृति' इत्याभ्यां तत्समानार्थकैश्च योगे पञ्चमी Words 'आरभ्य' 'प्रभृति' and their synonims govern पञ्चमी

दर्शनीयः-सुन्दरः Beautiful

दर्शनीयमानी-यः किञ्चित् वस्तु दर्शनीयं मन्यते One who considers something as worth seeing (कौ.2992)

दर्शयते देवं भक्तम् / **दर्शयते देवं भक्तेन** } Makes the devotee see the Lord. णिजन्तः दृशिः आत्मनेपदी भवति, विकल्पेन द्विकर्मकश्च ।'दर्शयते' which is only in *ātmanepadī* governs two objects optionally. एवं - 'दर्शयते बालं चित्रम्', 'दर्शयते बालेन चित्रम्' इत्यादयः।

दवयति-दूरं करोति Keeps away something 'सः दुष्टान् दवयति' He keeps the wicked at a distance. etc.

दशत्-दशपरिमाणम् अस्य Group of ten

दशमी-नवतिवर्षाधिकवयाः वृद्धः One who has crossed ninety years of age.

दशरथस्य तपसः फलं रामः-*Rāma* is the fruit of *Daśaratha's* penace. See Appendix-6.

दशैकादशिकः-दश ऋणतया दत्त्वा एकादश यो गृह्णाति One who lends ten on the undertaking that eleven are to be repaid.

दाण्डा - दण्डः प्रहरणमस्यां क्रीडायां दाण्डा A stick fight.

दाण्डाजिनकः-दाम्भिकः । दम्भार्थं दण्डाजिनधारी "Carrying a staff and hide" (as outward sings of religion) a cheat, hypocrite. Imposter.

दाधिकम्-दध्नि संस्कृतम् Dressed in curds.

दानीयः-(किञ्चित्) दातुं योग्यः A person to whom something is given (A person who deserves *dāna*)

दारक्रिया-विवाहः Marriage

दारगवम्-दाराश्च गावश्च तेषां समाहारः दारगवम् Wife and cows. (कौ.945) (अकारान्तत्वम्)

दार्वाघाटः-A वृक्षे (दारुणि) छिद्रकारी पक्षिविशेषः A bird which makes hole in the wood (in a tree)

दार्वाघातः - दारुछिद्रकारी पक्षिणः अन्यः कोऽपि (A wood cutter other than a bird)

दासस्यकुलम्-(समासः) पृथग्जनानां समुदायः It is used as a compound in the sense of the 'mob' or 'the common people'.

दासानुदासः-दासस्य दासः A slave of a slave. The humblest of the servants. Sometimes used by the speaker as a mark of huminity.

दासीदासम्-दास्यश्च दासाश्च तेषां समाहारः Servant maids and servants or female and male slaves (प्र.स.2317) द्वन्द्वे एकवचने एव Singular only in *Dvandva*.

दासीमाणवकम्-दास्यश्च माणवकाश्च तेषां समाहारः Servant maids and boys द्वन्द्वे एकवचन एव Only singular in *Dvandva* (प्र.स.2317)

दास्याः पुत्रः-(समासः) कुलटापुत्रः Bastard.

Used also as simple abuse. 'दास्याःपुत्रैः मधुकरैः पीडितोऽस्मि' (भा.ना.च.पृ.27)

दास्या संयच्छते कामुकः-That lustful man gives money to the servant maid in order to encourage her in love affair. ('दास्या' is in तृतीया) अशिष्टव्यवहारे दाण्धातोः प्रयोगे चतुर्थ्यर्थे तृतीया भवति When impropriety of an action is implied तृतीया is used in the sense of चतुर्थी when the root 'दा' is used. 'तेन (तस्मै) उत्कोचं संयच्छते' 'ब्राह्मणेन सुरां यच्छति' इत्यादयः।

दिङ्मोहः-दिशां विषये मोहः Confusion about the quarters (directions)

दिदृक्षते-द्रष्टुमिच्छति Wants to see. सन्नन्तः दृश् धातुः आत्मनेपदे एव प्रयुज्यते। The सन्नन्त form of 'दृश्' is used only as *ātmanepadī*. (कौ.2731)

दिवाभूता रात्रिः-रात्रिः गता। दिवा संजातम् The night dawned into a day.

दिशोदण्डः-दिशि दण्डः Punishment in a quarter. (Punishing in a whole direction) (अलुक्) (कौ.979)

दिशोभाक्-दिक्षु पलायमानः One who runs in all directions. Fugitive.

दिशोभाजं कुरु-दूरं निष्कासय Drive away. (पं.तं.पृ.225)

दिवा दीपप्रज्वालनम्-निष्प्रयोजनकार्यारम्भः 'Litting the lamp during the day'. A futile action. (पद्मप्राभृतकम्)

दिव्यति-दिवम् आत्मनः इच्छति Wants heaven for him.

दिष्ट्या-भाग्यवशेन Fortunately. Luckily. Generally used to indicate approval of or rejoicement over something 'दिष्ट्या सुनिक्षिप्त इदानीमार्यपुत्रः' (भा.ना.च.10)

दिष्ट्या वर्धते भवान्-भवन्तम् अभिनन्दामि Congratulations. This is generally uttered by closely associated people when something good happens to somebody.

दीपीयम्, दीप्यम् - दीपाय योग्यं (वेश्म) A house where lamp is to be lit.

दीप्त्यम्-दीप्त्यै हितम् Useful for light. Shining.

दीर्घदर्शिन्-किं भविष्यति इति यः स्वबुद्ध्या जानाति सः Far sighted one having foresight. 'चारित्रधनसंपन्नान् सलज्जान् दीर्घदर्शिनः' (सौ.न.I.46)

दीर्घसूत्रः, दीर्घसूत्री-कार्यनिर्णये विलम्बकरणशीलः One who is slow in taking decisions. (पं.तं.पृ.120)

दुःखाकरोति-पीडयति Causes trouble or suffering (मौ.2135)

दुःखायते-दुःखी भवति। आत्मनः दुःखं जानाति Becomes overcome with misery. Realises his own misery.

दुरध्वः-दुष्टः अध्वा Bad road (प्र.स.2355) (अकारान्त)

दुरनुबन्धम्-अन्ततः दुष्फलं (कार्यम्) An act the consequences of which would not be good.

दुराढ्यंकरः-अनाढ्यः आढ्यः दुःखेन क्रियते The poor man who may be made rich with great difficulty (कौ.3308) (not possible to make rich)

दुराढ्यं भवम्-अनाढ्येन आढ्येन दुःखेन भूयते The condition in which the poor man is made rich with difficulty. Not possible to make rich.

दुर्दिनायते-दुर्दिनं करोति Makes it दुर्दिन। (A cloudy day is दुर्दिन)

दुर्मेधाः-दुष्टा मेधा यस्य सः An evil-minded person. (कौ.862)

दुर्यवनम्-यवनानां व्यृद्धिः Adversity of the *Yavanas*. **दुर्दुर्विनीताम्** (दुर्विनीतानां व्यृद्धिः) इत्यादयः (कौ.652)

दुर्मनायते-अदुर्मनाः दुर्मनाः भवति One who was not unhappy becomes unhappy.

दुर्विनीत दुर्विनीत इदानीं ज्ञास्यसि-Oh! rogue now you shall realise. क्रोधाविष्टस्य वचनमिदम् (कौ.2143)

दुःषमम्-अव्य.Ind. दुष्टो वत्सरः Bad year. दुःषमम् आसीत् देशस्य। वृष्ट्यभावादिना दुष्टत्वं समायाः (वत्सरस्य) आसीदित्यर्थः (प्र.स.2084)

दुष्ठु-अव्य.Ind. न सम्यक् Bad Defective 'अत्र च त्वानुनेष्यामि यत्र मा दुष्ठु मन्यसे' (बु.च.IV.84)

दुष्प्रजाः-दुष्टा प्रजा सन्ततिः यस्य सः One who has wicked children. 'प्रजा सकारान्तो भवति। 'स्' is added at the end. (कौ.862)

दूडभः-दुःखेन दभ्यते Difficult to kill (कौ.1034)

दूडाशः-दुःखेन दाश्यते (दीयते) इति दूडाशः Difficult to part with (कौ.1034) 'काकिण्यपि च दूडाशा कृपणाग्रेसरस्य ते'

दूढ्यः-दुःखेन ध्यायतीति दूढ्यः One who concentrates with difficulty. (कौ.1034)

दूणाशः-दुःखेन नाश्यते इति दूणाशः Difficult to destroy (कौ.1034)

दूतसंपातः-दूतानां प्रेषणम् Sending messengers.

दूरादागतः-(अलुक्समासः) One who has come from distance. See स्तोकान्मुक्तः. (प्र.स.2117)

दूर्वाचत्वरम्-Lawn in front of a building.

दृढः-(A) स्थूलः बलवांश्च Strong and sturdy.

दृहितः-(B) दृंहितः, वर्धितः Made big. Grown.

दृतिहरिः-(A) यः पशुः (जलभरितां) चर्म भर्त्सिकां वहति An animal which draws/ carries the big leather bag.

दृतिहारः-(B) पशोः अन्यः यः दृतिं हरति Any one man etc. other than the animal, who carries the leather bags.

दृश्यस्थापितम्-सर्वदृश्यतया स्थापितम् Placed conspicuously so that no one would miss seeing it.

दृषच्छारदाः सक्तवः-सद्यः दृष्टदा पिष्टाः सक्तवः दृषच्छारदाः । शारदशब्दः प्रत्यग्रवाची । The fried corn just then pounded by stone. (ग.र.म.पृ.419)

दृष्टसारम्-यस्य शक्तिः पूर्वं निरूपितमस्ति That whose power has already been proved.

दृष्टिविलोभनम्-दृष्टिम् आकृष्य आनन्दजनकम् Attraction for the sight 'रोगे दृष्टिविलोभनं जनयितुं शोभा न काचित् कृता' (भा.ना.च.38)

दृष्टिसंभेदः-दृशोः मिलनम् । परस्परदर्शनम् Mutual glance

देशान्तरं गतस्य तस्य दशमो वर्षः-Nine years passed after he left for the foreign country. 'अयमत्र भवतः दशमो वत्सरः विद्यागृहमधिवसतः' (काद.पृ.172) 'अयमद्य तृतीयो वर्षः तं दृष्टवतः' । 'पञ्चमो मासः पीठमधि रूढस्य' इत्यादयः ।

देवति, द्यवति-द्यौरिवाचरति Appears like heaven.

देवत्रा वन्दे-(1) देवान् वन्दे I salute Gods (2) देवेषु रमे I take pleasure in Gods. (कौ.2127)

देवदत्तकाः-देवदत्तो मुख्यो येषाम् Those who have देवदत्त as their leader. एवं 'त्वत्काः' 'मत्काः' 'गान्धीकाः' 'वाजपेयीकाः' इत्यादि

देवदत्तं शतं मुष्णाति-मुष् धातुः तत्समानार्थकाश्च द्विकर्मकाः Steals hundred from *Devadatta*. The root मुष् and its synonims govern two objects. 'आपणं द्विसहस्रं चोरयति' इत्याद्याः ।

देवदत्ताय शतं धारयति विष्णुमित्रः-विष्णुमित्रेण ऋणापाकरणार्थं देवदत्ताय शतं दातव्यम् *Devadatta* owes hundred to *Viṣṇumitra*. ण्यन्तस्य 'धृ' धातोः प्रयोगे उत्तमर्णवाचकात् चतुर्थी भवति When the causative of 'धृ' is used the person who lends money is used in चतुर्थी । 'मह्यं पुस्तकं धारयसि, इत्यादि ।

देव ! देव ! वन्द्योऽसि-तव वन्दनं संमतमित्यर्थः It is good to salute you. (कौ.2143)

देवब्राह्मणः - देवपूजकः ब्राह्मणः देवब्राह्मणः A *Brāhmaṇa* who worships Gods. मध्यमपलोपी समासः । In the *Samāsa* middle word is dropped. 'परुशुरामः' परशुधारी रामः' इत्यादयः ।

देवमातृकः (देशः)-कृष्याद्यर्थं वृष्ट्यधीनः देशः The country dependents on rains.

देवश्चेदवर्षीत् धान्यम् अवाप्स्म-देवः वर्षिष्यति चेत् धान्यं वप्स्यामः इति आशास्महे If it will rain, we hope, we shall sow the grains. आशंसायां भविष्यदर्थे वा लुङ् प्रयुज्यते । लुङ् (Aorist) is used in the sense of future optionally when desire is indicated. (कौ.2790)

देवश्चेद्वर्षति धान्यं वपामः-आशंसायां भविष्यदर्थे वा लट् प्रयोगः If the rain God rains we shall sow the seeds. लट् is used in the sense of लृट् optionally when hope is implied (कौ.2790)

देवागारिकः-देवागारे नियुक्तः Employed in a temple.

देवानां प्रियः-मूर्खः A fool. An obstinate person.

देविकः, देवियः } अनुकम्पितो देवदत्तः
देविलः, देवदत्तकः } The pitiable *Devadatta*.

दैवोपहतः-प्रतिकूलदैवः Illfated. Unfortunate

दोषयति - } (A) चित्तविरागं जनयति Effects the mind.
दूषयति - } (B) दूषणं करोति । आद्येऽर्थे 'दोषयति' इति 'दूषयति' इति वा । अर्थान्तरे तु दूषयति इत्येव । In the sense of mental effect दोषयति or दूषयति । 'दोषयति दूषयति वा चित्तं कामः' In the other sense दूषयति । 'आसन्नविपत् आचार्यं दूषयति । (कौ.2605)

दोषाभूतम् अहः-अहः रात्रिः सञ्जातम् The day turned into night. (कौ.2118)

दोषेषु बाह्यः-दोषशून्यः Free from defects. Blemishless, 'दोषेषु बाह्यमनुजं भरतं हनानि' (भा.ना.च.पृ.261) एवम् - 'गुणेषु बाह्यः' 'गुणेषु अबाह्यः' इत्यादयः ।

द्यावाभूमी } द्यौश्च भूमिश्च, द्यौश्च पृथिवी
दिवस्पृथिव्यौ } च । द्युलोक and earth. (कौ.927)

द्यूतः-A अक्षक्रीडा (विजिगीषायाम्) Gambling (where there is desire to win)
द्यूनः-B स्तुतः Praised (कौ.3028)
द्रढयति-दृढं करोति Makes strong.
द्रवति-द्रुः इव आचरति Acts or appears like a tree.
द्रव्यम्-भव्यं वस्तु Very good thing. 'द्रव्यम् अयं ब्राह्मणः' This *Brāhmaṇa* is an excellent thing ('person' here).
द्रव्यकः-यः द्रव्यं हरति आहरति वा One who takes away or brings money or anything.
द्राघयति-दीर्घं करोति Makes it long. 'यथा कथञ्चित् संभाषां नितरां द्राघयत्ययम्। इत्थं प्रवृत्तिरेवाद्य द्रढयत्यद्यमूर्खताम्'।
द्रुणसः-द्रुम इव नासिका यस्य One whose nose is like a tree (कौ.856)
द्रुमिणी-द्रुमाणां समूहः A cluster of trees.
द्रोणमेघः-द्रोणसदृशः, कुम्भादिव जलं स्रावयन् मेघः A thick cloud which rains heavily as through a spout. 'अनावृष्टिहते सस्ये द्रोणमेघ इवोदितः' (मृ.श. 269)
द्रौणिकः-द्रोणस्य वापः The field in which seeds of one द्रोण (a measurement) is to be sown.
द्रौणी, द्रौणिकी-द्रोणं पचति One who (a vessel or a person) can cook द्रोण of rice etc.
द्वन्द्वं मन्त्रयते-रहस्यं मन्त्रयते He is thinking of a secret matter. (कौ.2150)
द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति-Uses the vessels of *Yajña* in pairs.
द्वन्द्वं रामलक्ष्मणौ-रामलक्ष्मणौ सर्वदा सहचरितत्वेन लोके विज्ञातौ *Rāma* and *Lakṣmaṇa* are known as constantly associated with each other (कौ.2150)
द्वय } **द्वितय** } वि.a द्वौ अवयवौ अस्य Having two parts.
द्वादशभिः वर्षैः व्याकरणं श्रूयते-द्वादशसु वर्षेषु व्याकरणम् अध्येतुं शक्यते इति श्रूयते It is said व्याकरण is studied in twelve years. एवं 'पञ्चभिः वर्षैः वैद्यकं श्रूयते' इत्यादि। (पं.तं.पृ.2)
द्वादशान्यिकः-परीक्षासमये द्वादशापपाठकृत् One who has committed twelve mistakes while reciting *Veda* at the time of examination.
द्वारम् अशून्यं कुरुते-द्वारे उपस्थितः Present at the gate. 'क इह भोः काञ्चनतोरणद्वारम् अशून्यं कुरुते' (भा.ना.च.पृ.303) एवम् - 'गेहमशून्यं कुरुते' इत्यादि।
द्विकाण्डा त्रिकाण्डा-इत्यादि भुवः परिमाणे। द्विकाण्डा त्रिकाण्डा वा भूमिः। भूमिभिन्नपरिमाणे तु 'द्विकाण्डी' इत्यादि। 'द्विकाण्डी', 'त्रिकाण्डी' रज्जुः When a particular measurement of land is meant 'द्विकाण्डा भूमिः' etc. when a measurement of anything other than land is meant 'द्विकाण्डी रज्जुः' etc.
द्विकार्षापण } **द्विकार्षापणिक** } वि.a द्वाभ्यां कार्षापणाभ्यां क्रीतम् Bought for two *Kārṣāpaṇas*
द्विकुलिजी, द्विकुलिजीना } **द्विकुलिजिकी, द्वैकुलिजिकी** } कुलिजः प्रमाणविशेषः *Kulija*=a measurement. See आढकीना
द्विकौडविक-द्वौ कुडवौ प्रयोजनमस्य That which has two *Kudavas* as its purpose. चतुर्थोभागः कुडवः। कुडव is a measurement of grain etc. ¼ *Prasthā*.
द्विगुणाकरोति-द्विगुणं कर्षति Ploughs the field twice.

द्वितीयकः-द्वितीयः वृद्ध्यादिः अस्मै दीयते That in which or to whom an equal measure is given as 'वृद्धि' etc. See 'पञ्चक'

द्वितीयकः- (ज्वरः) द्वितीये अहनि भवः ज्वरः The fever that appears on every alternate day.

द्वितीयाकरोति-द्वितीयं कर्षणं करोति Ploughs for the second time. एतादृशानां शब्दानाम् अधुना भोजन-यानादि विषयेऽपि प्रयोगः कर्तुं शक्यते

द्वित्राः -द्वौ वा त्रयो वा Two or three.

द्विदण्डि (अव्य) प्रहारः-द्वौ दण्डौ यत्र उपयुज्येते तादृशः प्रहारः Fight where two sticks are used.

द्विदण्डि (क्रि.वि.) प्रहरन्ति-दण्डद्वयप्रयोग-पूर्वकं प्रहरन्ति Fight using two sticks (प्र.स.2268)

द्विधन्वन्-द्वे धनुषी यस्य सः। (बहुव्रीह्यन्ते 'धनुस्' शब्दः 'धन्वन्' भवति। 'धनुस्' changes into धन्वन् at the end of बहुव्रीहि) 'शार्ङ्गधन्वा' इत्यादयः। (कौ.870)

द्विनिष्ककम्, द्विनैष्किकम्-द्वाभ्यां निष्काभ्यां क्रीतम् Bought for two *Niṣkas*

द्विपात्रिकी, द्विपात्रीणा, द्विपात्री-See आढकीना

द्विपादिकं (ददाति)-द्वौ द्वौ पादौ ददाति Gives at the rate of two *pādas* to everyone. (कौ.2073)

द्विभूमः-द्वे भूमी यस्य सः प्रासादः A building which has two floors. See 'कृष्णभूमः'

द्विमयम्-एकस्य द्रव्यस्य प्रस्थादेः कृते कस्यचित् पदार्थान्तरस्य प्रस्थादिद्वयं यत्र दातव्यम् तत्रास्य प्रयोगः। 'द्विमयम् उदश्वित् यवानाम्' - यवप्रस्थद्वयेन क्रेतव्यम् उदश्वित्। (बालमनोरमा) When two प्रस्थs or such measures of *yavas* or of other things, are to be given for one *Prastha* or such a measure of *Uadaśvit* (curds mixed with one fourths of water) etc. it is called द्विमय। एवम् - "षण्मयाः तिलाः व्रीहीणाम्' "Sesam which can be bought by giving six bags of the paddy" इत्यादि।

द्विमास्यः-द्विमासवयाः Two months old.

द्विमुनि-(अव्य) विद्याप्रारम्भकौ द्वौ मुनी Two sages who are the originators. (कौ.693)

द्विमोदकिकां ददाति-द्वे द्वे मोदके ददाति Gives two sweets to each person (कौ.2073)

द्वियमुनम्-(अव्य) द्वे यमुने Two *Yamunā* rivers (Two branches/flows of *Yamunā*)

द्विरात्रीण, **द्वैरात्रिक** } वि.a द्वाभ्यां रात्रिभ्यां निर्वृत्तः Completed in two nights. See मासिक (अधीष्ट etc.)

द्विवर्षीण, द्विवर्ष, द्विवार्षिक-वि.a द्वयोः वर्षयोः भवः Connected with two years. See also द्विरात्रीण above.

द्विशतिकां ददाति-द्वे द्वे शते ददाति He gives two hundred to each person. (कौ.2073)

द्विसहस्रम्, **द्विसाहस्रिकम्** } द्वाभ्यां सहस्राभ्यां क्रीतम् Bought for two thousands.

द्विषंतपः-द्विषन्तं तापयतीति द्विषन्तपः One who troubles his enemy. (कौ.2954)

द्विसमीन-See मासिक

द्विसंवत्सरीण, द्विसांवत्सरिक-See द्विरात्रीण

द्विसौवर्णिक-वि.a द्वाभ्यां सुवर्णाभ्यां क्रीतः Bought for two सुवर्णs

द्विहायनी, त्रिहायनी-(बाला) इत्यादि A girl

of two years of age, of three years of age. मनुष्यवयःपरिमाणनिर्देश एव ईकारान्तत्वम् । अन्यत्र आकारान्तत्वम् । It ends in 'ई' when used to indicate the age of human beings. Otherwise used as आकारान्त । **द्विहायना, त्रिहायना** शाला इत्यादि ।

दोग्धि गां पयः-Draws milk from the cow दुहधातुः द्विकर्मकः । दुह् 'to milk' governs two objects.

द्वीपिनं चर्मणि हन्ति-चर्मार्थं व्याघ्रं हन्ति Kills the tiger for the hide. See 'कुञ्जरं दन्तयोः हन्ति' । 'बालं ग्रैवेयके हरति' इत्यादयः।

द्वैवर्षिकः-द्वाभ्यां वर्षाभ्यां भविता That which will be completed in two years.

द्वैवृत्तिकः-द्वयोः वृत्त्योः साधुः Good in two professions.

द्व्यङ्गुलोत्कर्षं खण्डिकां छिनत्ति
द्व्यङ्गुलेन उत्कर्षं खण्डिकां छिनत्ति
द्व्यङ्गुले उत्कर्षं खण्डिकां छिनत्ति
} अङ्गुल-द्वय-परिमाणेन परिच्छिद्य खण्डिकां छिनत्ति Cuts the piece taking the measure of two अङ्गुलs । प्रमाणे वाच्ये तृतीयासप्तम्यन्तपदयोः उपपदयोः णमुल् (अम्) भवति । When तृतीयान्त or सप्तम्यन्त is उपपद णमुल् (अम्) is added to indicate measurement. (कौ.3372) 'क्रोशोत्कर्षं शङ्कुकां खनति' इत्यादयः।

द्व्यहतर्षं पयः पिबति-अद्य पीत्वा द्व्यहानन्तरं पयः पिबति Every third day he drinks milk. (कौ.3379) 'द्व्यहतर्षं' वत्सान् पाययति पयः' इत्यादि ।

द्व्यहात्यासं गाः पाययति-अद्य पाययित्वा द्व्यहमतिक्रम्य पाययति He makes the cows drink water every third day. 'मासात्यासं भुङ्क्ते' 'सप्ताहात्यासं स्वग्रामं गच्छति' इत्याद्याः (कौ.3379)

द्व्यहीन, द्वैयह्निक-See द्विरात्रीण

द्व्याचितिकी, द्व्याचितीना, द्व्याचिता-See आढकीना । (आचितः प्रमाणविशेषः आढकादिवत् ।)

द्व्याढकिकी, द्व्याढकीना, द्व्याढकी-See आढकीना

द्व्यायुषम्-द्वयोः आयुषोः समाहारः Two life spans (कौ.945)

धनकः-धने कामः (देवदत्तस्य) Desire for money.

धनपोषं पुष्णाति-धनेन पुष्णाति He nourishes with money. See स्वपोषं पुष्णाति

धनायति-(A) जीवनार्थं पर्याप्ते सत्यपि धने अधिकं धनं वाञ्छति Though having money sufficient for living, wants more.

धनीयति-(B) जीवनार्थं धनं वाञ्छति Wants money for livelihood.

धनुषि निषण्णः-जयार्थं धनुः यः विश्वसिति One who depends on the bow for victory. 'पाकिस्तानदेशः आणवास्त्रे निषण्णः' इत्यादि

धनोष्मन्-धनमदः The heat of wealth धनोष्मणा पच्यमानाः' (म.स्पृ.939)

धन्य-वि.a (1) धनस्य निमित्तम् The cause or source of wealth (2) धनं लब्धा One who is going to get wealth.

धन्यंमन्य-वि.a धन्यम् आत्मानं यः मन्यते One who thinks himself धन्य

धर्मकञ्चुकच्छन्न-वि.a 'धर्म इति कञ्चुकेन आच्छन्नः' । बहिः धार्मिक इव दृश्यमानः

अधार्मिकः । वञ्चकः One who is covered by the Coat of *Dharma*. A wicked deceitful person.

धर्मध्वजी-धर्मचिह्नधारी अधार्मिकः One who holds aloft the flag of *Dharma* but practises अधर्म (मनु.स्मृ.IV195)

धर्ममहामात्र-वि.a धर्मसंबन्धिविषयामात्यः Minister incharge of religious affairs.

धर्मसचिवः-मन्त्रसहकारी सचिवः A minister for counsel.

धर्मस्थः-धर्माधिकारी, धर्मनिर्णेता Judge

धर्मात् प्रमाद्यति-He errs in *Dharma* प्रमादार्थैः योगे पञ्चमी । The root 'मद्' with 'प्र' and its synonyms govern *Pañcamī*. 'व्रतात् स्खलति' इत्यादयः

धर्म्य-वि.a 1) धर्मेण प्राप्यम् Which can be got by *Dharma* 2) धर्मात् अनपेतम् Which is in accordance with *Dharma*.

धरमाणाः-जीवन्तः Those who are alive 'धरमाणानामपि प्रतिमाः स्थाप्यन्ते?' (भा.ना.च 277)

धातुसाम्यम्-आरोग्यम् Good health

धातुसाम्यप्रश्नः-Enquiry about health 'तावुभौ न्यायतः पृष्ट्वा धातुसाम्यं परस्परम्' (बु.च.XII.3)

धानुष्क ! धानुष्क ! वृथा ते धनुः-Oh! archer your bow is of no use. युद्धासमर्थं प्रति निन्दा इयम् Uttered rebuking an archer who is not able to face an enemy (कौ.2143)

धारयन्-सुखेन धारयिता One who bears without any diffculty. णिजन्तात् धृधातोः अस्मिन्नेवार्थे 'शतृ' (अन्) प्रत्ययः । 'शतृ' is added to the root 'धृ' with 'णिच्' (in its causative form) only in this sense (कौ.3110)

धाराधिरूढ-वि.a उन्नतस्थितिं यः प्राप्तः (शोकहर्षादिः) That which has reached the highest pitch.

धिक् कृष्णाभक्तम्-Fie ! The person who is not a devotee of *Kṛṣṇa* 'धिक्' शब्देन योगे द्वितीया । 'धिक्' indicative of censure, governs द्वितीया ।

धुरिकरोति-अग्रेसरं करोति Places at the foremost place. Gives highest place.

धुर्यः / **धौरेयः** } धुरं वहति । कार्यभारवहः । That which bears or draws the yoke. One who takes great responsibility.

धूमायते-धूमवान् भवति Smothers

'अलातं तिन्दुकस्येव मुहूर्तमपि संज्वल ।
मुहूर्तं ज्वलितं श्रेयः न तु धूमायितं चिरम् ॥' (म.भा.)

धूमीकृत्य- (1) विस्तार्य Having spread (2) कान्तिमन्तं कृत्वा Having brightened (3) काङ्क्षां कृत्वा Having aspired (ग.र.म.पृ.136)

धूलीकृत्य-विदूराकुलतां कृत्वा Having caused fear from distance (ग.र.म.पृ.137)

धृष्टः-(A) अविनीतः Arrogant

धर्षितः-(B) बलात्कृतः Forced (कौ.3059)

धेनुम्भव्या-या धेनुः भविष्यति सा The young cow who would become धेनु (Cow that has given birth to the first calf) (कौ.1007)

धेन्वनडुहौ-धेनुश्च अनड्वांश्च Cow and bull (अकारान्तत्वम्) (कौ.945)

धैनुकम्-धेनूनां समूहः Herd of milche cows.

ध्रियते-सजीवः अस्ति Is alive 'दिष्टया ध्रियते'। (भा.ना.च.10)

ध्वंसकलाकृत्य-हिंसित्वा Having killed or harmed (ग.र.म.137)

ध्वनितम्-(A) कृतध्वानम् Which has sounded.

ध्वान्तम्-(B) तमः Darkness

न किञ्चित् परिहीयते-कस्यापि न्यूनता न भवेत् Nothing would be lacking.

नक्तंदिवम्-नक्तं च दिवा च। सर्वस्मिन् दिवसे During the night and day (the whole day) (कौ.945)

नक्षत्रपत्रिका-पञ्चाङ्गम् Calander (क्षेमे)

नखंपच-वि.a नखानाम् उष्णताकारि That the heat of which can be felt by nails. Lukewarm. नखंपचा यवागूः Gruel which is a little hot.

नखमुचः-नखानि मुञ्चतीति नखमुचः That which drops nails (idea is not clear)

नखविषः-'नखेषु विषं यस्य सः' नरः A man (in whose nails there is poison)

नगरकाकः / **नगरवायसः** } नगरवासिकाकसदृशः (निःसार्यमाणत्वेऽपि न चलति), धृष्टः "A crow in the City" (An expression of contempt)

नगरश्वा-धृष्टः "Dog in the city". (प्र.स.2139)

नगरस्य उत्तरेण / **नगरम् उत्तरेण** } North or in the North near the city. उत्तरेण इत्यव्ययेन योगे (सामीप्ये द्योत्ये) षष्ठी, द्वितीया वा भवति। उत्तरेण (Ind.) governs षष्ठी or द्वितीया when proximity is implied.

नग्नंकरणम्-अनग्नं नग्नं कुर्वन्त्यनेन That by which something or somebody is stripped naked or uncovered.

नग्नं भविष्णुः / **नग्नं भावुकः** } अनग्नः नग्नः भविता One who is going to be naked 'नग्नंभविष्णु ते कर्म सत्यं ज्ञायेत दृश्यताम्'

नग्नमुषितः-मुषितश्चासौ नग्नश्च नग्नमुषितः। मुषितत्वात् नग्नः One who was looted and so became nacked. पदव्युत्क्रमः Change in the order of words. (प्र.स.2199)

नट्या-नटानां समूहः A group of actors (*Natas*) Actors' troup

'नट्यागच्छति पश्यात्र पार्श्वे तस्या निदेशकः।
पश्चाद् गानादिनिर्माता कुत्रास्माकं स्थितिश्चल॥'

न त्वां शुने मन्ये-I do not consider you even as a dog अनादरे गम्यमाने दैवादिकस्य 'मन्' धातोः प्रयोगे विकल्पेन चतुर्थी भवति। 'न त्वां गर्दभाय मन्ये इत्यादयः। 'नौ', 'काक', 'अन्न', 'शुक' 'शृगाल' शब्दानां प्रयोगे तु न चतुर्थी This does not apply in the case of नौ, काक, अन्न, शुक and शृगाल। 'न त्वां शृगालं मन्ये' इत्याद्येव

नदीम्, अन्ववसिता सेना-सेना नद्या सह संबद्धा The army camped along the length of the river तृतीयार्थे, अनुना योगे द्वितीया प्रयुज्यते। 'अनु' in the sense of 'alongwith' governs द्वितीया (कौ.449) 'देवतायात्रायां मार्गमनु जनाः सुप्यन्ति' इत्यादयः

नदीमातृकः देशः-नदीसाहाय्येन कृष्यादेः निर्वर्तकः देशः The country which is engaged in cultivation etc., with the help of rivers.

नदीष्णः-'नद्यां प्रविश्य यः स्नाति' निपुणः । One who is able to take both by taking a plung in a river. Skillful.

नदीस्तः-नद्यां तीरसमीप एव स्थित्वा यः स्नाति One who has taken bath without plunging into it.

नन्दकः-यस्य आनन्दः अन्यैः पित्रादिभिः आशास्यते सः One whose happiness is wished by others like parents (कौ.2912)

नन्दोपक्रमं द्रोणः-नन्देन तत्प्रथमतया आरब्धः द्रोणः । द्रोण, A measurement which was for the first time started (invited) by *Nanda*. 'उपक्रम्यते इति उपक्रमः Started for the first time. नन्दस्य उपक्रमः (उपक्रम्यमाणः अथवा उपक्रान्तः) । पूर्वोक्तेऽर्थे उपक्रमशब्दः तत्पुरुषस्यान्ते नपुंसकलिङ्गे भवति '*Upakrama*' which is in पुंलिङ्ग changes into नपुंसकलिङ्ग when it is used at the end of *Tatpuruṣa* (कौ.824) 'ब्रह्मोपक्रमं जगत्सृष्टिः' 'मार्कोन्युपक्रमम् आकाशवाणी' । 'गान्ध्युपक्रमं सत्याग्रहः' इत्यादयः

नभ्यः-नाभये हितः । नाभिसंबद्धः Good for the central part of a wheel or connected with it.

नमस्कृत्य, नमस्कृत्वा-समासो वैकल्पिकः Compounded optionally.

नमस्यति-पूजां करोति Worships (कौ.2675)

नमोवाकम्-अव्य.Ind. 'नमः' इति वचनम् Uttering the word 'नमः' i.e., making a bow in obeisance.

नरकण्टकः-दुष्टः नरः "A thorn to the men or among men." One who troubles others.

नरव्याघ्रः-नरः व्याघ्रः इव Tiger to the man (great man). See 'गोवृन्दारक'

नरस्कन्धः-नरसमूहः A multitude or body of men.

नरहयम्-नराश्वयुद्धम् Fight between man and horse.

नर्मसचिवः / **नर्मसुहृत्** } विदूषकः A person who counsels in amorons affairs.

नवदर्शनः-इदं प्रथमतया दृष्टः Seen for the first time. Stranger.

नश्यत्प्रसूतिका-मृतशिशुप्रसवित्री A woman who delivers a dead child.

नागदन्तः-वस्त्रादिनिक्षेपणार्थं कुड्यादिषु निखातः गजदन्ताकृतिः शङ्क्वादिः A peg or bracket projecting from a wall and used to hang things upon.

नागरेयकः-नगरे जातः भवो वा Born in a city.

नागा-A सर्पवत् दीर्घकाया स्त्री A woman of serpents' length.

नागी-B गजवत् स्थूला नारी A woman as stout as an elephant.

नाडिन्धमः-(पन्थाः) 'नाडीषु निश्वासवायुपूरकः मार्गः' अतीव क्लेशेन गम्यः मार्गः The path which makes the veins of the body filled with sighs (wind)". The path which causes too much of exhaustion.

नाथते-आशास्ते Wants. Desires. अस्मिन्नर्थे आत्मनेपदी । 'नाथ्' takes A.P. in the above sense. सर्पिषो नाथते = सर्पिः मे स्यादित्याशास्ते (कौ.2686)

नाथहरिः-A नासारज्जुमान् गवादिः Animal like a bull which has nose-string.

नाथहरः-B नासारज्जु यः गृह्णाति सः पशुभिन्नः

Any one other than an animal taking or a holding a noose. (कौ.2939)

नानाकृत्य, नानाकारम्, नाना कृत्वा गतः-अनाना नाना कृत्वा गत इत्यर्थः Having split it, which was not having various parts originally, into various parts, he went (कौ.3364)

नानाकारं गता आङ्ग्ला भारतीयान् मतादिभिः।
पालका जातिभेदाद्यैर्नानाकृत्याद्य भुञ्जते॥

नानाभूय, नानाभावम्, नानाभूत्वा नष्टः-अनाना नाना भूत्वा इत्यर्थः It has perished after it was split (कौ.3384)

नाम-अव्य.Ind. इदम् अव्ययम् एतेष्वर्थेषु प्रयुज्यते - (1) तन्नामधेयः - या, प्रसिद्धः - प्रसिद्धा Named, called 'हिमालयो नाम नगाधिराजः' (कुमा.1.1) तन्नन्दिनीं सुवृत्तां नाम' (दशकु.7) (2) नूनम्, सत्यम् Indeed, certainly, truly, to be sure, verily. 'मया नाम जितम्' (विक्र.2.17) विनीतवेषप्रवेष्टव्यानि तपोवनानि नाम' (अभि.शा.1) 'आश्वासितस्य मम नाम' (वि.516) "When I was just consoled". 'तन्नाम निष्ठुराः पुरुषाः' (मृत्.श.5.32) That means men are cruel. (3) प्रायः। संभाव्यम्। अस्मिन्नर्थे 'मा' इत्यव्ययेन सह प्रयुज्यते Probably, perhaps often with 'मा', 'अये पदशब्द इव! मा नाम रक्षिणः' (मृत्श.3) Perhaps, (but I hope not) that of guards". (4) युक्तत्वम् Possibility. 'त्वया नाम मुनिर्विमान्यः' (अभि.5.20) (निन्दागर्भितमिदं वाक्यम्) (5) मिषं द्योतयति A feigned or pretended action. 'परिश्रमं नाम विनीय च क्षणम्' (कुमा.5.32) (6) लोटा सह प्रयोगे 'तथा भवति चेत् भवतु' इत्यर्थे With imperative granted, though, It may be 'अतनुषु विभवेषु ज्ञातयः सन्तु नाम' (अभि.शा.5.8) (7) कोपं सूचयति Anger or censure 'ममापि नाम दशाननस्य परैः परिभवः' (ग.र.म.) 'ममापि नाम सत्त्वैरभिभूयन्ते गृहाः' (अभि.शा.6) (8) आश्चर्यम् सूचयति Wonder 'आश्चर्यमन्धो नाम पुत्रं द्रक्ष्यति' (9) 'किमिदं संभाव्यम्' इत्यर्थं सूचयतुं प्रश्नार्थकपदैः किम्, कथम् इत्यादिभिः सह प्रयुज्यते It is often used with the interrogative pronoun and its derivatives कथं, कदा etc. in the sense of 'possibly', 'Indeed', "I should like to know". 'अयि कथं नामैतत्' (उत्त.6) 'को नाम राज्ञां प्रियः' (पं.तं.1.146) 'को नाम पाकाभिमुखस्य जन्तुर्द्वाराणि दैवस्य पिधातुमीष्टे' (उत्त.7.4)

नामग्राहम् आह्वयति-नामानि गृहीत्वा आह्वयति Calls them mentioning their names (कौ.3380) 'नामग्राहं निन्दति' इत्यादयः

नामादेशम् आचष्टे-नामनिर्देशपूर्वकं कथयति He talks about them mentioning their names (कौ.3380) 'नामादेशमाह्वयति' इत्यादयः

नाम्ना दशरथः-दशरथनामा *Daśaratha* by name 'नाम्ना रामः' 'नाम्ना सावित्री' इत्यादयः

नावयति-(1) नावम् आचष्टे Tells about the ship (2) नावं करोति Makes a ship

नाव्यम्-नावा तार्यम् Fordable by a boat.

नाव्यति-नावम् आत्मन इच्छति Wants a boat for himself.

नासासंश्लेषणम्-छिन्नायाः नासिकायाः

शस्त्रचिकित्सादिभिः स्वस्थाने संयोजनम् Joining the nose by surgery (क्षेमे)

नासिकन्धमः-शूत्कारैः नासिकां धमयतीति (शब्दयतीति) नासिकन्धमः । सूकरः That which fills nose (makes sound with nose), a pig.

निकथिती कथासु-कथाः निकथितवान् One who had narrated stories. (सप्तमी विशेषः)

निकटं ग्रामात् / **निकटं ग्रामस्य** Near the village निकटार्थैः योगे पञ्चमी-षष्ठी वा । 'निकट' and its synonims govern पञ्चमी or षष्ठी । 'समीपं ग्रामात्' । 'समीपं ग्रामस्य' इत्यादयः

निकाय्यः-निचीयते अस्मिन् धनादिकं निकाय्यः= निवासः A house (कौ.2890)

निकारः-A धान्यस्य निक्षेपः Throwing (sowing) the grain.

निकरः-B समुदायः Heap 'पुष्पनिकरः' इत्यादि ।

निकुञ्च्यकर्णि (अव्य) धावति श्वा-कर्णौ निकुञ्च्य धावति The dog runs bending down its ears. (प्र.स.2268)

निकृतिः-A नीचस्वभावः । वञ्चना Baseness Fraud Deceipt.

निष्कृतिः-B प्रायश्चित्तम् Expiation Atonement.

निक्षेप्तुकामः / **निक्षेप्तुमनाः** निक्षेप्तुं कामः यस्य, मनः यस्य One who wants to entrust. 'काम' 'मनस्' शब्दाभ्यां सह प्रयुक्तस्य तुमुनः मकारः लुप्यते समासे The gerund ending in 'तुम्' followed by 'काम' or 'मनस्' in a compound drops its 'म्' । एवं 'गन्तुकामः' 'गन्तुमनाः' 'पठितुकामः', 'पठितुमनाः' इत्यादयः

निगदिती नयेषु-नयान् निगदितवान् One who had talked about proper conduct (सप्तमी विशेषः)

निग्रहभट्टः-कारागाराधिकारी Jail superintendent (क्षेमे)

निग्राहः / **निग्रहः** बाधा Trouble निन्दार्थे When somebody is abused 'निग्राहस्ते भूयात्' । तद्भिन्नेऽर्थे In any other sense like arrest 'nigraha'. 'चोरस्य निग्रहः' इत्यादि

निचयभूताः-See ऊकभूताः (प्र.स.2153)

नित्यनैमित्तिकच्छित्-नित्यनैमित्तिककर्माननुष्ठायी Destroyer of all the regular and recurring ceremonies. (क्षेमे)

नित्यशाब्दिकः-नित्यः शब्दः इति यः वदति One who asserts word is eternal.

नित्यायते-नित्यः भवति Becomes permanent.

निद्रायते-निद्रावान् भवति Sleeps

निन्दाप्रवादाः-दोषप्रथनसंलापाः Rumours of censure (क्षेमे)

निपठिती मीमांसायाम्-मीमांसां निपठितवान् One who studied *Mīmāṁsā*. (सप्तमी विशेषः)

निपत्यरोहिणी-'निपत्य भूमौ पतित्वा रोहिणी लोहिनी रक्ता भवति या सा निपत्यरोहिणी' (ग.र.म.पृ.159) (अथवा या लतादिः भूमौ पतिता रोहति) That which becomes red on falling on the ground. (or a creeper etc., which grows after falling on ground)

निपुणतरं विलोकयति-सावधानेन चित्तेन पश्यति Sees with keen eyes (पं.त.पृ.214)

निबद्धबुद्धिः-इदमेवमेव इति निश्चितबुद्धिः Of fixed mind. (क्षेमे)

निबन्धपुस्तकम्-तत्तद्विषयाणां यस्मिन् नियतया रीत्या लेखनं क्रियते तत् पुस्तकम् Record book. Register.

निभृतात्मन्-दृढचित्तः Firm, Resolute.

निमूलकाषं कषति-निमूलं कषति Rubs as to remove the roots. See 'समूलकाषं कषति'।

नियमप्रभविष्णुता-नियमानां काठिन्यम् अथवा प्रभावः Strongency of rules. 'किं कृतः प्रतिषेधोऽयं नियमप्रभविष्णुता' (भा.ना.च.276) Meticulous application of rules.

नियुङ्क्ते-नियोगं करोति Orders. Employs निपूर्वकः युज धातुः आत्मनेपदी। 'युज्' with 'नि' takes A.P.

नियोगम् (स्वम्) अशून्यं कुरु-स्वकार्यस्थानं गच्छ Attend to your duty.

नियोगविद्-नियोगं तत्सम्बद्धं कर्तव्यादिकं च यः जानाति One who knows the duties of his office. (क्षेमे)

निरस्यति-निरस्यते-उपसर्गात् परः अस् धातुः वा आत्मनेपदी। 'अस्' with any preposition is optionally takes A.P. also. (कौ.2702)

निराकृती कुकाव्ये-कुकाव्यं निराकृतवान् One who had rejects bad poetical works. (सप्तमी विशेषः)

निरुत्तरप्रतिभः-उत्तरदानाशक्तप्रतिभावान् Whose intelligence could not help giving any answer. (क्षेमे)

निर्गुटः-नीचाधिकारी A low grade clerk or officer. (क्षेमे)

निर्धनोपकृतः-निर्धन इति हेतोः उपकृतः Helped thinking that he was a poor man. (प्र.स.2153)

निर्मक्षिकम्-(अव्य) मक्षिकानाम् अभावः Absense of flies. A place where there is nobody. 'निर्मानुषम्' इत्यादि (कौ.652)

निर्यन्त्र-वि.a अवरोधविहीनः Having no check. Unrestricted person. (क्षेमे)

निर्वर्त्यताम् (कालः)-याप्यताम् Time may be spent 'निर्वर्त्यतां तावदयं कन्याभावरमणीयः कालः' (भा.ना.च.पृ.13)

निर्वाणः-(A) (अग्निः मुनिः वा) नष्टः Disappeared (fire or sage)

निर्वातः-(B) वातः शान्तः The wind stopped.

निविशते सन्मार्गम्-He shows strong liking to the good path. 'निपूर्वः विशधातुः आत्मनेपदी। विश् with 'नि' takes A.P. (कौ.2683)

निवृत्तिमार्गः-लौकिकव्यवहारपराङ्मुखी प्रवृत्तिः Life abstaining from worldly activities, Life of an ascetic who gives up all the worldly activities.

निश्चप्रचम्-निश्चितं च प्रचितं (प्रसिद्धं) च निश्चप्रचम् Decided and well established. प्र.स.2166.

निःश्रेयसम्-निश्चितं श्रेयः निःश्रेयसम् Definite advantage or prosperity. (अकारान्तत्वं विशेषः (कौ.पृ.945)

निःश्वासनिद्रा-गाढनिद्रा Sleep accompanied with deep breathing. (क्षेमे)

निषण्णश्यामा }
निषद्यश्यामा } निषण्णा सती या (कृष्णवर्णा) श्यामा संजाता One who was originally of black complexion but has become श्यामा (of whitish black complexion) by constantly sitting.

निषादिती हास्तिके-हास्तिकं निषादितवान् One who had caused trouble to the group of elephants (सप्तमी विशेषः)

निष्कुलाकरोति-(दाडिमम्) निर्गतं कुलम् अन्तरवयवानां समूहः यस्मात् निष्कुलम्। तादृशं करोति He removes all the inner parts from the *Dādima* fruit. एवम् - 'निष्कुलाकरोति बिल्वम्' इत्यादयः (कौ.2123)

निष्क्रयः-लोपादिपरिहाराय दत्तं धनादिकम् Compensation.

निष्क्राम्यम्-वस्तूनां देशान्तरनयनार्थं दातव्यः करः. Export duty

निष्णातः } A कुशलः Skillful
निष्णः-

निस्नातः } B स्नातः One who has taken
निस्नः bath

निष्पत्राकरोति-सपुङ्खं शरम् अपरपार्श्वं निर्गमय्य तस्य निष्पत्रत्वं करोति Shoots the arrow in such a way that the wings (feathers) tied to it are dropped as it goes out to the otherside of an animal by piercing through its body.

निष्प्रवाणिः-(पटः) तदैव समाप्तवानः नवः पटः New unbleached cloth.

निःषमम्-अव्य.Ind. समायाः अवसानम् Passing of the year बालस्य निःषमम् अभूत् The child completed the year (प्र.स.2084)

निःसंपाताः-जनानां गमनागमनादिना शून्याः मार्गाः Roads having no trafic of the people. 'कः कालः कृतपरिघोषणतया निःसंपाताः राजमार्गाः' (भा.ना.च.पृ.223)

निसृष्टव्यवहारः-व्यवहर्तुं दत्तानुज्ञः Authorised to carry out a transaction.

निसृष्टार्थः-कार्यं किञ्चित् साधयितुं दत्तानुज्ञः Authorised to negotiate in a matter.

निस्तरौ एरण्डः-वृक्षरहिते देशे वृक्ष इति मन्यमानः एरण्ड इव Like the castor plant in a place where there are no other trees. A scholar when compared to fools. पात्रेसमितादि गणे पठनीयोऽयं शब्दः

निह्वयते, संह्वयते } निप्रभृतिभिः उपसर्गैः योगे
उपह्वयते, विह्वयते } ह्वेञ् धातुः आत्मनेपद्येव भवति। ह्वेञ् 'to call' with 'नि' 'सम्' 'उप' and 'वि' takes only A.P.

नयति अजां ग्रामम्-He takes the goat to the village 'नी' धातुः तत्समानार्थकाश्च धातवः द्विकर्मकाः The root 'नी' and its synonyms govern two objects. अधोनिर्दिष्टेष्वर्थेषु 'नी' धातुः आत्मनेपद्येव। 'नी' takes only A.P. in the following senses. (1) संमाननम्-favouring somebody with something. शास्त्रे नयते। शास्त्रस्य सिद्धान्तं शिष्यान् प्रापयति। तेन च शिष्यसंमाननं फलितम् Transfers the ideas contained in the *Śāstras* to the students (2) उत्सञ्जनम् Raising दण्डमुन्नयते Raises the staff (3) आचार्यकरणम् -Accepting a pupil for teaching माणवकम् उपनयते। विधिना आत्मसमीपं नयति He takes the student as per the rules. (4) ज्ञानम् knowing तत्त्वं नयते (निश्चिनोति) Decides (knows) the truth (5) भृतिः giving wages कर्मकरान् उपनयते। भृतिदानेन स्वसमीपं प्रापयति Takes the workers by paying wages (6) विगणनम् counting and seperating करं विनयते। राज्ञां देयं भागं परिशोधयति Separate the shares to be given to the king. (7) व्ययः Spending विनयते शतम् Spends hundred for good work. (कौ.2709)

नीचैःकृत्य प्रियमाचाष्टे, नीचैः कृत्वा प्रियमाचष्टे, नीचैः कारं प्रियमाचष्टे - He conveys the good news in a low voice (कौ.3381)

नीराजदण्डः - सर्वेषां पुरतः दण्डः Public punishment (क्षेमे)

नीलस्नेहः-अत्यधिकरागः Strong attachment 'तथा विभवमन्दोऽपि जन्मभूमिव्यपेक्षया। गृहादि क्रयकालेऽपि नीलस्नेहेन रक्षति ॥' (भा.ना.च.पृ.229)

नीला-(A) नीलवर्णं वासः A cloth of blue colour

नीली-(B) वस्त्रभिन्नं नीलवर्णं वस्तु Anything of blue colour other than cloth.

नीलायते-अनीलं नीलं भवति That which was not blue becomes blue. (कौ.2667)

नीवारः-(A) धान्यविशेषः A kind of grain

निवरा-(B) नितरां वरणीया (कन्या) A girl to be very much aspired for (कौ.3223)

नीहारायते-नीहारं करोति Creates mist.

नृवराहः-ना वराह इव। बलवान् नरः Boar-like man. (great strong man) See 'गोवृन्दारक'

नेदयति-अन्तिकं करोति Makes closer

नेत्राञ्चलसंज्ञा-नेत्रान्तेन सूचनम् A sign with a side glance or eye-corner. (क्षेमे)

नेन्यः-यः पुनः पुनः नयति One who takes again and again.

नैकटिकः-ग्रामात् क्रोशे भिक्षुणा वस्तव्यमिति शास्त्रमुल्लङ्घ्य निकटे यो भिक्षुः वसति An ascetic who, instead of staying two miles away the village, lives nearby. (कौ.1624 वा.म.)

नैत्यशाब्दिकः-नित्यः शब्द इति ब्रुवाणः One who asserts that word is eternal.

नैत्यकम्-नित्यं कर्तव्यं कर्म Daily duty Routine work.

नैवासिकः-निवासे साधुः Good to stay in

नैष्किक-वि.a निष्केण क्रीतम् Bought for one *Niṣka.*

नैष्ठिकब्रह्मचारिन्-आजन्मब्रह्मचारी One who is celibate life-long.

न्ययः-(A) विनाशः Destruction (कौ.3209)

न्यायः-(B) उचितः Proper. Just.

पङ्क्तिपाठनम्-एकामपि पङ्क्तिम् अनपहाय समग्रतया शास्त्रग्रन्थपाठनम् Teaching of a *Śāstric* work without leaving even a line. (Not a superficial study)

पक्षचरः-यूथपरिभ्रष्टः गजः An elephant strayed from the herd.

पचति तण्डुलान् ओदनम्-पच् धातुः द्विकर्मकः। पच् 'to cook' governs two objects.

पचतभृज्जता-पचत भृज्जत इति सततं यत्र प्रवर्तते सा पचतभृज्जता Continual backing and rousting.

पचतिकल्पम्-ईषदसमाप्तः पाकः Incomplete cooking.

पचतितमाम्-अत्यधिकं पचति Cooks very much. एवं 'गच्छतितमाम्' 'हसतितमाम्' इत्यादयः

पचतिपचति-पुनः पुनः भृशं वा पचति Cooks again and again or very much एवं 'वदति वदति', 'करोति करोति' इत्यादयः (कौ.2140)

पचेलिमाः-(माषाः) (1) पक्तव्याः Which are yet to ripen (2) स्वयमेव ये पच्यन्ते Which ripen by themselves.

पञ्चक-(A) वि.a पञ्च अस्मिन्, अस्मै वा, वृद्धिः, आयः, लाभः, शुल्कम्, उपदा वा दीयते

पञ्चकः That in which or to whom five are given as वृद्धि, आय, शुल्क or उपदा। (1) वृद्धिः = उत्तमर्णेन मूलातिरिक्तं ग्राह्यम् = Interest. (2) आयः = ग्रामादिषु स्वामिग्राह्यः भागः=Share of the owner of villages or of lands (3) लाभः = विक्रेत्रा मूल्यादधिकं ग्राह्यम् = Profit (4) शुल्कम् = रक्षिते राज्ञे दातव्यम् = That which is to be paid to the king for providing protection (5) उपदा = उत्कोचः = Bribe.

पञ्चकः-(B) पञ्च अंशः (भागः) वस्नं (मूल्यम्) भृतिः (वेतनं) वा अस्य One whose share or price or wage is five.

पञ्चकः-(C) (1) पञ्चभिः क्रीतः Bought for five (2) पञ्चकम् अस्य संघस्य परिमाणम् The group of five.

पञ्चगोणि-पञ्चभिः गोणीभिः क्रीतम् Bought for five bags.

प(पा)ञ्चजनीन-वि.a पञ्चजनेभ्यः हितम् Beneficient to the people.

पञ्चत् (वर्गः) पञ्च परिमाणमस्य A group of five.

पञ्चतय-वि.a पञ्च अवयवाः अस्य Having five parts.

पञ्चत्वं गतः-पञ्चभूतात्मकतां गतः, मृतः Died.

पञ्चनदम्-पञ्चानां नदीनां समाहारः पञ्चनदम् Group of five rivers संख्यावाचकपूर्वः नदीशब्दः अकारान्तः भवति। 'नदी' becomes 'नद' in a compound where it is preceded by a word denoting number (कौ.943)

पञ्चषाः-पञ्च वा षड् वा Five or six.

पञ्चमिन्-पञ्चमः वर्षः मासो वा अस्यास्तीति One who is running fifth month or fifth year.

पञ्चाग्नितपः-ग्रीष्मे चतसृषु दिक्षु चतुरः अग्नीन् निधाय शीर्षे सवितरि तपति क्रियमाणं तपः Penance performed in summer keeping four fires on four directions and with the Sun scorching the head.

पटपटाकरोति-पट पट इति शब्दं करोति Makes the noise 'Pat' 'Pat' (while breaking the branch of a tree or some such work.)

पटपटायति-ते-See पटपटाकरोति above.

पटुजातीयः-पटुप्रकारः One who is more or less efficient 'जातीयर्' (जातीय) is a suffix in the sense of 'like' or 'almost'.

पटु दृष्टः-पटु रिति दृष्टः (प्र.स.253) 'कार्येऽस्मिन् पटुदृष्टोऽयं नियुक्तः, स निराकृतः'।

पटुपटुः- (1) ईषत् पटुः (पुरुषः स्त्री वा male of female)

पटुपट्वी- A little capable. स्त्रियामेव Female only (कौ.2147)

पठिती वेदे-वेदं पठितवान् One who had recited *Veda*. (सप्तमी)

पणयात्रा-नाणकादीनां प्रचारः Circulation of coins. Currency.

पण्डितं मन्यः-पण्डितम् आत्मानं मन्यते One who considers himself a scholar. एवम्-सुन्दरंमन्यः 'धीमन्तंमन्यः' 'कविंमन्यः' इत्यादयः

पण्डितविश्रुतः-पण्डित इति विश्रुतः Well-known as a scholar (प्र.स.2153)

पण्डितायते-अपण्डितः पण्डितः भवति One who was not scholar becomes scholar

पण्यम्-(A) व्यवहर्तव्यम् Which can be sold and bought.

पाण्यम्-(B) स्तुत्यर्हम् Praise worthy.

पण्यपत्तनम्-नौकास्थानम् See port

पण्यपुट-वि.a वस्तुसमुदायः A package of goods.

पण्यपुटभेदनम्-पण्यानां प्राप्तिस्थानम् A market town.

पतयालुः-पतनस्वभावः Tending or prone to fall.

प्रतापतः-(1) पतनोन्मुखः Going to or inclined to fall (2) पुनः पुनः भृशं वा यः गच्छति Going much or frequently.

पतिघ्नी-पतिहननलक्षणवती स्त्री A woman having the signs indicating that she would kill or lose her husband (2) पतिहननसूचिका हस्तरेखा The sign in the hand which is indicative of husband's death.

पतितसावित्रीकः-यस्य गायत्रीमन्त्रार्हता नष्टा Man of the first three castes/classes whose thread ceremony has been improperly performed or not performed at all.

पतिंवरा-(A) कन्या A virgin

पतिवरा-(B) पतिं या वृणोति One who selects her husband.

पत्रीयम् }
पत्र्यम् } पत्राय हितम् Good for leaves or for vehicle.

पथकः-पथि कुशलः One who is skillful in finding the way, (as in a forest)

पथीनति-पन्था इवाचरति Appears as a road. Is used as a road.

पथ्यम्-पथः अनपेतम् Which does not swerve from correct path.

पदं मिथ्या कारयते-स्वरादिदुष्टं पदम् असकृत् उच्चारयति He repeats the word which is incorrect. 'मिथ्या' शब्दोपपदः पुनःपुनरुच्चारणसूचकः णिजन्तः कृञ्धातुः आत्मनेपदी। The root 'कृञ्' preceded by the word मिथ्या, takes A.P. when it is used in its causative form and indicates repetetion. (कौ.2740)

पदष्ठीवम्-पादौ च अष्ठीवन्तौ च तेषां समाहारः पदष्ठीवम् Feet and knees (कौ.945)

पद्मगन्धिः-पद्मस्य गन्ध इव गन्धः यस्य Having the fragrance of the lotus flower उपमानवाचिपूर्वपदात् परः 'गन्ध' शब्दः इकारान्तः भवति बहुव्रीहौ When comparison is implied the word गन्ध at the end of *Bahuvrīhi* changes into गन्धि। 'कुमुदगन्धिः' मृगमदगन्धिः' इत्यादि। (कौ.877)

प्रशस्तभ्राता }
सुभ्राता } प्रशस्तः भ्राता यस्य सः। यदा भ्राता पूज्यः तादृशवाचिभ्रातृ-शब्दान्तस्य बहुव्रीहेः 'कः' न भवति। भ्रातुः निन्दितत्वे तु 'मूर्खभ्रातृकः' 'कुभ्रातृकः' इत्यादि। 'भ्रातृ' at the end of बहुव्रीहि, being ऋकारान्त should have 'क'. But when it is intended to say the brother is a good brother 'क' should not be added. If the brother is not good, the example is 'मूर्खभ्रातृकः' 'कुभ्रातृकः' etc. (कौ.895)

पद्मनाभः-पद्मं नाभौ यस्य One who has lotus in his navel. समासान्ते 'नाभि' शब्दः अकारान्तो भवति। 'नाभि' at the end of a compound becomes 'नाभ'। 'अजनाभः' 'ऊर्णनाभः' इत्यादयः

पद्यः-(कर्दमः) पदम् अस्मिन् दृश्यम् Wet ground on which foot prints can be seen **पद्याः (शर्कराः)** पादौ विध्यन्ति small stones which hurt the feet.

पम्पश्यते }
पम्पस्यते } गर्हितं पश(स)ति (गच्छति) Goes in a bad manner.

पंफुल्यते-कुत्सितं फलति Gives bad fruits (कौ.2636)

'यथा पंपस्यते व्योम्नि विमानोऽयमितस्ततः।
तथा पंफुल्यतेऽत्रत्यभाग्यमित्यनुमीयते ॥'

पयसयति-पयस्विनीम् आचष्टे Says that it has milk

परच्छिद्राणि-परेषां दोषाः Defects (loop-holes) of others

परंतपः-परं तापयतीति परंतपः One who troubles his enemy (कौ.2954)

परंपरीणः-परांश्च परतरांश्च यः अनुभवति One who enjoys the early things and earlier things obtained by succession or descent.

परवान् अयं जनः-(अहं) पराधीनः पराधीना वा (I am) under the control of some-body (you) 'दर्शनात् प्रभृति परवानयं जनः' (काद.पृ.378)

परःशतम्-शतात् परम् Above hundred. पदव्युत्क्रमः 'परशब्दात् विसर्गश्च' Change in the order of words and *'visarga'* after *'para'*. (प्र.स.2199)

परःसहस्रम्-सहस्रात् परं परःसहस्रम् Above hundred पदव्युत्क्रमः 'पर' शब्दात् विसर्गश्च Change in the order of words and *visarga* after *'para'*. (प्र.स.2199)

पराकरोति-पराजितं करोति Defeats. 'कृ' with 'परा' takes P.P. परा इत्यनेन योगे कृञ्धातुः परस्मैपद्येव (कौ.2745)

पराजयते-पराभूतो भवति Gets defeated 'परा' पूर्वकः जिधातुः आत्मनेपदी। 'जि' with 'परा' takes A.P.

परिकलिती कलासु-कलाः परिकलितवान् One who had examined arts. सप्तमी विशेषः।

परिक्रीडते-परिपूर्वः 'क्रीड्' धातुः आत्मनेपदी 'क्रीड्' with परि takes A.P.

परिगणिती याज्ञिक्ये-याज्ञिक्यं परिगणितवान् One who is an authority in sacrificial works. सप्तमी विशेषः

परिगदिती परेषु-परान् परिगदितवान् One who had given correct information about the enemies सप्तमी विशेषः।

परिणतः-तिर्यग्दन्तप्रहारी गजः An elephant which rubs against rocks and mounds etc., with its tusks.

परिणतिं गच्छति-प्रयोजनवत् भवति Be-comes useful or beneficial (पं.तं.पृ.86)

परिणयः-(A) विवाहः Marriage

परिणायः-(B) द्यूते अक्षाणां समन्तात् नयनम् Taking dice around in gambling.

परितः गृहं वृक्षाः सन्ति-There are trees on all sides of the house 'परितः' इत्यव्ययेन सह योगे द्वितीया प्रयुज्यते। 'परितः' governs द्वितीया

परिपरिवङ्गान् वृष्टो देवः-वङ्गान् परिहृत्य वृष्टः God rained avoiding the *Vanga* Coun-try (Bengal) 'बन्धुव्रतां स्वां परिपरि सर्वान् संतोषयत्यसौ'। (कौ.2141)

परिपुच्छयते-पुच्छं पर्यस्यति Waves the tail.

परिमृष्यति-सहते । क्षमते Tolerates. दैवादिकः परिपूर्वः. 'मृष' धातुः आत्मनेपदी। 'मृष' of दिवादिगण with परि takes A.P. (कौ.2748)

परिरक्षिती परिजने-परिजनं परिरक्षितवान् One who had looked after his people very well.

परिवहति-परितः प्रवहति Flows around. 'परि'पूर्वः वहधातुः परस्मैपदी । 'वह' with 'परि' gets only P.P. (कौ.2748)

परिवित्तिः-यस्य यवीयान् भ्राताः आत्मनः पूर्वमेव कृतोद्वाहः One whose younger brother gets married earlier.

परिवृढः-(A) प्रभुः Powerful person.

परिबृहितः }
परिबृंहितः } (B) वर्धितः Made big or increased

परिवेत्ता-ज्येष्ठे भ्रातरि अकृतोद्वाहे यः दारपरिग्रहं करोति One who married before his elder brother.

परिव्रढयति-परिवृढं करोति Makes firm or strong.

परिषद्यः }
पारिषद्यः } परिषदि साधुः Fit to be a member in the *Parisad*, i.e., a group of learned men.

परिहरेः संसारः-हरिं वर्जयित्वा संसारः The cycle of births and deaths is there for all excepting *Hari*. वर्जनार्थेन 'परि' इत्यनेन योगे पञ्चमी । 'परि' in the sense of excepting governs पञ्चमी ।

परिहारलेखा-अमुकेन शुल्कादिदानं नावश्यकम् इति लेखा A letter of exemption.

परोवरीणः-परांश्च अवरांश्च यः अनुभवति Having or enjoying (being in the good looks) both the superior and subordinate 'परोवरीणः कर्मान्ते कार्यं साधयितुं क्षमः' ।

पर्ययः-(A) अतिपातः Passing off 'कालस्य पर्ययः' इत्यादि।

पर्यायः-(B) क्रमः Turn 'अद्यं द्वारं रक्षितुं तव पर्यायः' इत्यादि (कौ. 3210)

पलितङ्करणम्-अपलितं पलितं कुर्वन्त्यनेन That by which hair is turned grey. 'मूर्खस्य स्वामिनः सेवा पलितङ्करणी ध्रुवम्' । 'पलितम्भावुकश्चायं तस्य सेवां समीहते' ।

पलितम्भविष्णुः }
पलितम्भावुकः } अपलितः पलितः भवतीति That by which hair is turned grey. Whose black hair is turning grey.

पल्यवर्चसम्-करिणां भोजनं पल्यम् । तत्कृतं वर्चः पल्यवर्चसम् The brightness caused by the special food of an elephant. (प्र.स.2351) मांसाशनलब्धं तेजः Lustre caused by meat eating. (कौ.946)

पल्लवग्राहि पाण्डित्यम्-शास्त्रगतानाम् अल्पविषयाणामेव ग्रहीतृपाण्डित्यम् A very shallow scholarship (gathering a few points from a *Śāstra*).

पश्चिमतारम् }
पश्चिमतीरम् } Western bank. See 'उत्तरतारम्' ।

पश्यतोहरः-पश्यति स्वामिनि तमनादृत्य यः हरति । स्वर्णकारः One who steels in the very presence of the owner. Goldsmith (अलुक्समास)

पश्यामस्तावत्-'यद् वा तद् वा भवतु, अहं पुनः तथा न करिष्यामि इति भावः "We shall see" Indicative of 'Come what may' mood. 'राजा-किं बलात्कारेण ? विदूषकः - आम्! बलात्कारेण । राजा - तेन हि पश्यामस्तावत्' (भा.ना.च.)

पाटल्या-पाटलकुसुमानां समूहः A multitude of *Pātala* flowers.

पाटूपटः-पाटयतीति पाटूपटः One who breaks.

पाठकमूर्खः-मूर्खः पाठकः A dull-headed teacher.

पाणिघः-(A) पाणिना यः हन्ति सः शिल्पी An artisan who strikes with hand.

पाणिघातः-(B) शिल्पिनः अन्यः यः पाणिना हन्ति Any one who strikes with hand but other than an artisan.

पाणिंधमः-(अध्वा) पाणयः ध्मायन्ते अस्मिन्निति पाणिंधमः अन्धकारावृतः इत्यर्थः । तत्र हि सर्पाद्यपनोदनाय पाणयः शब्दायन्ते The path where hands are clapped to drive

away serpants etc., in darkness. (कौ.952)

पाणिन्युपज्ञं ग्रन्थः-पाणिनिना प्रथमं ज्ञातः ग्रन्थः The work which was first known to *Pāṇini*. उपज्ञायते इति उपज्ञा । (नित्यस्त्रीलिङ्गशब्दः) पाणिनेः उपज्ञा पाणिन्युपज्ञम् That which is known for the first time is called उपज्ञा । 'उपज्ञा' which is originally in स्त्रीलिङ्ग takes नपुंसकलिङ्ग at the end of तत्पुरुष when it is intended to indicate that it was known by so and so for the first time. Otherwise it can be used in any gender according to the विशेष्य । (कौ.824) भारतोपज्ञं दशाङ्कगणना अथवा शून्याङ्कः । चतुर्मुखोपज्ञं वेदः इत्यादि ।

पाणिगृहीता-(A) विना परिणयं कृतसंबन्धा स्त्री A concubine. Any woman other than wife whose hand is held.

पाणिगृहीती-(B) भार्या Wife.

पाणिपादम्-पाणयश्च पादाश्च तेषां समाहारः पाणिपादम् Hands and feet प्राण्यङ्ग - तूर्याङ्ग- सेनाङ्गानां द्वन्द्वः एकवचने प्रयुज्यते The *Dvandva* with words denoting (1) Limbs of the body (2) Players of instrumental music and (3) Parts of the army is used in singular number. (कौ.906)

पाणिसमवसर्ग्य-वि.a पाणिभ्यां यत् सृज्यते That which is produced with hands. Hand-made.

पाण्डुभूमः-पाण्डुः भूमिः यस्य सः पाण्डुभूमः Having white flooring. See 'कृष्णभूमः' ।

पाण्युपकर्षम् अपूपान् भक्षयति
पाणिना उपकर्षम् अपूपान् भक्षयति-
पाणौ उपकर्षम् अपूपान् भक्षयति- } Drawing or snatching with hand one after the other he eats the sweet cakes. See 'पार्श्वोपपीडं शेते' (कौ.3370) 'हस्तोपकर्षं धानाः संगृह्णाति' । 'पादोपकर्षं शृङ्खलां नयति' इत्यादयः ।

पात्रियः, पात्र्यः-पात्रम् अर्हति One who or which deserves पात्र (The cleaned rice etc., which can be directly put in the vessel for cooking)

पात्रिकम्-पात्रस्य (पात्रमितबीजानां) वापः पात्रिकम्, (यस्मिन् क्षेत्रे उप्यते तत् वापः) So much of field in which grain of one पात्र (a measurement) is sown.

पात्रीणा
पात्रिकी } See आढकीना

पात्रेबहुलः
पात्रेसमितः } भोजनसमये एव संगतः, न कार्ये । अलसः । वञ्चकः One who appears only at the time of meals not at the time of work. A parasite. A treacherous or hyporcritical fellow. (अलुक्समास)

पादघातं हन्ति-पादेन हन्ति He kills by kicking. करणवाचकोपपदस्य 'हन' धातोः णमुल् (अम्) भवति यत्र हन् धातुरेव प्रधानक्रियायां प्रयुज्यते । 'हन्' Preceded by a word denoting instrument takes 'णमुल्' (अम्) when the same root is used as the main root. (कौ.3358) 'खड्गघातं हन्ति' इत्यादयः ।

पादेन खञ्जः-Lame on account of defect in one foot. See 'अक्ष्णा काणः'

पान्थावसथपालिका-पान्थनिवासस्थान-पालिका स्त्री A woman who in charge of a tavern (Hotel) (क्षेमे)

पापसमम्-अव्य.Ind. पापः वत्सरः Bad year. (प्र.स.2084)

पापात् जुगुप्सते-He hates sin जुगुप्सार्थैः सह पञ्चमी प्रयुज्यते। 'जुगुप्सा' and its synonims govern पञ्चमी। 'तस्य दर्शनात् जुगुप्सते' 'वृद्धात् जुगुप्सते तरुणी' इत्यादयः।

पापात् विरमति-He refrains from sin विरामार्थैः पञ्चमी प्रयुज्यते। 'रम्' with 'वि' and its synonims govern पञ्चमी। 'पापात् निवर्तते' इत्यादि।

पाम्पालीकृत्य-हिंसित्वा Having hurt. (ग.र.म.पृ.139)

पाम्पीकृत्य-विस्तारं, विध्वंसं, माधुर्यं वा कृत्वा, करुणं विलप्य Having spread, or having spoiled or having made sweet. Having wept pitiously. (ग.र.म.पृ.139)

पाय्यम्-मीयते अनेनेति पाय्यम् That which measures something. (कौ.2890)

पारकुलीनः } **परस्यकुलीनः** } परकुले साधुः Good to the families of others.

पारदृश्वन्-येन पारं दृष्टम्। शास्त्रादिषु अतीव निपुणः A far-seeing wise. Prudent one who has seen the other side of any thing. One who has completely mastered or has become familiar with any thing.

पारदारिकः-परदारान् गच्छति यः A womaniser.

पारंपरीण } **पारंपरीय** } पित्रादिपरम्परया आगतः Handed down from father to son. Hereditory.

पारायणिकः-पारायणं निर्वर्तयति One who recites a text regularly.

पारयुगीन-वि.a परयुगे साधुः (1) Good at the yoke of others (2) Good for another *yuga* (a unit of time)

पारावारीण-वि.a (1) उभयतीरगामी One who goes to both the sides (2) शास्त्रादिसंबद्धसर्वविषयज्ञः Completely conversant with

पारिखेयी भूमिः-परिखायोग्या भूमिः The land which is useful for a mote.

पारिणाह्यम् } **पारीणाह्यम्** } गृहोपकरणानि शय्यासनादीनि House hold furniture and utensils.

पर्याप्तः मनोरथः-अभिलाषः संपूर्णः The desire is fulfilled. (used in a sarcastic way) 'तस्य भार्या हृता सीता पर्याप्तस्ते मनोरथः' (भा.ना.च.308)

पारस्त्रैणेयः-परस्त्रियाः अपत्यम् (उभयपदवृद्धिः) Son got through other's wife.

पारिमुख्यः-सेवकः। स हि यतो यतः स्वामिनो मुखं तत्र सन्निहितो भवति A servant.

पारीणः-पारं यः गच्छति (1) Being on or going over to the other or opposite side (2) Completing a work.

पारेगङ्गम्-(अव्य.Ind.) गङ्गायाः परं तीरम् Other side of गङ्गा। 'पारेपरार्धं गणना' इत्यादयः।

पार्थिव-वि.a (1) पृथिव्याः निमित्तम्, संयोगः उत्पातो वा That which is the cause or is connected with or omenous of the disaster of the earth. (2) पृथिव्याः ईश्वरः

विदितो वा Lord of the earth or known to the world.

पार्याप्तिकः-(1) किमिदं पर्याप्तम् इति यः पृच्छति One who asks - 'is it enough?' (2) पर्याप्तम् इति यः वदति One who says 'it is enough'.

'घृतस्य लेशं दत्वालमिति पार्याप्तिकोऽवदत्।
स किंकर्तव्यतामूढोऽब्रवीत् पार्याप्तिकोऽप्यलम्॥'

पार्श्वकः-अनृजुः उपायः पार्श्वम्। तेन यः अन्विच्छति One who employs unfair methods (कौ.1875)

'दशैवासन् किलच्छात्राः कोऽयमेकादशोधुना।
सोऽयं मन्त्रिसुहृत्पुत्रः पार्श्वकोऽयं न जल्प्यताम्॥'

पार्श्वोपपीडं शेते
पार्श्वयोः उपपीडं शेते
पार्श्वाभ्यां उपपीडं शेते } पार्श्वयोः उपपीड्य (यथा पीडा भवति तथा) शेते Lies pressing the sides (of the body) 'उप' पूर्वेभ्यः पीड-रुध-कर्षधातुभ्यः, तृतीयान्ते सप्तम्यन्ते च उपपदे णमुल् स्यात् To the roots 'पीड्' 'रुध्' and 'कर्ष्' Preceded by तृतीयान्त or सप्तम्यन्त, णमुल् (अम्) is added. (समासः वैकल्पिकः। समास is optional) 'अधरोपपीडं चुम्बति' 'स्तनोपपीडम् आलिङ्गते' इत्यादि। (कौ.3370)

पाश्या-पाशानां समूहः। जालम् A heap of snares or ropes. A net.

पिङ्गलजापानः
जापानपिङ्गलः } पिङ्गलवर्णः जपानदेशीयः A Japanese man of yellow colour. पदपौर्वापर्ये अनियमः Order of words is optional. (प्र.स.2200)

पिटक्या-पिटकानां समूहः Multitude of boxes or baskets.

पिण्डीशूरः-गेहे एव शूरः (पिण्डी=गृहम्) Brave in the house. Boaster.

पितरति-पितेव आचरति Behaves or does like father.

पितरं संजानीते
पित्रा संजानीते } पितरं प्रत्यभिजानाति Recognises his father. 'सम्' पूर्वकस्य ज्ञाधातोः प्रयोगे वा तृतीया। 'ज्ञा' with 'सम्' optionally governs तृतीया

पितरिशूरः-पितृविषये शौर्यप्रदर्शकः One who shows his bravery towards his father only. (अलुक्समासः)

पितुःपुत्रः-Son of the father. 'होतुः अन्तेवासी' (अलुक्समास)

पितुः अन्तेवासी-Student of the father. See 'होतुरन्तेवासी' (कौ.981)

पितृभोगीणः-पितृभोगाय हितः Helpful to his father.

पितृभ्यः स्वधा-Offer to the manes. 'स्वधा' (Ind.) governs चतुर्थी। 'स्वधा' इत्यव्यये उपपदे चतुर्थी भवति। पित्रुद्देशेन द्रव्यत्यागे 'स्वधा' उपयुज्यते। 'स्वधा' is uttered while offering something to the manes.

पितृस्थानीयः-पित्रा तुल्यः Like a father. 'भ्रातृस्थानीयः' 'मातृस्थानीया' इत्यादयः (कौ.2082)

पिष्टपेषणम्-कृतस्यैव (वृथा) पुनः करणम् Grinding.

पीठिकामण्डितम्-पुस्तकभूमिकानां पठनेन लब्धः पाण्डित्याभासः Superficial knowledge acquired by reading introduction of books. The flour. A vein profitless repetetion.

पीतघृतः
घृतपीतः } पीतं घृतं येन One who had swallowed ghee. पदयोः क्रमे विकल्पः The order of words is optional (प्र.स.2254)

पीतमघः } See पीतघृतः। (प्र.स.2254)
मघपीतः } He who swallowed the offerings of *Yajña*.

पीततैलः } See पीतघृतः (प्र.स.2254)
तैलपीतः } He who swallowed oil.

पीतविषः } See पीतघृतः
विषपीतः } He who swallowed poison.

पीत्वास्थिरकः-मद्यपानेऽपि अचापल्यः One who is calm and composed even after taking liquor. (प्र.स.2166)

पीलुकुणः-पीलुवृक्षाणां फलानां वा पाकः Ripening of the *Pīlu* trees or of *pīlu* fuits. एवम् शमीकुणः, अश्वत्थकुणः, कर्कन्धुकुणः, करीरकुणः, कुवलकुणः, बदरकुणः, पुष्पकुणः, कर्कन्धूकुणः, खदिरकुणः, बदरीकुणः, कुवलीकुणः

पुण्यसमम्-अव्य.Ind. पुण्यः वत्सरः Auspicious year (प्र.स.2084)

पुटापुटिका-अर्धविकासादिना महाल्परूपं संपुटं पुटापुटिका The state of being half closed and half open. (प्र.स.2154)

पुण्यश्लोकः-पुण्य इति यः स्तूयते One who is well spoken of, whose name is Auspicious to repeat or utter. A man of good fame.

पुण्येन दृष्टो हरिः-*Hari* was seen on account of *Puṇya*. हरिदर्शने पुण्यं हेतुः। हेतुवाचकं तृतीयायां प्रयुज्येत The word which denotes something which is the reason for something to happen is used in तृतीया। 'तस्य वचनेन देवदत्तः कुपितः' इत्यादयः

पुत्रकः-अनुकम्पितः पुत्रः The son who is to be pitied. 'रामबाणविद्धं वालिनं पुत्रकः अङ्गदः उपससर्प' इत्यादयः

पुत्रम् अन्नं भोजयति-Makes the son eat food. भोजनार्थाः णिजन्ता धातवः द्विकर्मकाः Roots in the sense of eating when they are used in causative form govern two objects.

पुत्रकाम्यति-पुत्रम् आत्मन इच्छति Wants a son for himself. (कौ.2663)

पुत्रपौत्रम्-पुत्राश्च पौत्राश्च तेषां समाहारः पुत्रपौत्रम् Sons and grandsons द्वन्द्वे एकवचनमेव *Dvandva* with these words should be used only in singular (प्र.स.2317)

पुत्रपौत्रीण-वि.a (1) पुत्रान् पौत्रांश्च अनुभवति यः Who enjoys sons and grandsons (2) पुत्रपौत्रादिक्रमेण अन्वागतम् Transmitted from son to son, Heriditory.

'पुत्रवती त्वया', 'पुत्रवती तेन'-'Having you as her son' Having him as her son'. 'पुत्रवती' 'भर्तृमती' 'पुत्रवान्' 'भार्यावान्' associated with a noun in instrumental case convey similar meaning. 'रामेण दशरथः पुत्रवान्' रामः दशरथस्य पुत्रः इत्यर्थः। 'अहं तेन मित्रवान्' सः मम मित्रम् इत्यर्थः I have a friend in him. 'यस्याः शक्रसमो भर्ता मया पुत्रवती च या' (भा.ना.च.259)

पुत्रहती, पुत्त्रहती } या पुत्रान् बाधते
पुत्रजग्धी, पुत्त्रजग्धी } (निन्दामात्रमेव। हन्ति, अत्ति इति न अर्थः) A woman who gives trouble to her children (used in the sense of abuse)

पुत्त्रादिनी-पुत्राणां क्लेशकारिणी See above.

पुत्रादिनी - (व्याघ्री) या सत्यमेव पुत्रान् अत्ति A tigress who eats its cubs really.

पुत्रीय, पुत्र्य-वि.a पुत्रस्य निमित्तम्, संयोगः, उत्पातो वा That which is the cause of a son, or connected with the son, or ominous to the son.

पुत्रीयति-(1) पुत्रम् आत्मन इच्छति Wants a son. मित्रीयति, भ्रात्रीयति इत्यादयः (2) पुत्रमिव आचरति (शिष्यम्) He treats the student as his son.

पुत्रेण सह आगतः पिता-Father has come with his son. सह साकम्, समम्, सार्धम्-एतेषामव्ययानां प्रयोगे तृतीया भवति The indeclinables सह, साकम्, समम् and सार्धम् govern तृतीया of the word denoting a thing or person of secondary importance in the action.

पुत्रौ-पुत्रश्च दुहिता च पुत्रौ Son and daughter (कौ.934)

पुमनुजा-पुमांसम् अनुसृत्य जाता Girl who is born after a male child (boy) एवं 'स्त्र्यनुजः' इत्यादि 'क्रोधानुजं पापम्' इत्यादि (कौ.3009)

पुंनागः-पुमान् नाग इव Elephant like strong man. See 'गोवृन्दारक'

पुरुषसिंहः-पुरुषः सिंह इव 'Lion like man'. Brave man. See 'गोवृन्दारक'

पुरंदरः-(शत्रूणां) पुरं दारयतीति पुरंदरः । इन्द्रः । God *Indra* (कौ.2957)

पुराणकाव्यपदच्छेदग्रथनचर्मकारः-प्राचीनकाव्यगतविषयाणां हर्ता A cobbler stiching the words tornout from earlier *kāvyas*'. One who is engaged in Plagiarism. (पद्यप्राभृतकम्)

पुरा भुङ्क्ते-भोक्ष्यते He will eat. 'पुरा' इत्यव्ययेन योगे भविष्यदर्थे लट् भवति । When 'पुरा' is used 'लृट्' is replaced by लट् । 'पुरा गच्छामि' 'पुरा पश्यामि' इत्यादयः (कौ.2183)

पुरुषवाहं वहति-भृत्यो भूत्वा वहति He carries him like a servant, carries the master. (कौ.3365)

पुरुषस्नायं वर्षति-यथा पुरुषः सिक्तः भवति तथा वर्षति It rain just enough to drench a man. 'गात्रस्नायं लोहितं जलं सिञ्चति होलिकायाम्' इत्यादि ।

पुरुषायुषम्-पुरुषस्यायुः पुरुषायुषम् The life span of a man. (अकारान्तत्वं विशेषः) (कौ.945)

पुरुषोत्तमः } Great person. पदक्रमे
उत्तमपुरुषः } अनियमः Order of words is optional. (प्र.स.2199)

पुरुषोद्धः-श्रेष्ठः पुरुषः Praise worthy man. See अश्वमतल्लिका 'गवोद्धः' इत्यादि

पुरोभागिता } परगतदोषैकदर्शित्वम्
पौरोभाग्यम् } The habit of finding faults only. (of others)

पुरोभागिन्-दोषैकदृक् One who finds only faults.

पुष्पवन्तौ-सूर्यचन्द्रौ Sun and Moon

पुष्पाग्रम् } पुष्पं च तत् अग्रं च अथवा अग्रं
अग्रपुष्पम् } च तत् पुष्पं च । पदयोः क्रमे अनियमः Order of words is optional (का.अ.सू.5-19)

पुष्पेभ्यः स्पृहयति-Aspires for flowers स्पृहधातोः प्रयोगे ईप्सितस्यार्थस्य वाचकः चतुर्थ्यां प्रयोक्तव्यः when the root स्पृह् is used the thing which is aspired for is used in चतुर्थी । (कौ.574)

पुंसानुजः-यस्याग्रजः पुमान् सः One whose elder one is a man (brother)

पुस्तकम् आरोपयति-पुस्तके लिखति Enters the register 'योधपुरुषाणां नामानि पुस्तकमारोपयति कुमारः, (भा.ना.च.399)

पूगतिथ-वि.a (पूग+तिथुक्) समूहपूरकः । समूहः Multitude.

पूतयवम्-अव्य.Ind. पूताः शूर्पक्रियया शोधिताः यवाः यस्मिन् काले सः The time when the यवs are winnowed. (प्र.स.2084)

पूतिगन्धिः-पूतिः गन्धः यस्य सः Having stinking smell. See 'उद्गन्धिः' । (कौ.874)

पूपीयम् } **पूप्यम्** } पूपाय हितम् Suitable for a पूप, a kind of bread.

पूयमानयवम्-अव्य.Ind. पूयमानाः यवाः यस्मिन् काले सः. The time when the *yavas* are being winnowed.

पूर्णपात्रस्य हरणम्-'उत्सवेषु सुहृद्भिर्यद्बलादाकृष्य गृह्यते। वस्त्रं माल्यं च तत्पूर्णपात्रं पूर्णनकं च तत्' । 'वर्धापकं यदानन्दादलं कारादिकं पुनः। आकृष्य गृह्यते पूर्णपात्रं पूर्णनकं च तत् ।' The ornaments or garments etc., which are taken by force by friends and others from some one who had received glad tidings. (काद.)

पूर्तादाने-दाने पूर्तवान् One who had given or established पूर्तं । See इष्टापूर्त

पूर्यति-पुरम् आत्मन इच्छति One who wants a town for himself. (who wants to reside in a town.)

पूर्वः ग्रामात्-ग्रामात् पूर्वदिग्भागे स्थितः Situated at the East to the village. Words like पूर्व which denote direction, govern पञ्चमी, अपरः ग्रामात् दक्षिणः ग्रामात् इत्यादयः ।

पूर्वतारम्, पूर्वतीरम्-Eastern bank. See 'उत्तरतारम्' ।

पूर्ववादिन्-अभियोगकारी Complaint or plaintiff.

पूर्वापरम् } **पूर्वापरौ** } पूर्वश्च अपरश्च Earlier one and latter one पूर्वापरयोः द्वन्द्वः वा एकवत् भवति The *Dvandva* of above words is optionally used in singular number. (प्र.स.2318)

पूर्वाह्णेकाले } **पूर्वाह्णकाले** } During morning time. (*Aluk* Optional) (कौ. 975)

पूर्वाह्णेतने, पूर्वाह्णतने-पूर्वाह्णसंबद्धे That which is connected with morning. (*Aluk* optional) (कौ.975)

पूर्वाह्णेतमे, पूर्वाह्णतमे-अतिशयिततमे पूर्वाह्णे In the earliest morning (early hours) (*Aluk* is optional) (कौ.974)

पूर्वाह्णेतरे, पूर्वाह्णतरे-अतिशयिते पूर्वाह्णे In the early morning (*Aluk* optional) (कौ.974)

पूर्वी-पूर्वं कृतमनेन One who did earlier (कौ.864)

पूर्वेण ग्रामम् } **पूर्वेण ग्रामस्य** } ग्रामसमीपे पूर्वभागेन Towards east near the village. 'पूर्वेण' इति एनबन्ताव्ययेन योगे द्वितीया षष्ठी वा । 'पूर्वेण' (Ind.) Governs either द्वितीया or षष्ठी ।

पृथुकीयाः } **पृथुक्याः** } (1) पृथुकेभ्यः इमे (व्रीहयः) The rice meant for preparing. पृथुकs (boiled rice) (2) पृथुकाय हितं Good or fit to the child.

पृष्ठतः कृत्वा-अविगणय्य Having neglected. Without hearing. 'लज्जां' पृष्ठतः कृत्वा' (काद.पृ.345), 'गुरुवचनं पृष्ठतः कृत्वा' इत्यादि ।

पैत्तिकम्-पित्तस्य कोपनं शमनं वा That which increases or decreases *Pitta*.

पोतकम्-तुलामानादिनिर्धारणम् Standardisation of weights and measures.

पोत्या-पोतानां समूहः Multitude of boats.

पौरस्त्य-वि.a पुरः भवः जातो वा Prior foremost. (2) प्राच्यां भवः Eastern.

पौरुष, पुरुषद्वयस, पुरुषमात्र, पुरुषदघ्न-पुरुषः प्रमाणमस्य Of man's height.

पौरुषेयः-(1) पुरुषस्य वधः Murder of a man. (2) पुरुषस्य विकारः Produced out of man (3) पुरुषाणां समूहः Group of men (4) पुरुषेण कृतः Made by man.

पौरोभाग्यम्-See पुरोभागिता

पौंस्नम्-पुंसः भावः Manliness.

प्रकुरुते-(1) अनुचितं प्रवर्तते Misbehaves अनुचित प्रवर्तनार्थे 'कृञ्' धातुः आत्मनेपद्येव In the sense of misbehaving 'कृ' takes A.P. only. परदारान् प्रकुरुते Misbehaves with the wife of an other man. (2) कथयति Narrates. गाथाः प्रकुरुते Sings *Gāthas* well (2) उपयोगं कुरुते Utilises . शतं प्रकुरुते Utilises hundred for a good cause. कथनोपयोगार्थयोः कृञः आत्मनेपदमेव। In the above two senses also 'कृ' should be used in *ātmanepadī* only. (कौ.2705)

प्रकृतिकोपः-प्रकृतीनाम् अमात्यादीनां प्रजानां च प्रकोपः Revolt of the officers and other people against the ruler. 'प्रकृतिकोपः सर्वकोपेभ्यो गरीयान्' (चाण.नी.सू.12)

प्रकृतिपुरुषः-प्रधानः अधिकारी A principal officer. 'जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः' (मेघ.I)

प्रकृतिस्थशरीरः-स्वस्थशरीरः One who is in his normal condition of the body. 'दिष्ट्या प्रकृतिस्थशरीर आर्यपुत्रः' (भा.ना.च.28)

प्रकृतीभूतः-स्वाभाविक इव संवृत्तः Which has become a natural thing. 'मातुलकुले वर्तमानस्य प्रकृतीभूतस्ते विप्रवासः' (भा.ना.च.पृ.308)

प्रग्राहः-(A) लाभेच्छया कस्यचिद्ग्रहणम् Holding something with monetary interest, kidnapping, holding for ransom.

प्रग्रहः-(B) ग्रहणं कयापि लाभेच्छया विना Holding 'भिक्षोः पात्रप्रग्रहः' (कौ.3221)

प्रचायः-(A) हस्तेन समीपस्थस्य ग्रहणम् Collecting something, which is within the reach, with hand. पुष्पप्रचायः Collecting flowers which are within the reach of hand.

प्रचयः-(B) दूरस्थानां ग्रहणम् Collecting something which is beyond reach of hand. यष्ट्या फलानां प्रचयं करोति। चौर्येण ग्रहणे तु 'प्रचयः' एव If the collection involves theft प्रचय only 'पुष्पप्रचयः चौर्येण' (कौ.3212)

पृच्छति माणवकं पन्थानम्-Enquires about the way with the boy. 'प्रच्छ्' धातुः द्विकर्मकः। $\sqrt{\text{प्रच्छ्}}$ to question or enquire governs two objects.

प्रजाभ्यः स्वस्ति-May there be prosperity to all the people. 'स्वस्ति' इत्यव्ययस्य प्रयोगे चतुर्थी। 'स्वस्ति' governs चतुर्थी।

प्रज्ञाचक्षुः-आजन्मान्धः One who is blind from his birth. "Having intellect only as his eye."

प्रज्ञुः-प्रगतौ जानुनी यस्य सः One whose knees are widely spread (कौ.838)

प्रणसः-प्रगता विस्तीर्णा नासिका यस्य सः One whose nose is wider. (कौ.859)

प्रणाय्यः-(A) (1) प्रीत्यनर्हः चोरादिः One who or which does not deserve to look at (2) विरक्तः (विद्यादिषु अन्तेवासी) Disinterested.

प्रणेयः- (B) प्रणेतुम् अर्हः One who is to be taken out.

प्रणेतृसारथिः-Charioteer. Driver (बु.च.III. 59)

प्रतपनेकृत्य, प्रतपनेकृत्वा
वितपनेकृत्य, वितपनेकृत्वा } तापयित्वा Having made hot (ग.र.म.पृ.140)

प्रतिकञ्चुक-वि.a प्रतिभटः An adversary

प्रतिकः-कार्षापणेन क्रीतः That which is bought for a *Kārṣāpaṇa* (a coin)

प्रतिक्षिपति-Throws against प्रतिपूर्वः क्षिपधातुः परस्मैपदी, √'क्षिप्' with 'प्रति' takes only p.p. (कौ.2746)

प्रतिजनीनः-प्रतिजनं साधुः Good towards each and every person.

प्रतिदिशम्-(अव्य.Ind.) दिशः प्रति। सर्वासु दिक्षु Towards all the directions or in every direction. (प्र.स.2091)

प्रतिबोधनम्-निर्दुष्टं ज्ञानम् Correct and clear understanding of the subject. 'प्रतिबोधनं भवति' (पं.तं.पृ.2)

प्रतिभूः-यदि सः न दास्यति अहं दास्यमि इत्यादिरीत्या यः प्रतिज्ञां करोति सः Bail. Surity. 'यदि मे प्रतिभूश्चतुर्षु राजन् भवसि त्वं न तपोवनं श्रयिष्ये' (बु.च.V.34)

प्रतिलोमम्-(अव्य.Ind.) प्रतिगतं लोम प्रतिलोमम् Against. प्रति-अनु-अवपूर्वः लोमन्शब्दः अकारान्तो भवति। 'लोमन्' changes into 'लोम' when it is preceded by प्रति, अनु and अव (कौ.943)

प्रतिलोमसंभाषा-See निगृह्यसंभाषा

प्रतिशरदम्-(अव्य.Ind.) शरदृतुं प्रति Towards the autumn season (अकारान्तत्वं विशेषः) (प्र.स.2091)

प्रतिष्कशः-(A) सहायः। पुरोगामी A helper. Fore runner.

प्रतिकशः-(अश्वः) (B) The horse who defied whip (p.239) (कौ.1066)

प्रतिष्किरति सिंहो नरम्-भूमौ विक्षिप्य हन्ति Throws on the ground and kills. (प्र.स.18)

प्रतिष्णातम्-(A) शुद्धं सूत्रम् Pure thread.

प्रतिस्नातम्-(B) जलक्लिन्नम् Drenched wet.

प्रतिसंविद्-एकस्य विषयस्य निर्दुष्टं ज्ञानम् Accurate knowledge of a particular thing.

प्रतिहस्तः-प्रतिनिधिः Deputy Agent. Substitute. Proxy.

प्रतिसंवेदनम्-केनचिद्विषयेण संबद्धानां सर्वेषामंशानां निवेदनम् Giving detailed information about.

प्रतीपायते-(1) अप्रतीपः प्रतीपः भवति Becomes unfavourable (2) अप्रियम् अनुभवति Suffers a thing which is not liked by him.

प्रत्यक् ग्रामात्-To the west of the village. See प्राक् ग्रामात्

प्रत्यन्तविषयः-समीपवर्ति देशान्तरम्। सीमान्तः Neighbouring Country. Border province.

प्रत्यर्थम्-अव्य.Ind. अर्थमर्थं प्रत्यर्थम् Every object. 'प्रतिगृहम्' इत्यादि (कौ.652)

प्रत्युत-अव्य.Ind. तद्विपरीतया रीत्या On the contrary, on the other hand.

प्रत्युत्थानम्-आगच्छतः गुर्वादीन् दृष्ट्वा आसनतः उत्थानम् Rising from one's seat (as a mark of respect) to welcome a visitor.

प्रत्युद्गम्-माननीयान् आगच्छतः दृष्ट्वा तदभिमुखं गमनम् To go towards somebody as a mark of respect.

प्रत्युत्पन्नमतिः-सद्यः चिन्तयित्वा निर्णेतुं शक्तः Having presence of mind. (पं.तं.पृ.67)

प्रत्युपानहम्-अव्य.Ind. सर्वेषु उपानत्सु In every shoe (अकारान्तत्वम्) (प्र.स.2090)

प्रत्युरसम्-अव्य.Ind. उरसि अथवा उरः (द्वि.वि.) On the chest or the chest (Accusative case) (प्र.स.2097)

प्रथमः कल्पः-उत्तमः पक्षः "Oh! It is the best method."

प्रथयति-पृथुं करोति Makes bigger or wider. Spreads

प्रदक्षिणम्-अव्य.Ind. प्रकृता दक्षिणा अत्रेति प्रदक्षिणं यज्ञः A sacrifice where *Dakṣinā* is being given (प्र.स.2085)

प्रद्युम्नः कृष्णात् प्रति-प्रद्युम्नः कृष्णस्य प्रतिनिधिः *Pradyumna* is the deputy of *Kṛṣna*. प्रतिनिध्यर्थकेन 'प्रति' इत्यनेन योगे पञ्चमी। 'प्रति' in the sense of 'a deputy' govern पञ्चमी। 'कार्यदर्शी मन्त्रिणः प्रति' इत्यादयः।

प्रपर्णः वृक्षः-प्रकृष्टं पतितानि पर्णानि यस्मात् सः The tree from which almost all the leaves have fallen. 'पतित' from the 'प्रपतितपर्ण' in बहुव्रीहि is dropped. मध्यमपदलोपी बहुव्रीहिः (कौ.830)

प्रपापूरणीयम्-प्रपापूरणं प्रयोजनमस्य That the purpose of which is to fill the water house. "अत्र प्रपापूरणीयमिदं शकटपञ्चकम्। विदेशमदिरापूर्णकाचपात्रसमञ्चितम्।"

प्रबाहुकम्-अव्य.Ind. (1) उच्चैः On high. (2)तस्मिन्नेव समये,तथैव At the same time.

प्रमदः-(A) हर्षः Happiness

प्रमादः-(B) अनवधानता Carelessness (कौ.3245)

प्रमृगम्-अव्य.Ind. प्रणष्टाः मृगाः यस्मिन् काले The time when the deer have perished or run away. (प्र.स.2085)

प्ररथम्-अव्य.Ind. प्रस्थिताः रथाः यस्मिन् काले The time when the chariots started. (प्र.स.2085)

प्रयुङ्क्ते-प्रयोगं करोति Uses. प्रपूर्वः युजधातुः आत्मनेपद एव। 'युज' with प्र takes A.P.

प्रशस्ययति-प्रशस्यमाचष्टे, करोति वा Says that it is good or does a good work.

प्रवकः-गमने निपुणः One who is good in going. (कौ.2911) Form from the root 'प्रु' to go.

प्रवहति-Flows प्रपूर्व वहधातुः परस्मैपदी। 'वह' with 'प्र' takes p.p. (कौ.2747)

प्रवाहिकातः कुरु-विषूचिकायाः प्रतीकारं कुरु Findout a remedy for small pox. (कौ.2116)

प्रवृत्तिपुरुषाः-वार्ताहराः Men collecting or bringing information for the king (भा.ना.च.पृ.398)

प्रवृत्तिमार्गः-कर्माद्याचरणम् Active worldly

life. Attachment to work and pleasures of the world.

प्रश्नदूतिः-ती-प्रहेलिका A riddle. An enigma.

प्रश्नविवाकः-कलहादिषु न्यायनिर्णायकः An arbitrator.

प्रष्ठः-(A) अग्रे यः गच्छति (गवादिः) He who goes in front.

प्रस्थः-(B) प्रस्थितः He who started to go. (कौ.2917)

प्रसक्तः-अविच्छिन्नः Continuous Endless. 'सविश्रमो ह्ययं भारः प्रसक्तस्तस्य तु श्रमः' (भा.ना.च.पृ.11)

प्रसहनेकृत्य, **प्रसहने कृत्वा** प्रोत्साह्य। सामर्थ्यवन्तं कृत्वा Having encouraged. Having infused strength. (ग.र.म.पृ.140) सैन्यं प्रसहनेकृत्य स्थापयेद्रणमूर्धनि।

प्रस्तारः-(A) इष्टकादीनां भूमौ संनिवेशविशेषः Spreading of the bricks etc. in a particular form.

प्रस्तरः-(B) बर्हिषः मुष्टिविशेषः A bundle of handful of *Darbha* grass. (कौ.3202)

प्रस्थंपचा स्थाली-प्रस्थं पचतीति प्रस्थंपचा A vessel which cooks one *Prastha* of rice etc. एवं खारिंपचः कटाहः इत्यादि। (कौ.2948)

प्राकारीयः (देशः)-(1) प्राकारः अस्मिन् स्यात् The site where compound wall may be constructed (2) (**-इष्टकाः**) प्राकारार्थाः इष्टकाः, याभिः इष्टकाभिः प्राकारः निर्मातुं शक्यते Bricks with which compound wall can be constructed.

प्राक् ग्रामात्-To the East of the village 'अञ्चु' इत्यनेन अन्ते युक्तैः शब्दैः योगे पञ्चमी भवति। Words like 'प्राक्' which are formed by having 'अञ्चु' at the end govern पञ्चमी। 'प्रत्यक् ग्रामात्' इत्यादयः।

प्राजरुहाकृत्य, **प्राजरुहाकृत्वा** रोहयित्वा। शोभां कृत्वा Having made grown. Having made beautiful. 'प्राजरुहाकृत्य पर्जन्यो निवृत्तः' (ग.र.म.पृ.141)

प्राजर्याकृत्य, प्राजर्याकृत्वा, **प्राजुराकृत्य, प्राजुराकृत्वा** See बीजर्याकृत्य (ग.र.म.पृ.141)

प्राणिधर्मानुष्ठानम्-प्रातःकालिककृत्यसमापनम् Attending to nature's call. 'नैत्यकावसाने प्राणिधर्ममनुतिष्ठति मयि को नु खलु' (भा.ना.च.276)

प्रातरित्वा-प्रातः एतीति प्रातरित्वा One who goes in the morning.

भिक्षुकः प्रातरित्वायं प्रादुष्कृत्य स्वनिःस्वताम्।
प्राभूतिकः स्तौति दातॄन् अदातारं विनिन्दति'॥

प्रातस्तराम्-अव्य.Ind. अधिकं प्रातः Very early morning.

प्रातिजनीन-वि.a प्रतिजने (शत्रुविषये) साधुः Suitable against an adversary.

प्रातिदैवसिक-वि.a यत् प्रतिदिनं भवति Accuring every day.

प्रातिभाव्यम्-प्रतिभुवः कर्म Standing Bail or security.

प्राध्वः (रथः) प्रगतः अध्वानं प्राध्वः The chariot which has reached the road. (प्र.स.2355)

प्रादुष्कृत्य, **प्रादुष्कृत्वा** प्रादुर्भूतं कृत्वा Having made it appear (समासः वैकल्पिकः)

प्रापयति-प्रियमाचष्टे करोति वा Tells or does a good thing, which is liked.

प्राप्तकालम्-यस्य युक्तः कालः संप्राप्तः That for

which proper time has come. 'प्राप्तकालं विज्ञापयामि' (पं.तं.पृ.319)

प्राभूतिकः-(1) 'प्रभूतं भवतां धनधान्यादिकम् अभीष्टं स्यादिति प्रियाशिषं वदन्नेवमुच्यते' (ग.र.म.पृ.403) One who says "let there be all round prosperity to you". (2) प्रभूतम् इति यः आह स प्राभूतिकः One who says there is plenty.

प्रायौगिकम्-प्रयोगमर्हति अथवा प्रयोगे भवं That which should be put in practice or connected with practice.

प्रावासम्-प्रवासे दीयते कार्यं वा That which is given in exile or done in exile. दूरदेशे स्थितस्य क्षेमार्थं बन्ध्वादिभिः क्रियमाणं दानादिकं अथवा प्रवासगतेन कर्तव्यं भवेत् This may be something which is done at home by the members of the family for the well-being of a person staying abroad.

प्रावासिकः-प्रवासे साधुः Good and useful when abroad (while going on a camp)

प्रावृषेण्य-वि.a प्रावृषि दीयते कार्यं वा That which is given or to be done during the rainy season.

प्राशित्रम्-प्राशिता प्राप्तः अस्य That for which the eater has come.

प्रासङ्ग्यः-वत्सानां दमनकाले स्कन्धे यत् काष्ठम् आसज्यते स प्रासङ्गः । तं यः वहति सः गौः A daught ox. (लक्षणया अन्येष्वपि अस्य प्रयोगः कर्तुं शक्यते)

प्रासादात् प्रेक्षते-प्रासादम् आरुह्य प्रेक्षते Standing on the terrace he sees (from there) ल्यबन्तस्य लोपे पञ्चमी When a ल्यबन्त (like आरुह्य) is not used but implied the कर्म of the implied root is used in पञ्चमी । एवम् 'वृक्षाग्रात् अवलोकयति' इत्यादयः

प्रासादारोहणीयम्-प्रासादारोहणं प्रयोजनमस्य That which is meant for climbing the terrace (stair case etc.)

प्रासादीयति-प्रासादे इव आचरति Behaves or thinks as though living in a mansion 'प्रासादीयति कुट्यां भिक्षुः'

प्रासादीयं (दारु)-प्रासादः अस्य स्यात् । प्रासादाय पर्याप्तम् । That which (wood etc) is enough for a mansion.

प्रास्तारिकः-प्रस्तारे क्रिया यथा अनुष्ठीयते तां तथैव अनुतिष्ठति यः One who does the work as it should be done in spreading or fixing things.

प्रास्थिकः (राशिः)-प्रस्थः परिमाणम् अस्य Heap of grain of one *Prastha*.

प्रास्थिक-वि.a (1) प्रस्थस्य वापः (उप्यते अत्रेति वापः क्षेत्रम्) The field in which one *Prastha* of seeds is to be sown (2) प्रस्थं स्वस्मिन् आवेशयति (vessel) which can contain or hold one *Prastha*.

प्रास्थिकी-प्रस्थम् अवहरति (उपसंहरति) पचति वा A woman who collects a *Prastha* or who can cook one *Prastha*.

प्राह्णेतमाम्-अतीव प्रातः Early in the morning.

प्रियंकरः }
प्रियकारः } प्रियं यः करोति Which or who does something which is liked.

प्रियं करणम्-अप्रियं प्रियं कुर्वन्ति अनेन That by which a thing which is not liked is made as a thing to be liked.

प्रियदर्शनः-आनन्दकरदर्शनः Pleasing to look at or pleasing appearance.

प्रियंभविष्णुः }
प्रियंभावुकः } अप्रियः प्रियः भवतीति One which is going to be liked though it was not liked earlier.

प्रियप्रियेण ददाति } अतिप्रियमपि वस्तु
प्रियेण ददाति } अनायासेन ददाति He gives away even a much liked thing without any difficulty or hesitation (कौ.2148)

प्रियंवदः-प्रियं यः वदति One who speaks words to the liking of others. (कौ.2953)

प्रियाकरोति-अनुकूलाचरणेन आनन्दयति Pleases by doing things favourable.

प्रियाकरोत्यमुं भार्या सर्वदैव प्रियंकरी।
दुःखाकरोत्यसौ तां तु पुरोभागिशिरोमणिः ॥

प्रेक्षाकारी-बुद्धिमान् । सम्मग्विचिन्त्य कार्यकारी Wise. Prudent, Circumspect.

प्रेहिवाणिजा-प्रेहि, म्रियस्व, वाणिजा इति यस्यां क्रियायाम् सा । अथवा 'आगच्छ' इत्यर्थः The act in which it is said Oh! merchant, 'may you die'; or 'Please come'. See 'एहि वाणिजा'

प्रेहिस्वागता-See एहिस्वागता

प्रोत्क्षिप्तस्तनी-उन्नतीकृतस्तनी Having her breasts propped up. (क्षेमे)

प्रोष्ठपदः-प्रोष्ठस्य (वृषभस्य) पादाविव पादौ यस्य सः One whose legs are like those of a bull. (कौ.890)

प्रोष्यपापी-प्रोष्य वियुक्तो भूत्वा पापीयान् विरूपकः One who has become ugly and completely changed after going on an exile. 'राघवः प्रोष्यपापीयान् जहीहि तमकिञ्चनम्' (ग.र.म.पृ.162) स्वगृहप्रवासात् मलिनो जातः One who has become a man of bad characters after leaving his home. (प्र.स.2166)

प्रोहकटा-(1) प्रोह कटम् इति यस्यां क्रियायां सा The act in which it is said arrange and spread the gross so as to prepare a mat. (प्रोहणं वीरणादेः कटादिभावाय विरचना) (2) प्रोह (आहर) कटम् इति यस्यां क्रियायाम् The act where it is said 'bring the mat'. (प्र.स.2166)

प्रोहकपर्दा-प्रोह अपनय कपर्दं केशकलापं, वराटकं वा, इति यस्यां क्रियायाम् The act where it is said remove the lock of hair or take away the chowry (a coin)

प्रोहकर्दमा-प्रोह (आहर) कर्दमम् इति यस्यां क्रियायां सा The act where it is said bring the mire (प्र.स.2166)

'कुतोऽत्र मित्र महती वर्तते प्रोहकर्दमा।
आयान्ति प्रतिपक्षीयास्तेषु स्वागतसंभ्रमः ॥'

प्रोह्यपदि धावति-प्रोह्य पादौ धावति Raising the feet, he is running.

प्रोह्यपदि आस्ते-जानुनि पीठादौ वा क्वचित् पादमारोप्य आस्ते He stands keeping the foot on some elevated place (प्र.स.2268)

फलकशयनम्-रुग्णान् नेतुम् उपयुक्तं फलकाकारं शयनम् A stretches for carrying the sick. 'ततः प्रविशति यौगन्धरायणः बद्धबाहुः फलकशयनेन नीयमानः (भा.ना.च.)

फलभारम् आपणं वहति-Takes the load of fruits to the market. 'वह' धातुः तत्समानार्थकाश्च धातवः द्विकर्मकाः। 'वह्' and its synonyms govern two objects.

फलीकृत्य-विकृतं कृत्वा Having disfigured (ग.र.म.पृ.137)

फलेग्रहिः } यः फलानि गृह्णाति One which
फलेग्राही } becomes fruitful. Which bears fruit.

फलेभ्यः याति-फलानि आहर्तुं याति Goes to bring fruits. क्रियार्थायां क्रियायां तुमुनः

अप्रयोगे प्रयोजनवाचकक्रियायाः कर्म चतुर्थ्यां प्रयुज्यते When one action is done for another action the word denoting the second action is used as तुमुन्नन्त i.e. the suffix 'तुम्' is added to the root. Eg. 'फलानि आहर्तुं याति' etc. But when 'तुम्' is not used, but its sense is implied चतुर्थी is used with the object of the implied तुमुन्नन्त। 'शिवाय नमस्करोमि' शिवम् अनुकूलयितुं नमस्करोमि इत्यर्थः । 'धनाय देशान्तरं गच्छति' धनम् अर्जयितुं गच्छति इत्यर्थः। इत्यादयः ।

फाण्टम्-(A) कषायादिकम् अनायासकृतम् Decoction.

फाणितम्-(B) प्राप्तम् Reached.

फेनायते-(1) फेनम् उद्वमते Emits foam (2)**फेनायन्ते**-अफेनाः फेनाः भवन्ति फेनायन्ते बुद्बुदाः The bubles which were not foam become foam.

बकव्रतिकः-बकस्य व्रतं यः आचरति । वञ्चकः । दाम्भिकः One who behaves like a crane which stands still to catch the fish. Hypocrite. (मनु.स्मृ.4.192)

बधिरकर्णजापः-बधिरस्य कर्णे रहस्य कथनम् । व्यर्थः प्रयासः Whispering the ear of a deaf man.

बद्धमुष्टिः-लुब्धः Close fisted. Miser. (क्षेमे)

बन्धुता-बन्धूनां समूहः Group of relatives

बम्भज्यते-कुत्सितं भनक्ति Breaks in a bad manner. (कौ.2640)

बलिं याचते वसुधाम्-He requests Bali for land. 'याच्' धातुः तत्समानार्थकाश्च धातवः द्विकर्मकाः । याच् and its synonyms govern two objects 'धनिनं धनम् अभ्यर्थयते' इत्यादि

बलूलः-बलं न सहते One who cannot withstand strength.

बहयति / **भवयति** } बहून् करोति Makes many.

बंहयति-बहुलम् आचष्टे अथवा करोति Says that it is very much or does much.

बहुकः-बहुभिः क्रीतः Bought for many (Rupees etc.)

बहुनिष्कम् / **बहुनैष्किकम्** } बहुभिः निष्कैः क्रीतम् Bought for many Niskas

बहुजगद पुरस्तात्, तस्य मत्ता किलाहम्-"It seems, being under the intoxication of wine I said many things before him. मत्तायाः भाषणे परोक्षसदृशत्वात् लिडुत्तमपुरुषस्य प्रयोगः । लिट् can be used only to indicate an action of the past which was not seen by the speaker. (अनद्यतनपरोक्षे लिट्) Therefore the use of first person is not possible. Yet it can be used if the speaker is not in a position, for some reason, to know what he or she was doing. In the above example, the speaker, *Nāyikā*, was in a state of intoxication. So the use of 1st person is justified. एवम् - 'सुप्तोऽहं किल विललाप' इत्यादयः

बहुनिष्कम् / **बहुनैष्किकम्** } बहुभिः निष्कैः क्रीतम् Bought for many *Niṣkas*.

बहुतिथ-वि.a अधिकः । बहुपूरकः (बहु+तिथुक् प्रत्यय) Much long

बहुदृश्वन्-लोकगतिज्ञः Highly experience.

बहुपटुः-ईषदूनः पटुः Almost capable. एवं 'बहुधनी' इत्यादि । 'बहु' इति प्रत्ययः पदस्यादौ

प्रयुज्यते । 'बहु' is a suffix added at the beginning of the word.
बहुश्रुतः-तत्तत्कर्मसु अधिकज्ञानवान् Man of long experience and wide learning.
बाकम्-बकानां समूहः A group of cranes.
बाढम्-(A) अधिकम् । भृशम् Very much. Very strongly.
बाहितम्-(B) कृतप्रयत्नम् Tried
बाढम् -अव्य.Ind. निःसंशयमेवमेव Certainly, yes.
बान्धुमैत्रिकः-बन्धून् मित्राणि च यः पृच्छति One who enquires about relation and friends.
बालम् उल्लापयते-बालं वञ्चयति Deceives the boy. (कौ.2592)
बालः आदर्शे आत्मानं पश्यति-The boy sees himself in the mirror.
बालौ आदर्शे आत्मानं पश्यतः-The two boys see themselves in the mirror.
बालाः आदर्शे आत्मानं पश्यन्ति -The boys see themselves in the mirror. द्विवचने बहुवचने वा प्रयुक्तेऽपि विशेष्ये 'आत्मन्' शब्दः एकवचने एव प्रयोक्तव्यः । 'आत्मन्' शब्द should be used in sentence only in singular number though it refers to two or more objects or persons.
बालाय पायसं रोचते-Rice cooked in milk is to the liking of the boy. रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणः चतुर्थ्यां प्रयुज्यते The root 'रुच्' and its synonims govern Dative case. 'चूतं देवदत्ताय स्वदते' इत्यादि
बालेयाः-बलये इमाः Meant for *Bali* (Offering to birds etc. as food)
बालौ-बालश्च बालश्च बालौ Two boys.
बालाः-बालश्च बालश्च बालश्च बालाः एकस्यां विभक्तौ सरूपेषु शब्देषु एक एव शिष्यते When two or more than two words of the same form are used one is retained and other words are dropped in the same case. (कौ.188)
बाल्यात् प्रभृति-From Childhood प्रभृतिना योगे पञ्चमी । प्रभृति governs पञ्चमी (प्र.स.)
बाष्पायते-बाष्पम् उद्वमति Emits vapour or tears (कौ.2672)
बाहूबाहवि-बाहौ बाहौ च परस्परं गृहीत्वा इदं युद्धं प्रवृत्तम् Fight holding hand of one another. **बाहाबाहवि, बाहबाहवि** इत्यपि (प्र.स.पृ.311)
बिम्बाधरः / **अधरबिम्बम्** अधरः बिम्बम् इव बिम्बाधरः अथवा अधरबिम्बम् The lower lip which is like *Bimba* fruit. पदयोः क्रमे अनियमः । Order of words is optional. (प्र.स.2199) एवं 'बिम्बोष्ठम्' 'ओष्ठबिम्बम्' । (प्र.सं.2199)
बीजरुहाकृत्य / **बीजरुहाकृत्वा** बीजानि रोहयित्वा Having made the seeds sprout. (ग.र.म.पृ.140)
बीजाकरोति-बीजेन सह कर्षति Ploughs with the seed (after sowing the seed) (कौ.2129)
बीजर्याकृत्य / **बीजर्याकृत्वा** जीर्णं कृत्वा Having made it wornout (ग.र.म. पृ.140)
बीजाकृतम्- बीजावपनानन्तरं कृष्टं क्षेत्रम् The field which is ploughed after sowing the seeds.
बीज्यम्-बीजेभ्यः हितम् Good for seeds. Fit for seeds.

बुद्धिजीविन्-बुद्धिबलेन यः जीवति An intellectual.

बुभुक्षितं न प्रतिभाति किञ्चित्-Nothing occurs in the mind of a hungry man. प्रतिना योगे द्वितीया। 'प्रति' governs द्वितीया।

बृहायते-अबृहत् बृहत् भवति That which was not big become big.

बैडालव्रतम्-असाधोः बाह्या साधुप्रवृत्तिः "A cat like observance." Concealing one's malice or evil designs under the garb of piety or virtue.

बैडालव्रतिन् } स्त्रीणामलाभे
बैडालव्रतिकः } ब्रह्मचर्यव्रतावलम्बी One who leads a chaste life simply for want of female company and not because he controlled his senses, hypocrite. An imposter.

ब्रह्मणः प्रजाः प्रजायन्ते-जनिकर्तुः प्रकृतिः (उपादानकारणं) पञ्चम्यां प्रयुज्यते The material cause of something which comes to existence is used in पञ्चमी। एवं 'गोमयात् वृश्चिकाः जायन्ते' इत्यादि। निमित्तकारणवाचकादपि पञ्चमी इति केचित्। 'पुत्रात् प्रमोदो जायते' इत्याद्युदाहरणम्। According to some even the word denoting निमित्तकारण (efficient cause) also is used in पञ्चमी

ब्रह्मण्यम्-ब्रह्मणे हितम् Good or benificient to *Veda* or *Brahman*

ब्रह्मभूयम्-ब्रह्मणो भावः Becoming *Brahman*. Brahmahood.

ब्रह्मवद्यम् } वेदस्य वदनम् (उक्तिः)
ब्रह्मोद्यम् } Recitation of *Veda* (कौ. 2854)

ब्रह्मवर्चसम्-ब्रह्मणः वर्चः ब्रह्मवर्चसम् The lustre of a *Brāhmaṇa*. The lustre caused by Vedic studies. (कौ.946)

ब्रह्मवर्चस्य-वि.a ब्रह्मवर्चसस्य निमित्तम् संयोगः उत्पातो वा That which produces Brāhmic lustre or connected with it, or omenous to it.

ब्राह्मणकः-आयुधजीविनो ब्राह्मणाः यस्मिन् देशे सः That country where the *Brāhmaṇas* live by using weapons take part in battles as soldiers.

ब्राह्मणचेलः-दुष्टः ब्राह्मणः A wicked *Brāhmaṇa*. (ग.र.म.156)

ब्राह्मणजाल्मः-क्रूरः ब्राह्मणः A cruel *Brāhmaṇa*.

ब्राह्मणब्रुवः-ब्राह्मणधर्मविहीनः ब्राह्मणः। जातिमात्रोपजीवी (ग.र.म.156) *Brāhmaṇa* for name's sake. एवं 'क्षत्रिय ब्रुवः' 'मन्त्रिब्रुवः' इत्यादयः।

ब्राह्मणसेनम् } Army of the *Brāhmaṇas*
ब्राह्मणसेना } सेनान्तः तत्पुरुषः विकल्पेन नपुंसके प्रयुज्यते The word 'सेना at the end of तत्पुरुष takes neuter gender optionally. एवं 'क्षत्रियसेनम्' क्षत्रियसेना' इत्यादि (कौ.828)

ब्राह्मणिकल्पा-ब्राह्मणीलक्षणोपेता More or less a *Brāhmaṇa* woman. See सुन्दरितरा, (कौ.985)

ब्राह्मणिचेली-See ब्राह्मणचेलः, सुन्दरितरा

ब्राह्मणिगोत्रा-कुत्सिता ब्राह्मणी। गोत्रमात्रेण ब्राह्मणी A bad *Brāhmaṇa* woman. See सुन्दरितरा

ब्राह्मणिब्रुवा-See 'ब्राह्मणब्रुवः' 'सुन्दरितरा'

ब्राह्मणिमता-कुत्सिता ब्राह्मणी। केवलं

ब्राह्मणीति या मन्यते A bad *Brāhmaṇa* woman. See सुन्दरितरा (कौ.985)

ब्राह्मणिहता-कुत्सिता ब्राह्मणी A wicked *Brāhmaṇa* woman. See 'सुन्दरितरा'

ब्राह्मण्यम्-ब्राह्मणानां समूहः Group of *Brāhmaṇas*.

ब्रूते धर्मं माणवकम्-Teaches *Dharma* to a boy. 'ब्रू धातुः' तत्समानार्थकाश्च धातवः द्विकर्मकाः। ब्रू 'to speak' and its synonims govern two objects. 'माणवकं कथां कथयति' इत्यादयः

भक्तिः ज्ञानाय कल्पते-भक्तिः ज्ञानरूपा भवति *Bhakti* turns into ज्ञान। क्लृप्धातोः तत्समानार्थकानां च प्रयोगे, संपद्यमाने अर्थे चतुर्थी भवति। 'क्लृप्' and its synonims in the sense of 'becoming' 'turn into' govern चतुर्थी। 'क्षीरं दध्ने संपद्यते' 'मृत् घटाय जायते' इत्यादयः।

भगंदरः-भगं दारयतीति-रोगविशेषः Fistula.

भङ्गाकटम्-भङ्गानां रजः Dust of the *Bhanga* grain.

भङ्गीनम्, भङ्ग्यम्-भङ्गानां भवनम् The field where भङ्ग (hemp) is produced.

भद्राकरोति-See मद्राकरोति

भद्राकृत्य } **भद्राकृत्वा** } आलोचनां कृत्वा। प्रशंसां कृत्वा। मङ्गलं कृत्वा Having considered. Having praised. Having done an auspicious rite. (ग.र.म.पृ.140)

भरतर्षभः-भरतः ऋषभः इव Bull like (great) descendant of *Bharata* family. See 'गोवृन्दारक'

भद्रः, भद्रमुखः-अपरिचितानां सादरसंबोधने निर्देशे च A polite way of addressing or referring to a man, especially a stranger. 'भद्र! इमां तावत् भद्रमुखस्य भागिनिकीं कश्चित् राजा न वरयति' (भा.ना.च.पृ.4) स्त्रियां विषये 'भद्रा', 'भद्रे' इत्यादि।

भद्रायते-अभद्रः भद्रः भवति One who is not auspicious or good becomes good. (Becomes gentlemanly)

भयंकरः-भयजनकः Dreadful.

भवति-भूरिव आचरति Acts like the earth or land.

भवतु, दृष्टम्-अस्तु; उपायो दृष्टः Yes; I found out a way. 'भवतु दृष्टम्। एवं तावद् भणिष्यामि' (भा.ना.च.पृ.120)

भवतु, भवतु-तथैवास्तु नाम Let it be so. All right 'भवतु, भवतु, आर्ये! विश्वस्तास्मि' (भा.ना.च.पृ.4)

भवनस्य पश्चात्-West or in the west to the building 'पश्चात्' इत्यव्ययेन योगे षष्ठी। 'पश्चात्' (Ind.) षष्ठी।

भवितव्यम्-सम्भाव्यमेवेदम् May be. It is quite possible. 'भवितव्यम्, ततस्ततः? (भा.ना.च.पृ.9)

भव्यः-भवतीति भव्यः That which happens (कौ.2894)

भस्मनिहुतम्-निष्फलं कर्म 'Throwing oblations in ashes' useless action (प्र.स.2138) (अलुक्समासः)

भाक्तः } **भक्तिकः** } भक्तं नियतमस्मै दीयते One to whom rice (food) is given regularly.

भाक्ताः (शालयः)-भक्ते साधवः Rice good for cooking.

भागवती भागवतम्-भागवत्यश्च भागवताश्च तेषां समाहारः भागवतीभागवतम् The female

and male devotees of God. द्वन्द्वे एक वचने एव (प्र.स.2317)

भागिकम्-भागः (रूपकार्धम्) अस्मिन् वृद्ध्यादि दीयते That in which भाग (Half of *Rūpaka*) is given as interest etc. See 'पञ्चक'

भाण्डप्रतिभाण्डम्-एकं वस्तु दत्त्वा वस्त्वन्तरस्य ग्रहणम् Barter. Camputation or the exchange of goods.

भाण्डागारिकः-भण्डागाररक्षकः Store keeper.

भाण्डानयनम्-भाण्डस्य एकत्र संग्रहः Accumulation of commodities. (पं.त.पृ.5)

भरितगर्दभः-भाराक्रान्तः गर्दभः Loaded donkey; best of burden अहं भरितगर्दभ इव भूम्यां लुठामि' (भा.ना.च.पृ.226)

भारतिकः-भारतं करोति, (कथयति) भारतिकः. One who makes exposition of भारत

भाव्यम्, भवितव्यम्, भवनीयम्-एषु अन्यतरस्य तृतीयान्तेन पदान्तरेण साकं प्रयोगः क्रियायाः संभाव्यमानतां सूचयति When one of these words is used with nouns or adjectives in Instrumental case, it indicates the probability of an action etc. 'आगन्तुकेन अनेन भवितव्यम्' (भा.ना.च.पृ.4) He must be a strange etc. 'तपोवनेन भवितव्यम्' (भा.ना.च.पृ.7) It must be a hermitage इत्यादयः

भिक्षुकः आढ्याय तिष्ठते-आढ्यम् आत्मनः इच्छां बोधयितुं भिक्षुकः तिष्ठति इत्यर्थः The beggar waits to beseach the rich man for alms. 'यत्किञ्चित् बोधयितुम् तिष्ठति' इत्यर्थे स्थाधातोः प्रयोगे बोध्यमानः चतुर्थ्यां प्रयुज्यते When the root 'स्था' is used with a person to whom something is intended to be made known through the act of standing, the person is used in चतुर्थी (कौ.572)

भिक्षुकमाठरः } **माठरभिक्षुकः** } माठरवंशीयः भिक्षुकः *Māṭhara* who is a begger. पदपौर्वापर्ये अनियमः Order of words is optional (प्र.स.2200)

भिक्षुकवेदं भोजयति-यं यं भिक्षुक इति अभिजानाति तं तं भोजयति Whom so ever he recognises as a begger he feeds him. कर्मवाचके उपपदे विदधातोः णमुल् (अम्) भवति। विद् 'to know' or 'to get' takes णमुल् (अम्) at the end when it is preceded by a कर्मवाचक। 'देववेदं नमस्करोति' 'चोरवेदं दण्डयति' इत्यादयः। (कौ.3350)

भित्तम्-(A) शकलम् A piece.

भिन्नम्-(B) द्विधा अनेकधा वा कृतम् Broken (कौ.3042)

भिदेलिमाः-(सरलाः) (1) भेत्तव्याः To be broken (2) स्वयमेव ये भिद्यन्ते Which break by themselves.

भिद्यः-भिनत्ति कूलमिति भिद्यः (नदः) A river which cuts (erodes) the banks नदभिन्नस्तु 'भेत्ता' If it is other than a river 'भेत्ता' (कौ.2866)

भिन्धिलवणा } भिन्धि लवणमिति यस्यां क्रियायां सा भिन्धिलवणा The act where it is said 'break the salt'

पचलवणा } पचलवणम् इति यस्यां क्रियायां सा **पचलवणा** The act where it is said cook (prepare) the salt.

भिषक्पाशः-कुत्सितो भिषक् A bad phy-

sician एवं 'वणिक् पाशः' विद्वत्पाशः' इत्याद्याः। 'पाश' is a suffix. (प्रत्ययः)

भीमसंकाशः-भयंकरः Dreadful.

भुक्तमिदं कृष्णस्य-तत् स्थानं यत्र कृष्णः भुक्तवान् The place where कृष्ण took food. भक्तचर्थेभ्यः कर्मार्थे अधिकरणार्थे च 'क्त' (त) प्रत्ययः भवति। 'क्त' (त) is added to the roots denoting eating both in कर्मार्थ (refering to the thing eaten) and अधिकरणार्थ 'refering to the place of eating'. 'कृष्णेन अन्नं भुक्तम्' इत्यादि कर्मणि (कौ.3087)

भुक्तापभुक्तम्-भुक्तं तथापि योग्यया विधया न भुक्तम् Eating but not proper eating (प्र.स.2154)

'भोक्तुं मे दीयतां किञ्चित् किं पुनर्भोक्तुमिष्यते।
भुक्तापभुक्तं तत्रासीद्याता यत्रोत्सवे वयम्॥'

भुक्ताभुक्तम्-भुक्तं च अभुक्तं च। यथा पूर्णतया तृप्तिः न भवति तथा भुक्तिः। Eating only to get a little satisfaction (प्र.स.2154)

भुक्त्चा सुहितः-भुक्तिमात्रेण कृतार्थः One who is content only by eating. (प्र.स.2166)

भुक्त्वासुहितः-'यः यत्किञ्चित् अशित्वा तृप्तो भवति स एवमुच्यते' (ग.र.म.पृ.160) He who eats something and is satisfied with it.

भुङ्क्ते-अश्नाति Eats रक्षणभिन्नेऽर्थे 'भुज् धातुः आत्मनेपदी। 'भुज्' Takes A.P. in the sense other than protection. 'ओदनं भुङ्क्ते'; 'उत्कोचं भुङ्क्ते' इत्यादि। पालनार्थेतु (If it is protection) 'महीं भुनक्ति' 'Protects the earth'.

भूतपूर्वः-पूर्वं भूतः भूतपूर्वः Which existed before.

भूर्जभट्टः-व्यवहारपत्रसंरक्षकः Keeper of documents. (क्षेमे)

भोगं भुञ्जानः-भोगनुभवशीलः One who is in the habit of enjoying pleasures. ताच्छील्यार्थे सर्वेभ्योऽपि धातुभ्यः (परस्मैपदिभ्यः आत्मनेपदिभ्यश्च) चानश् (आन) भवति। 'चानश्' (आन) is added in the sense of 'in the habit of' to any root whether it is p.p. or A.P. 'पत्रिकाः पठानः' इत्यादि (कौ.3109)

भोग्यम्-(A) अनुभवनीयम् Which is to be enjoyed.

भोज्यम्-(B) भक्ष्यम् Which is to be eaten. (कौ.2885)

भ्रावयति-भ्रुवम् आचष्टे करोति वा Moves the brow.

भ्रुवं विक्षेपं कथयति भ्रूविक्षेपपूर्वकं कथयति

भ्रूविक्षेपं कथयति Tells or talks moving his eye-brows. अध्रुवे स्वाङ्गे द्वितीयान्ते उपपदे धातोः णमुल् (अम्) 'छिन्ने यस्मिन् मृतिर्नस्याज्जन्तोस्तत् स्वाङ्गमध्रुवम्' (प्र.स.) When a द्वितीयान्त word denoting a limb which is not ध्रुव is used as उपपद the root gets 'णमुल्' (अम्' (कौ.3376) 'करचालं मिलन्ति'। 'पादग्राहं प्रणमन्ति' इत्यादयः।

भृशायते-अभृशो भृशो भवति That which was not much becomes much. 'विद्यार्थिनामविनय उपेक्षातो भृशायते'।

भैक्षम्-भिक्षाणां समूहः A collection of alms.

भैक्षुकम्-भिक्षुकाणां संन्यासिनां वा समूहः Group of beggers or ascetics.

भद्रंकरणम्-भद्रं करोतीति भद्रं करणम् That which makes something auspicious (कौ.1007)

भ्रंशकलाकृत्य-हिंसित्वा Having infected pain (ग.र.म.पृ.136)

भ्रशयति-भृशं करोति Makes very much proliferates.

भ्रष्टलुचितं (धनम्)-लुचितं च तत् भ्रष्टं च (लुचितत्वात् त्यक्तत्वात् भ्रष्टम्) Money which was dropped (unknowingly) and lost. पदव्युत्क्रमः Change in the order of words. (प्र.स.2199)

भ्रातरौ-भ्राता च स्वसा च भ्रातरौ Brother and sister. (कौ.934)

भ्रातृव्यः-भ्रातुः पुत्रः Brother's son (2) शत्रुः। Enemy (कौ.1167, 1168)

भ्राष्ट्र मिन्धः-भ्राष्ट्रम् इन्धे, तापयति, इति भ्राष्ट्रमिन्धः Which makes the frying pan hot. (कौ.1007)

मात्यम्-मतं=ज्ञानम्। तस्य कारणं भावः साधनं वा That which produces knowledge or instrument of knowledge.

मथ्नाति सुधां क्षीरनिधिम्-Churns out nectar from the milky ocean. 'मथ्' धातुः द्विकर्मकः। मथ् 'to charn' governs two objects.

मथीनति-मन्था इव आचरति Acts like a charning rod. 'मन्दरः क्षीरसागरमथने मथीनति स्म'। 'शास्त्रार्थेऽति गभीरेऽस्मिन् तस्य बुद्धिर्मथीनति'।

मद्यति-मामात्मन इच्छति Wishes me for himself of herself.

मद्यते-अहमिवाचरति He behaves like me 'मयि देशान्तरगते मत्पित्रोर्मद्यते स्म सः'

मद्रंकर / **मद्रकार** } वि.a मङ्गलकर Auspicious.

मद्राकरोति-माङ्गल्यमुण्डनेन संस्करोति। 'गत्वा तिरुमलक्षेत्रं सुतं मद्राकरोति सः।'

मधुराहास्तिनपुरम्-मधुरा च हास्तिनपुरं च तयोः समाहारः मधुरा हास्तिनपुरम् The city of *Madhurā* and *Hastināpura*. See 'गङ्गाशोणम्' (प्र.स.2313) 'चेन्नैहैदराबादम्' 'मुम्बयी बेङ्गुलूरम्' इत्यादयः

मधुस्यति, मध्वस्यति-मधु आत्मनः अतीव लालसया इच्छति Hongs for honey.

मधुपर्क्यः-मधुपर्कम् अर्हति One who deserves मधुपर्क (An honour offered to a respectable guest) (प्र.स.1642)

मध्येनगरम्-अव्य.Ind. नगरस्य मध्यम् Centre of the city 'मध्ये समुद्रम्' इत्यादयः (कौ.672)

मनसि अकरोत्-अचिन्तयत्। निश्चयमकरोत्। He thought (like this). He decided.

मनसि अभवत्-विचारः उत्पन्नः It occurred in the mind.

मनसिजः / **मनसिशयः** } मन्मथः God of love (अलुक्समासौ)

मनुष्यकान्तारः-मनुष्याणां समूहः, नगरं वा, यत्र गतः अरण्यस्थमिव आत्मानं मन्यते A jungle of men. Big city. Like 'concrete jungle'. (पद्यप्राभृतकम्)

मनोज्वरः-मानसिकी व्यथा Mental agony. 'तथापि क्षुद्रकमेंदं मह्यमीषन्मनोज्वरः' (भा.ना.च.पृ.341)

मनोदण्डः-मनःसंयमनम् Controlling the mind.

मनोराज्यम्-मनसा कल्पिता स्वीया अभ्युन्नतिः Imaginary kingship. Building castles in the air. 'मनोराज्यानि कुर्वाणो दरिद्र इव पिप्रिये (राजतरङ्गिणी)

मनोहत्य-अव्य.Ind. मनसः यथा तृप्तिः भवति तथा To the hearts context. 'मनोहत्य पयः पिबति' See 'कणेहत्य' (कौ.767)

'खादत्यसौ कणेहत्य लड्डुकान् पात्रसंभृतान् ।
चिराल्लब्धां च मदिरां मनोहत्य पिबत्ययम्' ॥

मन्त्रनिःस्रावी-मन्त्रितं गोपनीयं यः प्रकटयति He who leaks out secrets or decisions taken in recent deliberations.

मन्दायते-अमन्दः मन्दः भवति That which was not slow becomes slow.

मन्द्रायते-अमन्द्रः मन्द्रः भवति मन्द्रायते That which was not slow becomes slow. Becomes of slow voice.

मम हृदयेन सहमन्त्रितम्-यथा अहं चिन्तयामि तथैव त्वमपि चिन्तयसि Thought on my own lines.

मयूरव्यंसकः-'विगता अंसा यस्य सः व्यंसकः। रमणीयाकारदेहनेपथ्योपेतत्वात् मयूरवत् मयूरः पुमान्। स चासौ व्यंसकश्च, बाहुसाध्यव्यापार-पुरुषकारविकलः कश्चिदेवं प्रतिक्षिप्यते। यद्वा - व्यंसयति छलयतीति व्यंसकः। सचासौ स च यो लुब्धकानां मयूरो गृहीतशिक्षः अन्यान् मयूरान् छलयति वञ्चयति, स विप्रलम्भक उच्यते' (ग.र.म.पृ.157) मयूर means a man who is good to look at with his beautiful personality and dress etc. 'व्यंसक' means - he who cannot show his manly power by working with his hands. Such a man would be deceiving, like a peacock, with his personality. Such a man is called मयूरव्यंसक। Or 'व्यंसक' means a deceiver. A peacock trained by the hunters deceives other peacocks and makes them caught by them. Any person who betrays others, like the peacock is मयूरव्यंसक । मयूर इव वागाकृतिमधुरः धूर्तः मयूरव्यंसकः One who is good looking like a peacock but is a deceit is मयूरव्यंसक (प्र.स.2166)

मयूरान् नर्तयति-(कथकः) अभिनयपूर्वकं कथं वा मयूराः नृत्यन्ति इति कथयति - वर्णयति A story teller tells, through his description accompanied by gesticulation how the peacocks dance.

मरीमृजः-पुनः पुनः यः मार्जयति One who sweeps or rubs again and again.

मर्षितः-(A) तितिक्षितः। क्षान्तः One who is pardoned.

मृषितम्-(B) (अपमृषितं) अस्पष्टम् (वाक्यम्) Not clear.

मसमसाकृत्य } (1) हिंसित्वा Having killed
मस्मसाकृत्य } (2) चूर्णं कृत्वा Having reduced into powder. (ग.र.म.पृ.137)

मकरः- (A) A crocodile

मस्करः-(B) वंशदण्डः A bamboo stick (कौ.1068)

मकरी-(A) समुद्रः Ocean

मस्करी-(B) भिक्षुः An ascetic (कौ.1034)

मम मित्रं रामः-Rama is my friend. See appendix. H.

महति प्रत्यूषे-अतीव प्रभाते Very early in the morning.

महत्यपराह्णे-अपराह्णस्य अन्तिमे भागे Late in the afternoon.

महाब्राह्मणः-(1) उत्तमो ब्राह्मणः A great or learned *Brāhmaṇa* (2) नीचः ब्राह्मणः

A low or contemptable *Brāhmaṇa* (3) पारिहासपूर्वकं ब्राह्मणब्रुवमुद्दिश्य प्रयुक्तः शब्दः Humourously used which addressing a person who is a *Brāhmaṇa* for name's sake. 'राजाः-प्रसीदतु भो महाब्राह्मण' (भा.ना.च.पृ.31)

महाब्रह्मः, महाब्रह्मा-महान् ब्राह्मणः Great *Brāhmaṇa* (कौ.806)

महामांसविक्रयः-पक्षिमृगादिभ्यः भक्षणार्थं श्मशानं गत्वा स्वशरीरार्पणम् Offering one's body to the birds and beasts to eat in a burial ground. (पं.तं.पृ.234)

महोक्षः-महान् च असौ उक्षा च महोक्षः Big bull (कौ.945) अकारान्तत्वम् विशेषः

मा-क्त्वाप्रत्ययान्तेन बोधितां क्रियां निषेद्धुं प्रयुज्यते इदमव्ययम् A negative particle used to prohibit an action expressed by क्त्वाप्रत्ययान्त। 'मा इदनीमन्यच्चिन्तयित्वा'। (भा.ना.च.पृ.18) 'मा अद्य विहस्य' इत्यादि।

मा खलु-एवं यथा न स्यात् तदर्थम् इत्यर्थे So that not hest. 'मा खलु कवाटसंपुटप्रविष्टमिव पक्वकपित्थं शीर्षं ते चूर्णचूर्णं मडमडायिष्यामि, इति। (भा.ना.च.209) 'तूष्णीं तिष्ठ। मा खलु त्वां कक्ष्यातः बहिष्कुर्याम्' इत्यादि। See Appendix-F.

माणवकं धर्मं शास्ति-He instructs *Dharma* to the boy. 'शास्' धातोः तत्समानार्थकानां च धातूनां द्विकर्मकत्वम्। √'शास्' and its synonyms govern two objects 'पुत्रं पत्रलेखनं बोधयति' इत्यादयः

माणवीनम्-माणवाय हितम् Good or fit to the boy.

माणव्यम्-माणवानां समूहः Group of boys.

मातरपितरौ, मातापितरौ, पितरौ — माता च पिता च Mother and father.

मा तावत्-'एवं यथा न भवेत् तदर्थम्' इत्यर्थे So that not Lest मा तावत् तव च मम च दारुणः क्षयो भवतीति (भा.ना.च.पृ.209)

मातुः निलीयते कृष्णः-*Kṛṣṇa* hides himself from his mother. अन्तर्धाने कर्तव्ये येन (यत्कर्तृकम्) आत्मन अदर्शनम् इच्छति तद्वाचकात् पञ्चमी भवति When a root in the sense of 'to hide' is used the person from whom one wants to hide himself is used in पञ्चमी। 'चोरात् आत्मानं तिरोधत्ते' इत्यादि।

मातुला, मातुलानी-मातुलस्य भार्या Wife of maternal uncle.

मातृभोगीणः-मातृभोगाय हितः One who is helpful to mother.

मात्स्यन्यायः-अधिकप्रमाणः मत्स्यः अल्पप्रमाणं मत्स्यं यथा गिलति तथा बलवता दुर्बलस्य बाधनम् मात्स्यन्यायः Big fish swallowing the small fish, Jungle law.

मानुष्यकम्-मनुष्याणां समूहः Group of men.

मानोन्मानिका-परिमाणोन्मानयोः एकेन अन्यसिद्धौ मानोन्मानिका When weight is known by measuring or measure is known by weighing it is called मानोन्मानिका (प्र.स.2154)

मापयति-माम् आचष्टे Tells about me.

मार्गं समीक्षमाणः-आगमनं प्रतीक्षमाणः Waiting for somebody's arrival. (पं.तं.पृ.197)

मार्ग्यम्, मृग्यम् — गवेषणीयम् That which is to be searched. (कौ.2862)

मार्दङ्गिकपाणविकम्-मार्दङ्गिकानां पाणविकानां च समाहारः The group of players on *Mṛdaṅga* and Paṇava, Orchestra. See 'पाणिपादम्' (कौ.906)

मालभारी } मालाः विभर्तीति मालभारी।
मालहारी } मालाः हरतीति मालहारी। One who (1) bears or (2) brings garland 'माला' ends in 'अ' when followed by 'भारिन्' or 'हारिन्'। 'माला' शब्दः 'भारि' 'हारि' पदयोः परयोः ह्रस्वान्तः भवति। (कौ.1006)

मालति-मालेव आचरति Acts or appears like a garland 'पश्य पङ्क्तिर्बालकानां नीलाकाशेऽत्र मालति'

माशब्दिकः- 'मा कृथाः पापम्, अनाचारं वा' इति ब्रुवाणः One who says "do not commit sin or do not do wrong action." (ग.र.म.पृ.403)

माशाब्दिकः-'मा शब्दं कार्षीः' इति इति य आह One who says "do not make noise".

माषीणम्; माष्यम्-माषाणां भवनं क्षेत्रम् The field of black grain.

माष्यम्-माषेभ्यः हितम् Useful to the blackgrain.

मासम् अधीते-सर्वस्मिन् मासे (विना अन्तरायम्) अध्ययनं करोति He studies during the whole month. क्रियायाः अत्यन्तसंयोगे कालवाचकं द्वितीयायां प्रयुज्यते Words denoting time are used in द्वितीया when an action takes place through out that time. 'सः त्रीणि वर्षाणि विदेशे अवसत्' इत्यादयः

मांसशोणितम्-मांसं च शोणितं च तयोः समाहारः Flesh and blood. द्वन्द्वे एकवचने एव (प्र.स.2317)

मांसवृक्षाः-'Trees of flesh'. Contemptuous reference to useless men. 'मांसवृक्षैरियं मूर्खैर्भाराक्रान्ता वसुंधरा' (मृ.शक.VIII)

मासक्षपणिकः-मासक्षपणं यः यथाकथञ्चित् करोति One who spends one month some how or other. एवं 'वर्षक्षपणिकः'

मासम् आस्ते-मासे निवासं करोति He lives in a month 'कुरून् स्वपिति'

मासपरिवृत्तः-मासमात्रवयस्कः Who has just completed one month of age. "Turned one month". 'ततो मासपरिवृत्तो नन्दगोपपुत्रः . . . पिबति' (भा.ना.च.5) एवं संवत्सरपरिवृत्तः' इत्यादि।

मासिकः-(ब्रह्मचारी) मासं ब्रह्मचर्यं यस्य One who observes *Brahmacarya* for one month.

मासिकः-(1) मासम् अधीष्टः (सत्कृत्य व्यापारितः) अध्यापकः A teacher who is respectfully employed for one month. (2) मासं भृतः (वेतनेन क्रीतः) कर्मकरः A servant who is employed for one month on wages (3) मासं भूतः (स्वसत्तया व्याप्तकालः) व्याधिः A disease which continued for one month (4) मासं भावी उत्सवः The festival lasting for one month (5) मासेन परिजय्यः व्याधिः Disease which can be cured in one month (6) मासेन लभ्यम् अथवा कार्यम् अथवा सुकरम् Which can be got in one month or can be accomplished or can be easily done in one month.

मांसिकः-मांसं नियुक्तमस्मै दीयते He to whom meat is given in a fixed manner

(regularly) 'अद्यते वा न वा मांसमस्माभिः श्वा तु मांसिकः'

मांसौदनिकः-(1) मांसौदने साधुः Good for meat rice. 'बास्मतीतण्डुलान्मांसौदनिकानानयन्तु नः' (2) मांसौदनं नियुक्तमस्मै दीयते He to whom meat rice (*Biriyāni*) is given in a fixed manner. 'सोत्कण्ठं प्रेक्षते मांसौदनिकोऽयं करी मुहुः'।

मासीनः / **मास्यः** } एकमासवयाः One month old

मासेदेयम्-(समासः) **ऋणम्** मासे अवश्यं प्रतिदेयम् ऋणम् Debt to be cleared without fail in one month. अवश्यं कर्तव्यम् इत्यर्थे 'य' प्रत्ययान्तेन सप्तम्यन्तं समस्यते The word with the suffix 'य' is compounded with a word in सप्तमी when it is implied that the work or act should be performed without fail. 'सन्ध्यायाङ्गप्यो मन्त्रः', 'पूर्वाह्णेगेयं साम' इत्यादि (प्र.स.2134)

माहाजनिकः / **माहाजनीनः** } महाजनाय (बहुजनेभ्यः) हितः One who is helpful to the large number of people. 'ये माहाजनिका लोके विरलास्तेऽधिकारिणः'

मितंगमः-मिततया गच्छति One who moves nearby or goes rarely 'मितंगमः हस्ती' 'मितंगमा तन्वी' इत्यादयः 'मितंगमो बहिरहं न जानामि जनान् बहून्'

मितंपचः-(1) कदर्यः Miser (2) दरिद्रः Poor man.

मिथ्याकृत्य / **मिथ्याकृत्वा** } (समासविकल्पः) असत्यं कृत्वा Having made it false.

मिथ्याभियोगः-असत्यदोषारोपणम् False allegation.

मिथ्याभिशंसनम्-असत्यदोषारोपणपूर्वकं निन्दा False accusation.

मिथ्याविनीता-केवलं विनीतेव बहिः दृश्यमाना Not really modest. (काद.408)

मिश्रयति-मिश्रं करोति Mixes.

मीमांसकदुर्दुरूटः-'मीमांसाध्ययने न शौचाचारादिलक्षणं फलम् अनवाप्य वेदविप्लावनमद्यपानाद्यनुष्ठाननिरतः नास्तिकः जातः इत्यर्थः (ग.र.म.पृ.156) A *Mīmāṁsā* scholar who has departed from the Vedic code of conduct.

मुक्तये हरिं भजति-Worships *Hari* for *Mukti.* तादर्थ्ये (तस्मै प्रयोजनाय इत्यर्थे) चतुर्थी भवति In the sense of 'for the sake of' 'चतुर्थी' is used. 'ज्ञानाय महेश्वरं भजे' 'धनाय धनिनं स्तौति' इत्यादयः।

मुक्तहस्तः-दानशीलः Liberal (in giving)

मुखंपचः-भिक्षुकः Beggar. Mendicant.

मुष्टिंधमः-शिशुः Child (which sucks it's fist)

मुखभङ्गः-मुखविकारः Contortious in the face (काद.231)

मुखसुखः-सुखेन उच्चारयितुं योग्यः Easy to pronounce

मुखतः कारम् / **मुखतः कृत्य** / **मुखतःकृत्वा** } (स्थितः) He stood placing it on his face. 'पार्श्वतःकारम्, पार्श्वतः कृत्य, पार्श्वतः कृत्वा' 'करतःकारम्, करतःकृत्य, करतःकृत्वा' इत्यादि। 'पार्श्वे कृत्वा', 'करे कृत्वा' इत्यादिरर्थः। (कौ.3383)

मुखतो भूत्वा / **मुखतो भूय** / **मुखतो भूयम्** } (स्थितम्) संमुखे स्थितम् It was in the face. See 'मुखतःकारम्' 'पार्श्वतो एवं

भूत्वा', 'पार्श्वतोभूय' 'पार्श्वतो भूयम्' इत्यादयः।

'सा मालां करतःकारं मुखतो भावमागता।
तां पत्युर्गलतःकृत्य पार्श्वतोभूय च स्थिता ॥'
(प्र.स.पृ.133)

मुण्डयति-मुण्डं करोति Shaves. Tonsures.

मुण्डायते-अमुण्डः मुण्डः भवति One who was not tonsured gets tonsured.

मुण्डो भापयते
मुण्डो भीषयते } The man with tonsured head causes fear. यदा प्रयोजकहेतुः स्वयं भयं जनयति भापयते भीषयते इत्यादीनि आत्मनेपदिरूपाणि। यदि कश्चित् केनचित् साधनादिना भीतिं जनयति तदा भाययति इति परस्मैपद्येव। यथा कुञ्चिकया भाययति। 'भी' root with causative suffix takes only A.P. when the person is the cause of fear. If he causes fear with some instrument it takes p.p. only as in 'कुञ्चिकया भाययति'

मुनिः आश्रमम् आवसति-Sage dwells in a hermitage. See 'हरिः वैकुण्ठमधिवसति'

मुनिखेटः-दुष्टः मुनिः A wicked sage (ग.र.म.पृ.156)

मुनिधूर्तः-धूर्तः मुनिः The deceiving sage (ग.र.म.पृ.156)

मुनिपुङ्गवः-मुनिः पुङ्गव इव Bull like *muni*. Great sage. See गोवृन्दारक

मुनिविटः-शिरस्तुण्डमुण्डनदण्डादि-मुनिवेषधारणात् वेश्यागमनमद्यपानाद्यनाचारप्रवृत्तः एवमुच्यते (ग.र.म.156) A man who is a sage by appearance but is after women.

मुष्णाति शतं देवदत्तम्-Steels hundred from देवदत्त। मुष् 'to steal' and its synonyms govern two objects. मुष्धातुः तत्समानार्थकाश्च द्विकर्मकाः

मुषितेन्द्रियः-अपहतेन्द्रियः। यस्य इन्द्रियाणि न सम्यक् स्वकर्मसु प्रवर्तन्ते One whose senses are lost or have ceased to function. 'नैव सोढुं न संहर्तुं शक्नोमि मुषितेन्द्रियः' (भा.ना.च.पृ.267)

मुष्टीमुष्टि
मुष्टामुष्टि } मुष्टिभिः मुष्टिभिः प्रहृत्य इदं युद्धं प्रवृत्तम् Fist fighting (प्र.स.पृ.311)

मुसल्यः-मुसलघातम् अर्हति One who deserves to be killed by pestle मुसल (Pestle) (प्र.स.1642)

मुसल्यम्-मुसलाय हितम् That which is useful for pistle.

मुहूर्तात् उपरि उपाध्यायः चेत् आगच्छेत् आगच्छति वा आगमिष्यति वा आगन्ता वा अथ त्वं छन्दः अधीष्व-When something is ordered or advised to be done after one *Muhūrta* (a short time of 40 minutes) the adjacent root is optionally used either in लट् or विधि लिङ् instead of लृट् or लुट् which also can be used optionally ऊर्ध्वमौहूर्तिके भविष्यति वर्तमानात् धातोः लिङ्लटौ वा स्तः (कौ.2788)

मूर्च्छायते-मूर्च्छावान् भवति Swoons.

मूलकपणः-(A) The bundle of / handful of *Mūlakas* (radish) put up for sale. विक्रयार्थं बद्धा मूलकानां मुष्टिः। एवं 'शाकपणः' इत्यादि।

पाणः-(B) विक्रयार्थं निक्षिप्तं यत्किमपि Anything which is to be sold.

मूलकोपदंशं भुङ्क्ते
मूलकेन उपदंशं भुङ्क्ते } मूलकम् उपदश्य भुङ्क्ते Eats taking *Mūlaka* (radish salad) as a side

dish. तृतीयान्ते उपपदे उपपूर्वात् दंशधातोः समानकर्तृकयोः पूर्वकाले 'णमुल्' (अम्) भवति। समासः वैकल्पिकः। 'दंश' with 'उप' takes 'णमुल्' (अम्) when something is used in तृतीया as करण in eating and कर्म in दंशन Compound is optional 'आम्रोपदंशं भुङ्क्ते' अम्रेणेपदंशं भुङ्क्ते' इत्यादि। (कौ.3368)

मूलविभुजः-मूलानि विभुजति विमर्दयतीति मूलविभुजः रथादिः Carts etc.; which crush the roots of trees.

मूले मूले स्थूलः-अग्रात् क्रमशः मूलपर्यन्तम् (आनुपूर्व्येण) स्थूलः From end to the root it is gradually stout (कौ.2147) आनुपूर्व्ये द्वित्वम् To indicate gradual change a word is repeated. 'वर्षे वर्षे स्मरणशक्तिः पुरुषस्य क्षयति'।

मूल्यम्-(1) मूलेन आनम्यम् That which is to be bent along with the root (2) मूलेन समम् Equal to the root.

मूल्यकुल्या-निरन्तरधनसंपादनमार्गः A river of earnings. Perennial source of money. (क्षेमे)

मूल्या-मूलतः उत्पाटनीया To be rooted out.

मृगतृष्णा / **मृगतृष्णिका** } मरीचिका मृगाणां तृष्णाकरी Mirage that which stirs the thrist of the deer.

मृगान् रमयति-मृगरमणम् अन्यस्मै अभिनयादिपूर्वकं कथयति He tells others the play of the animals with gesticulations etc.

मृतजीविन्-मृतिं निमित्तीकृत्य दत्तेन धनादिना यो जीवति Living on donations given in death ceremonies. (क्षेमे)

मृते मोक्ष्यामि-तव मरणानन्तरमेव त्वां मोक्ष्यामि I shall leave you only after you are dead. 'एहि, दास्याः पुत्र ? मृते मोक्ष्यामि' (पुनरपि ताडयति) (भा.ना.च.पृ.272)

मृषोद्यम्-मृषा वक्तव्यम् Which is said to be false or which is to be said falsely. (कौ.2866)

मेघङ्करः-मेघान् करोति इति मेघङ्करः That which produces clouds.

मेघायते-मेघं करोति Produces clouds.

मेघ्यः-मेघम् अर्हति Which deserves clouds. (प्र.स.1642)

मेधायते-(मेधा=मेधावान्) अमेधा मेधा भवति One who was not intelligent becomes intelligent 'मेधायते वटुः'

मेध्यः- मेधम् अर्हति Fit for sacrifice (प्र.स.1642)

मेषं ग्रामं हरति-Takes the sheep to the village. 'हृ' and its synonims govern two objects. हृधातुः तत्समानार्थकाश्च द्विकर्मकाः।

मेषमतिः-मूर्खः A block head. Goat witted. (क्षेमे)

मैथुनिका-वैवाहिकसम्बन्धः Matrimonial alliance.

मौद्गीनम्-मुद्गानां भवनं क्षेत्रम् The field in which green gram is produced.

मौष्टा-मुष्टिः प्रहरणम् अस्यां क्रीडायाम् The sport in which fist used as a weapon.

म्रदयति-मृदुं करोति Makes soft.

म्लिष्टम्-(A) अस्पष्टम् Not clear.

म्लेच्छितम्-(B) अपशब्दितम् Wrongly pronounced.

यकृन्मेदः-यकृच्च मेदश्च तयोः समाहारः

यकृन्मेदः (सकारान्तः) Liver and marrow द्वन्द्वे एकवचने एव। (प्र.स.2317)

यजतिस्म युधिष्ठिरः-युधिष्ठिर Performed यज्ञ। 'स्म' इत्यनेन योगे लिटः स्थाने लट् When the indeclinable 'स्म' is used as उपपद the root takes लट् instead of लिट् in the sense अनद्यतन परोक्षभूत (to indicate an action which had happened before midnight of yesterday and was not seen by the speaker) 'तस्य पुत्रः काञ्चन गौराङ्गीं परिणयति स्म' इत्यादयः।

यज्ञिय-वि.a यज्ञम् अर्हति (यजमानः) One who is fit for performing *Yajña*.

यति-(यावन्तः)-तति-(तावन्तः)- As many - so many 'यति बालाः सन्ति तति क्रीडन्ति' (प्र.स.पृ.245)

यत्किञ्चनकारिता-प्रयोजनशून्यस्य कार्यस्याचरणम् Doing a purposeless work. 'अहो ! यत्किञ्चनकारितायामादरः।' (काद.पृ.258)

यत् ते प्रतिभाति-यद्युक्तमिति ते प्रतिभाति तत्कुरु Whatever you think proper (do accordingly) एवं यत्ते रोचते इत्यादयः।

यत्तत्प्रलापविलक्षणः-सर्वानपि विषयानधिकृत्य यः भाषते Garrulous or loquacious about any subject (क्षेमे)

यत् आर्यपुत्रः आज्ञापयति-'यत् देवः आज्ञापयति' इत्यादयः। भवता यथा आदिष्टं तथा करिष्यामि इत्यर्थे एतादृशाः प्रयोगाः These are the phrases used when an order is received from an elderly person or a superior officer meaning "I shall do according to your order". (भा.ना.च. पृ.299)

यत्र कुत्र / **यत्र क्वचन** / **यत्र क्वापि** } यस्मिन् कस्मिन्नपि स्थाने समये वा Where so ever in whatever place. In whatever time.

यत्र तत्र-सर्वत्र In whatever place. Everywhere.

यत्र यत्र-Wherever

यथा-अव्य.Ind. इदमव्ययम् अधोनिर्दिष्टेषु अर्थेषु प्रयुज्यते - (1) पूर्वोक्तया रीत्या As, in the manner mentioned above यथा ज्ञापयति महाराजः as your magistry orders. (2) 'अर्थात्' 'अधो निर्दिष्टया रीत्या' Namely; 'As follows' - 'तद्यथा अनुश्रूयते' (पं.तं.) (3) इव। औपम्यसूचने। As like, showing comparison 'आसीदियं दशरथस्य गृहे यथा श्रीः' (उ.रा.4.6) (4) उदाहरणतया - As. as for instance 'पर्वतो वह्निमान्, धूमात्, यथा महानसः' (5) 'यत्' That (used to introduce direct assersion with or without 'इति' at the end) 'अकथितोऽपि ज्ञायत एव यथायमाभोगस्तपोवनस्येति' (अभि.शा.I) 'विदितं खलु ते यथा स्मरः क्षणमप्युत्सहते न मां विना' (कुमा.4.36) (6) 'यदि तथा क्रियते' So that, In order that 'दर्शय तं चौरसिंहं यथा व्यापादयामि' (पं.तं) (7) प्रायः यथाशब्दघटितवाक्यानन्तरं तथा शब्दघटितं वाक्यं प्रयुज्यते। 'यथा' is used correlatively with 'तथा'। 'यथा वृक्षस्तथा फलम्'। 'यथा राजा तथा प्रजाः' (8) एतादृशेषु वाक्येषु यथा शब्देन वा तथाशब्देन वा उभाभ्यामपि वा सह एव शब्दस्य प्रयोगः सम्बन्धस्य दार्ढ्यं सूचयति In this case एव is frequently added to either यथा or तथा or to both to make the equality of relation more marked or striking

'वधूचतुष्केऽपि यथैव शान्ता प्रिया तनूजास्य तथैव सीता' (उत्त.च.4.16) (9) 'यतः-ततः' इत्यर्थे -'यथा इतोमुखागतैरपि कलकलः श्रुतः तथा तर्कयामि' (माल.8) (10) यथायथा- तथा तथा - 'यावदधिकं तावदधिकम् । यावदल्पं तावदल्पम् - 'यथा यथा भाषसि धर्मसंमितं तथा तथा मे त्वयि भक्तिरुत्तमा' (म.भा.)

यथाकथञ्चित्-येन केनाप्युपायेन Some how or other. In any manner.

यथाकथाचम्-(1) सर्वथापि यत् भवेत् That which happens under any circumstances (2) तदा तदा यत् भवेत् What happens occasionally.

यथाकामिन्-One who acts according to one's will.

यथाकारमहं भोक्ष्ये तथाकारं भोक्ष्यामि। किं तवानेन ? -यथा इच्छामि तथा भोक्ष्ये। असूयया प्रतिवचने 'यथा तथा' पूर्वस्य कृञ् धातोः 'णमुल्' (अम्) I will eat as I like. How are you concerned. कृ with णमुल् (अम्) is added to 'यथा' and 'तथा' when anger is implied in the reply. (कौ.3349)

यथाजातः-अज्ञः Fool.

यथा तथा-येन केनापि प्रकारेण In any manner.

यथामुखीनम्-मुखस्य सदृशं यथामुखम् (प्रतिबिम्बम्)। यथामुखं दर्शनः यथामुखीनः The reflection which shows the face as it is.

यथाप्रधानम्-नतः-प्रधानानां क्रमम् (प्राधान्यम्) अनुसृत्य According to rank or position. According to procedure. 'संभावयामास यथाप्रधानम्' (कुमा.VII.)

यथायथम्-(1) यथास्वरूपम् । यथा स्वभावम् Strictly according to the real nature of oneself (कौ.2149) (2) यथायुक्तम् As is fit. fitly properly.

यथारुचम् / **यथारुचि** — रुचिम् अनुसृत्य According to one's taste or liking.

यथाशक्ति-शक्तिम् अनतिक्रम्य According to the capacity. एवम् - 'यथासामर्थ्यम्' इत्यादि (कौ.652)

यथासुखम्-सुखं यथा भवति तथा In a happy manner. Happily. 'विचरन्तं वने रामं ये स्पृशन्ति यथासुखम्'

यथावत्-'यथा इत्येवार्थः Same as यथा। 'अहमप्यमृतं पदं यथावत् तुरगश्रेष्ठ लभेय तत् कुरुष्व' (बु.च.V.75)

यथावृत्तम्-(1) यथासंवृत्तं तथा As happened, done or acted (2) यथा संवृत्तं तत्। The actual facts. The circumstances or details of an event.

यथावृद्धम्-वृद्धत्वानुसारेण According to the age or seniority.

यथाश्रेष्ठम्-श्रेष्ठत्वानुसारेण In order of precedence or merit.

यथास्वम्-एकैकः Each on his own. Individually 'धनमुत्कोचलब्धं ते यथास्वमुपभुञ्जते'।

यथोत्तरम्-उत्तरम्, उत्तरम्, अनुसृत्य In regular order in succession. One after another 'यथोत्तरं मुनीनां (पाणिनिकात्यायनपतञ्जलीनां) प्रामाण्यम्' इत्यादि।

यदा-When वाक्यनिर्माणानुसारेण इदमव्ययं 'यतः' इत्यर्थं बोधयति It gives the meaning of 'as' according to the construction of the sentence. 'नारीणां पुरुषाणां च निर्मर्यादो यदा ध्वनिः' As the cry of the

woman and men is endless. 'यदा' is used in some sentences in the sense of 'while' where as 'सः एवं न करोति - परं तु' इत्यर्थे प्रयुज्यते। 'यदा न खलु यज्ञस्य विघ्नकर्ता महाबलः। तेन संचोदितौ तौ तु राक्षसौ . . यज्ञविघ्नं करिष्यतः' (रामा.1.20.19) "While he directly does not put obstacles to *yajña* personally, the two demons create obstacles. अत्र संस्कृताङ्लवाक्यनिर्माणे साम्यं दृश्यते। There is similarity in the consturction of sentences in Sanskrit and English.

अल्पवीर्या यदा यक्षाः श्रूयन्ते मुनिपुङ्गव।
कथं नागसहस्रस्य धारयत्यबला बलम् ॥'

(रामा.1.25-2) While *yakṣas* are known as possessing not much strength how is it that she is so strong? पूर्ववदेवात्रपि यदा शब्दस्य प्रयोगः। एवम् 'यदा बुधैः सर्वगतस्त्वमुच्यसे, न वेत्सि भावस्थमिमं कथं जनम्' (कुमा.V.58) इत्यादि। एतादृशेषु वाक्येषु 'तदा' इत्यस्य अध्याहारः नावश्यकः।

यदि नो दास्यते तत्र-(रामा.1.33.3) (पितरं नो वृणीष्व त्वं You request our father) "If he will give us to you" 'अस्मान् तव दास्यते वा न वा इति अस्माकं पितरं पृच्छ' इति भावः। 'यदि' इत्यव्ययेन इदं वाक्यनिर्माणम् - Please ask our father if he would give us to you इति आङ्ग्लवाक्यनिर्माणेन तुल्यं वर्तते।

यद्भविष्यः-'यदा यत् भविष्यति तदा तत् पश्यामः' इति यः चिन्तयति One who thinks "let us see what will happen" and does not try to take any preventive action (पं.तं.पृ.67)

यवकम् / **यव्यम्** } यवानां भवनं क्षेत्रम् The field of *yavas*.

यवनमुण्डः-यवन इव मुण्डितमस्तकः One who has tonsured his head like a man of *Yavana* country (प्र.स.2166) See 'काम्बोजमुण्डः'

यवनानी-यवनानां लिपिः The script of *yavanas*.

यवानी-दुष्टः यवः Base *yava* grain.

यवसुरम् / **यवसुरा** } यवनिर्मिता सुरा। सुरा (liquor) prepared with *yavas*. सुरान्तः तत्पुरुषः विकल्पेन नपुंसके प्रयुज्यते। सुरा at the end of तत्पुरुष is optionally used in neuter gender 'तण्डुलसुरम् - तण्डुलसुरा' इत्यादि। (कौ.828)

यवयति-युवानं करोति Makes young.

'यवयत्यौषधमिति श्रुत्वासेवत मन्दधीः।
नष्टं बलमतीसारात् व्ययितं च धनं बहु ॥'

यवेभ्यः गां वारयति-He prevents the bull from (eating) *yavas*. वारणार्थानां धातूनां प्रयोगे यतः वारणं क्रियते ततः पञ्चमी। 'अग्नेः माणवकं वारयति' इत्यादयः।

यशस्काम्यति-यशः आत्मनः इच्छति He wants fame.

यशस्य-वि.a यशसः निमित्तम् A cause for fame.

यशायते / **यशस्यते** } यशस्वी इव आचरति Behaves as though has great fame.

यागाय याति-यष्टुं याति Goes to perform *Yāga*. क्रियार्थायां क्रियायां प्रयुज्यमानायां 'तुमुन्' प्रत्ययस्य अप्रयोगे, भावार्थकप्रत्ययान्तात् शब्दात् चतुर्थी When one action is intended for another action but 'तुम्' is not used, the word with a

भावार्थप्रत्यय (the suffix which conveys only the sense of the root as in याग) is used in चतुर्थी । 'पठनाय वसति' 'दर्शनाय गच्छति' इत्यादयः

याचते बलिं वसुधाम्-'याच्' धातुः तत्समानार्थकाश्च धातवः द्विकर्मकाः । याच् 'to beg' and its synonyms govern two objects.

याचितकम्-याचितेन निर्वृत्तम् That which is achieved by requesting or begging somebody (कौ.1571)

यष्टिग्राहं युध्यन्ते-समीपे लब्धाः यष्टीः गृहीत्वा युध्यन्ते In a hurry taking the sticks available nearly, they are fighting. त्वरायां गम्यमानायां द्वितीयान्तोपपदात् धातोः णमुल् (अम्) स्यात् When hurry is indicated the root takes 'णमुल्' (अम्) when preceded by द्वितीयान्तशब्द । (कौ.3374) लोष्टग्राहं प्रहरन्ति ।

'आत्मानं धारयत्येष शाखालम्बं पतन्नधः'
'भार्या संमार्जनीग्राहं ताडयत्येनमञ्जसा ।
प्रहारात् पत्रिकाग्राहमेष रक्षति दृश्यताम् ॥'
इत्यादयः ।

याज्ञिककितवः-वञ्चकः अथवा द्यूतासक्तः याज्ञिकः A deceiving priest. A gambler priest (ग.र.म.पृ.156)

यावज्जीवमधीते-जीवितान्तपर्यन्तम् अधीते He studies as long as he lives 'यावत्' इत्यस्मिन् उपपदे 'जीव्' धातोः णमुल् (अम्) । 'जीव्' preceded by 'यावत्' takes 'णमुल्' (अम्) at the end. 'यावज्जीवम् अध्यापयति' इत्यादयः (कौ.3351)

यातम् इदं रमापतेः-यस्मिन् देशे रमापतिः यातवान् स देशः This is the place where *Kṛṣṇa* walked भावेप्रयोगोऽपि साधुः । 'रमापतिना यातम्' (Impersonal.) गत्यर्थकानां सर्वेषां धातूनाम् एवं प्रयोगः भवति This applies to all the roots implying walking or going (गति) (कौ.3087)

यातानुयातम्-तदानीमेव पुनर्गमनात् यातं च तद् अनुयातं च (प्र.स.2154) Going and going again.

याथाकथाचम्-(1) यथा कथं च दीयते कार्यं वा That which is given or done somehow or other. Implies carelessness or disrespect. (2) यथाकथमपि यत् भवत्येव तत् Which happens under any circumstances (3) यत् तदा तदा भवति What happens occasionally.

यावच्छलोकम् अच्युतप्रणामाः-यावन्तः श्लोकाः तावन्तः अच्युतप्रणामाः As many salutations of अच्युत as there are श्लोकs 'यावद्रूप्यकं मोदकाः' इत्यादि (कौ.652)

यावत् प्रविशामि-प्रवेक्ष्यामि I shall enter. 'यावत्' इत्यव्ययेन सह प्रयुक्तः लट् भविष्यदर्थं बोधयति A verb in present tense preceded by 'यावत्' indicates futurity of action. 'यावत् पठामि' (पठिष्यामि), 'यावत् लिखामि' (लिखिष्यामि) इत्यादयः

यावतिथ-वि.a यावतां पूरकः Completing how many.

यावद्वेदं भुङ्क्ते-यावत् लभते तावत् भुङ्क्ते He eats so much as he gets लाभार्थकस्य विद्धातोः यावति उपपदे णमुल् (अम्) भवति । विद् 'to get' takes णमुल् (अम्) when it is preceded by 'यावत्' । 'यावद्वेदं क्रीणाति' इत्यादयः (कौ.3351)

याहि याहीति याति-पुनः पुनः याति He is

going again and again.
'मा याहि निट्कलिभुवमिति मित्रे वदत्यपि।
याहि याहीति यात्येव निर्लज्जः केन बोध्यताम्॥'

युक्तकर्मन्-कर्मणि नियुक्तः Entrusted with some work.

युगंधरः } कश्चन पर्वतः A mountain.
युगधारः } युगं धरति यः (वृषभादिः) One who bears the yoke. (Bull etc.)

युग्यः-(1) युगं वहति That which draws the yoke. (2) युगाय हितम् Useful for yoke beneficial to a particular age (times) (3) युगम् अर्हति That which can be yoked.

युग्यम्-(A) वाहनतया उपयोक्तुं शक्यं गजादि That which can be used as a vehicle.

योग्यम्-(B) कर्मकरणाद्यर्हम् That which is fit to work etc. (कौ.2873)

युवखलतिः-खलतिः युवतिः A bald headed young woman (कौ.748)

युवतिः प्रियाय अधरं ह्नुते-अधरनिह्नवेन आत्मनः प्रेम प्रियं बोधयतीत्यर्थः The young lady conceals (closes) her lip from the lover in order to indicate her love. 'ह्नु' धातोः प्रयोगे ज्ञीप्स्यमानः चतुर्थ्यां प्रयुज्यते When the root 'ह्नु' is used the person to whom something is intended to be made known is used in चतुर्थी। (कौ.572)

युवायते-युवतिरिव आचरति She behaves like a young woman.

युष्मद्यति-युष्मान् आत्मनः इच्छति He wants you all for him.

युष्मद्यते-यूयमिव आचरति He behaves or acts like all of you.

युष्मयति-युवाम् आचष्टे He tells about both of you.

यूकापिपीलिकम्-यूकानां पिपीलिकानां च समाहारः यूकापिपीलिकम् The group of *yūkas* and ants. नकुलपर्यन्तानां क्षुद्रजन्तूनां द्वन्द्व एकवत् स्यात् The *Dvandva* consisting of words denoting the small beings (smaller than mangoose) is used in नपुंसकलिङ्गैकवचनम् 'मण्डूकमूषिकम्' इत्यादि (प्र.स.2314)

यूपीयम् } यूपाय इदं (दारु) The wood
यूप्यम् } intended for the *yūpa* (sacred pole)

योगनिद्रा-मनो निरुध्य स्थितिः Meditation (पं.तं.पृ.23)

योगिक } वि.a योगाय प्रभवति That which
योग्य } is capable of joining.

योजयति चन्द्रं पुष्येण-पुष्ययोगं जानाति He knows when the moon is in contact with पुष्य constallation (प्र.स.526)

यः अन्नं ददाति दास्यति दाता वा स स्वर्गं याति, यास्यति, याता वा-He who will give food shall go to heaven. लिप्स्य मानेन अन्नादिना स्वर्गादिः सिद्धौ गम्यमानायां भविष्यति लट् वा स्यात् When it is indicated that because of the object that is wanted something is achieved. लट् is optionally used instead of लुट् or लृट्। Then it can be used 'यः अन्नं ददाति सः स्वर्गं याति, यः अन्नं दाता स स्वर्गं याता' यः अन्नं दास्यति सः स्वर्गं यास्यति। अन्नलिप्सुः एवं ब्रूते These are the words of a man who wants to get *Anna*. (प्र.स.3294)

यौजनशतिकः-योजनशतात् अधिगमनम् अर्हति इति यौजनशतिकः आचार्यः A teacher who deserves to be approached with

respect from a distance of hundred *yojanas*.

यौजनिकः-योजनं गच्छति One who can cover the distance of one *Yojana*.

यौवतम् } युवतीनां समूहः A group of
यौवनम् } young women.

यौगवारत्रम्-युगानां वरत्राणां च समूहः A multitude of yokes and ropes.

रक्षकतस्करः-रक्षकः यः चौर्यं करोति A police thief. (ग.र.म.पृ.156)

रक्षःसभम्-रक्षसः सभा The *Sabhā* (assembly hall) of *Rakṣas*. रक्षः पिशाचादि शब्दपूर्वः सभाशब्दः भवनार्थः, तत्पुरुषस्यान्ते नपुंसके प्रयुज्यते। 'पिशाच सभम्' 'असुरसभम्' इत्यादि The word 'सभा' meaning assembly hall, preceded by words रक्षस्, पिशाच etc., denoting demons takes नपुंसकलिङ्ग at the end of *Tatpuruṣa* compound. (कौ.826)

रज्जुशारदम्-(उदकम्) सद्यो हि रज्ज्वा उद्धृतम् उदकं प्रत्यग्रम् अनुपहतं च रज्जुशारदम् उच्यते (ग.र.म.419) Fresh water which has been just taken from the well.

रघुवृषभः-रघुः वृषभः इव Bull like *Raghu* (*Raghu* the great) एवं 'पुरुषर्षभः' 'भरतर्षभः' इत्यादि See गोवृन्दारक

रजयति मृगान्-(A) मृगयायां मृगान् ग्राहयति (In hunting) Attracts animals to be caught/hunted मृगयायाः मृगेभ्यश्च अन्यत्र रञ्जयति If it is other than hunting or animals रञ्जयति

रञ्जयति-(B) रक्तान् करोति Attracts. See above.

रथकट्या-रथानां समूहः Group of chariots.

रथंतरम्-(A) साम्नः नाम One *Sāman* of that name in *Sāmaveda*.

रथतारः-(B) रथेन तरति One who crosses by रथ (कौ.2963)

रथारथि-अव्य.Ind. रथौ आरुह्य युद्धं प्रवृत्तं रथारथि Chariot against chariot.

रथिकाश्वारोहम्-रथिकानाम् अश्वारोहाणां च समाहारः रथिकाश्वारोहम् Group of chariot (charioteers) soldiers and horsemen. See पाणिपादम्

रथिनी-रथानां सूमहः Group of chariots

रथ्यः-रथं वहति Which draws the chariot, Horse.

रथ्याः-रथाय हिताः Fit or convenient for chariots. (Streets)

रथ्या-रथानां समूहः Group of *Rathas*.

रन्ध्रान्वेषिन् } छिद्रान्वेषी Searching for
रन्ध्रानुसारिन् } week points.

रम्यपथो देशः-रम्याः पन्थानः यस्मिन् सः The country where the roads are beautiful समासस्यान्ते पथिन् शब्दः अकारान्तः भवति। 'पथिन्' changes into 'पथ' at the end of a compound.

राक्षसहतकः-दुष्टः राक्षसः A wicked Demon. (ग.र.म.पृ.156)

राजकम्-राज्ञां समूहः Group of Kings.

राजघः-राजानं यो हन्ति One who kills the king.

राजदन्तः-दन्तानां राजा राजदन्तः (अग्रगतः दन्तः) King of the teeth. The front tooth. पदव्युत्क्रमः Change in the order of words. (प्र.स.2199)

राजन्यकम्-राजन्यानां समूहः Group of princes.

राजन्वान्-स देशः यस्य राजा सुगुणः A country having a good king (ruler)

राजपौरुषम्-राजपुरुषस्य भावः कर्म वा (उभयपदवृद्धिः) Being a king's servant or the duty of a king's servant.

राजभोगीनः-राजभोगाय हितः Useful to the king.

राजकृत्वन्-राजानं कृतवान् One who made the king (कौ.3005)

राजयुध्वन्-राजानं योधितवान् One who made the king fight. (कौ.3005) Or One who has fought with the king.

राजशार्दूलः-राजा शार्दूलः इव Tiger-like King. Powerful king. 'गोवृन्दारकः' 'नरशार्दूलः' इत्यादयः

राजहंसः-राजा हंस इव 'Swan like king'. A magestic king. See गोवृन्दारकः

राजानति-राजेव आचरति Behaves like a king.

राजानम् आगमयति-राजागमनम् आचष्टे One who heralds king's arrival.

राजा राजधानीम् अध्यास्ते-The king stays in the capital city. See 'अधिशेते कैलासं महेशः'

राजीयति-राजानम् आत्मनः इच्छति Wants a king for him.

रात्रिंचरः / **रात्रिचरः** } रात्रौ चरति One who moves about during nights. (कौ.1008)

रात्रिंदिवम्-अव्य.Ind. रात्रौ च दिवा च (सर्वस्मिन् दिवसे) During the night and day (the whole day)

रात्रिः प्रभाता मे-रात्रौ निद्रैव न लब्धा, प्रभातमासीत् The night passed off without sleep (मृच्छक. IV)

रात्रिम् अटः / **रात्र्यटः** } See रात्रिंचरः

रात्रिम् अवसाययति-आरात्र्यवसानं दीव्यति "He allows the night pass off ". Plays the dice till the night passed off. (प्र.स.526)

रामः अयोध्याम् अनुवसति-*Rāma* resides in *Ayodhya*. See 'हरिः वैकुण्ठम् अधिवसति'

रामात् नाना / **रामेण नाना** / **रामं नाना** } रामं विना Without *Rāma*. 'नाना' इत्यव्ययेन सह पञ्चमी, तृतीया, द्वितीया वा प्रयुज्यते। 'नाना' Governs पञ्चमी, or तृतीया or द्वितीया।

'नाना रामेण नो शान्ति र्नाना वित्तान्न बान्धवाः।
नाना विद्यां न वा सौख्यं नाना दारान् सहायिता॥'

रामायणिकः-रामायणं करोति (कथयति) यः One who gives discourse on *Rāmāyaṇa*.

रामेण सनाथाः प्रजाः-रामः प्रजानां नाथः The people have a protector in *Rāma*. एवं 'रामेण समित्रः सुग्रीवः'। 'कृष्णेन सपुत्रः वसुदेवः' इत्यादयः।

राययति-रायम् आचष्टे Talks about money.

राशिभूताः-See ऊकभूताः (प्र.स.2153)

राष्ट्रियः-राष्ट्रे जातो भवो वा Born or living in a *Rāṣṭra* (state)

रुदति प्राव्राजीत् / **रुदतः प्राव्राजीत्** } रुदतः पुत्रादीन् अनादृत्य प्राव्राजीत् He took to orders without caring for his weeping children. यदा एका क्रिया अपरस्याः क्रियायाः लक्षणतया प्रयुज्यते तत्र प्रथमक्रियावाचकात् शब्दात्, अनादरे द्योत्ये, वा षष्ठी भवति। षष्ठ्यभावे सप्तमी When one action is mentioned as indicative of the time of an-

other action षष्ठी is used optionally to indicate contempt or indifference. 'तस्य पश्यतः अथवा तस्मिन् पश्यति अहरत्' इत्यादयः

रुरुपृषतम् / **रुरुपृषताः** - रुरवश्च पृषताश्च तेषां समाहारः The deer रुरुs and पृषतs. मृगनामवाचकानां द्वन्द्वः विकल्पेन एकवद्भवति The *Dvandva* with the names of different types of the deer is optionally used in singular number. (प्र.स.2318)

रूढव्रणः-यस्य व्रणः शुष्कः One whose wound has healed.

रोपितव्रणः-यस्य व्रणः शुष्कः कृतः One whose wound is healed. (active voice)

रूपयति-रूपं पश्यति Sees the form.

रूक्षपेषं पिनष्टि-रूक्षं पिनष्टि He pounds the rough one 'शुष्कपेषं पिनष्टि' (कौ.3356)

रेहायते-अरेहत् रेहत् भवति (रेहत् रहसि निर्घृणत्वे च) That was not secret or cruel becomes secret or cruel.

रोचनाकृत्य / **रोचनाकृत्वा** - श्रद्धामुत्पाद्य। प्रशंसां कृत्वा Having created interest. (ग.र.म.पृ.140) Having praised

रोमन्थायते-रोमन्थं वर्तयति Chews the cuds.

'स्नात्वा पीत्वा च भुक्त्वायमुपविश्यासने सुखे।
तद्रोमन्थायते वृत्तं रात्रौ तस्यास्तथात्मनः॥'

रोहायते-सरोषः भवति Becomes angry (रोहत् = सरोषः। अरोहत् रोहत् भवति)

लङ्कां निकषा समुद्रोऽस्ति-There is sea near *Lañkā*. 'निकषा' इत्यव्ययेन योगे द्वितीया भवति। 'निकषा' governs. द्वितीया।

लक्षसुप्तः-कपटसुप्तः Pretending to be sleeping. 'दीपं चैव न मर्षयेदभिमुखः स्याल्लक्षसुप्तो यदि' (भा.ना.च.पृ.229)

लग्नम्-(A) संसक्तम् Attached.

लगितम्-(B) लब्धम् Obtained.

लघुचेतस्, लघुचित्त / **लघुमनस्, लघुहृदय** - वि.a 1) नीचमानसः। संकुचितचित्तः। Light minded, little minded. Mean minded. (2) चपलः Frivolous. Fickle, unsteady.

लघुविक्रमः-शीघ्रगामी। शीघ्रव्यवहर्ता Having quick step, quick footed.

लघुवृत्तिः-(1) दुष्टप्रवृत्तिः। अविनीतः I'll behaved (2) अनुचितरीत्या कृतः Mismanaged.

लघुबोधिन्-शीघ्रं ज्ञाता Making a clever hit. (Understands fast)

लघुसमुत्थ-त्थान-वि.a अल्पप्रयत्नेन समुत्थापनम्। अल्पतयैव संनाहः Mobilising with little effort or on a small scale.

लघुहस्तः-(1) शीघ्रं कर्मकरणे दक्षः Light handed. Clever. Desterous (2) अनलसः। उत्साहशीलः। Active. Agile.

लघूत्थान-लघुसमुत्थान-वि.a शीघ्रं सोत्साहं कर्मकारी Working actively. Doing work rapidly.

लघुलघूत्थित-वि.a अतीव प्रातरेव उत्थितः Risen (from sleep) early.

लब्धवर्णः - पण्डितः। धीमान् Learned. Wise.

लब्धान्तरः / **लब्धावकाशः** - प्राप्तावकाशः One who has found an opportunity. One who got access or admission 'लब्धावकाशा मे प्रार्थना' (अभि.शा.I)

लब्धास्पदः-लब्धस्थानः। लब्धप्रतिष्ठः One who gained footing or secured a

positon. 'लब्धास्पदोऽस्मीति विवादभीरोः' (माल.अ.I.)

लब्धचेतस } वि.a पुनः प्राप्तचेतनः One who
लब्धसंज्ञ } has regained his consciousness.

लम्बमाने दिवाकारे-सायंकाले When the sun is hanging in the horison i.e. at the evening.

ललाटंतपः-ललाटं यः तपति (सूर्यः)। बाधाजनकः The sun who scorches the forehead. Trouble giver. 'विद्वल्ललाटंतपः' इत्यादयः

लवकः-लवनं यः साधु करोति One who is perfect in cutting.

लवणंकृत्य } रुचियुक्तं कृत्वा Having
लवणं कृत्वा } made it tasty. (ग.र.म. पृ.140)

लकुटिकः-दण्डधरः One who wields a staff (*Lāṭhi*) in his hand (पं.तं.पृ.223)

लवणयति-लवणयुक्तं करोति। लवणं करोति Makes salt. Adds salt. Makes tasty.

लवणस्यति-लवणम् आत्मनः अतीव लालसया वाञ्छति Wants salt ardently.

लालाटिकः-आज्ञार्थं यः सर्वदा स्वामिनः ललाटं पश्यन्नास्ते स भृत्यः An attentive servant (one who watches his master's countenance and learns by it what is necessary to be done).

लिप्तवासितम्-वासितं च तत् लिप्तं च First made fragrant and then smeared (applied to the body) पूर्वं सुरभीकृतं ततः लिप्तम्। पदव्युत्क्रमः Change in the order of words. (प्र.स.2199)

लुनीहि लुनीहि इति लुनाति-अधिकं पुनः पुनर्वा लुनाति He goes on cutting. (कौ.2147 वा)

लुप्तप्रतिज्ञः-अपालितप्रतिज्ञः One who has broken his promise.

लुभितः-(A) विमोहितः Deceived

लुब्धः-(B) अभिकाङ्क्षावान् Miser.

लूनयवम्-अव्य.Ind. लूनाः यवाः अत्र इति लूनयवं कालः The time when the *yavas* are cut. (प्र.स.2048)

लूयमानयवम्-अव्य.Ind. लूयमानाः यवाः अत्रेति लूयमानयवम् कालः The time when the *yavas* are being cut. 'लूयमानयवं यात आयाल्लूनयवं ततः'

लोककण्टकः-लोकस्य क्लेशजनकः The curse of man kind. Antisocial person.

लोकभावनः-लोकस्याभ्युदयकारी Promoting the welfare of the world.

लोकमर्यादा-लोके सर्वैः अनुसर्तव्यः नियमः An established or current custom.

लोकंपृणः-(1) लोकव्याप्तः Filling or pervading world. (2) लोकं पृणाति प्रीणयतीति लोकंपृणः One who pleases the world. (कौ.1027)

लोकयात्रा-लोकस्य रीतिः Worldly affairs. The course of worldly life.

लोकलेखः-सर्वसम्बन्धी लेखः A public document.

लोकवादः-लोके प्रचलितो वादः Public rumour. Common talk.

लोकसंग्रहः-लोकक्षेमः Welfare of the world.

लोचनाकृत्य } प्राकाश्य। सर्वैः दृष्टं यथा
लोचनाकृत्वा } भवति तथा कृत्वा (ग.र.म. पृ.140)

लोलुप्यते-गर्हितं लुम्पति Cuts in a wrong manner. (कौ.2635)

लोलुवः-यः पुनः पुनः लुनाति One who cuts again and again.

लोहितायति-ते-अलोहितः लोहितः भवति That which was not originally red becomes red.

लौकिकः-लोके विदितः Known in the world.

वक्षःस्थलम्-विशालं सुन्दरं वक्षः Broad chest. See अश्वमतल्लिका। 'उरःस्थलम्' इत्यादि।

वक्तुं न ददौ-वक्तुम् अवकाशं न ददौ Did not allow to speak 'लज्जैव वक्तुं न ददौ' (काद.पृ.395)

वक्रदण्डौ } वक्रदण्डश्च कुटिलदण्डश्च
कुटिलदण्डौ } वक्रदण्डौ अथवा कुटिलदण्डौ

Two persons wielding curved staffs समानार्थकाणां विरूपाणामपि समासे एकः शिष्यते When two different words of the same meaning are combined in a *Samāsa* any one of them is optionally dropped. See बालौ

वचनीयता-निन्दार्हत्वम् Blemish. Deserving accusation.

वञ्चयते-वञ्चितं करोति Cheats. वञ्च् to which णिच् is added takes A.P. in the sense of deceiving. णिजन्तः वञ्चधातुः प्रतारणार्थः आत्मनेपदी। 'माणवकं वञ्चयते' Cheats the boy. अर्थान्तरे तु (in other sense) 'सर्पं वञ्चयति' (परिहरति) (कौ.2739)

वचसि स्थानं-यथोक्तं करणम् Follow what is said by oneself or by somebody. 'कस्यान्यस्य वा वचसि मया स्थातव्यम्' (काद.332)

वञ्च्यम्-(A) गम्यम् That which is to be reached.

वङ्क्यम्-(B) कुटिलीकृतम् Bent.

वज्रलेपः-सुदृढः लेपः Cement.

वटरोपाध्यायः } मूर्खः उपाध्यायः Foolish
उपाध्यायवटरः } teacher

पदपौर्वापर्ये अनियमः Order of words is optional (प्र.स.2200)

√वद् takes (A.P.) in the following senses. अधोनिर्दिष्टेषु अर्थेषु वदधातुः आत्मनेपदी

(1) वदते (शास्त्रे) नवनवयुक्तीः उल्लिखन् भाषते इत्यर्थः Speaks brightly. (2) उपवदते (भृत्यान्) भृत्यान् सान्त्वयति Consoles the servants or makes them reconciliated. (3) वदते (क्षेत्रे) यत्नं करोति Makes efforts in the field. (4) वदते (शास्त्रे) शास्त्रं ज्ञात्वा ततः वदति Speaks after knowing *śāstra*. (5) विवदन्ते (क्षेत्रे) विमतिं दर्शयन्ति Quarrel in the field. (6) उपवदते, प्रार्थयते. Requests (7) संप्रवदन्ते ब्राह्मणाः। सर्वे संभूय स्पष्टं वदन्ति They speak clearly in union. अस्पष्टत्वे तु परस्मैपदम् If the speech is not clear p.p. only. 'खगाः संप्रवदन्ति'

वदावदः-वदतीति वदावदः One who speaks.

वनस्पतिः-'अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः' Such trees which yield fruits without flowers.

वनात् ग्रामः योजनम् } The village is at
वनात् ग्रामः योजने } a distance of one

yojana from the wood. यतः अध्वनिमानं

ततः पञ्चमी, तद्युक्तात् अध्ववाचकात् प्रथमा अथवा सप्तमी भवति The point from where distance is measured is used in *Pañcamī* and the word indicative of the distance is used either in प्रथमा or सप्तमी। 'ग्रामात् नगरं शतयोजनं अथवा शतयोजने' इत्यादि।

वनेकिंशुकः-"A *Kiṁśuka* tree in the wood". अचिन्तितोपलब्धम्। (अलुक्समासः)

वनेचरः-A forester (अलुक्समासः)

वनेबिल्वः-"A *Bilva* tree in the wood." अचिन्तितोपलब्धम् Anything that is found unexpectedly (अलुक्समासः)

वन्या-(1) वनानां समूहः A large number of thickets. (2) जलसंघातः A mass of water.

वयति-विरिवाचरति Behaves like a bird.

वयं ब्रूमः-We say (our/my view is this) (I speak; we two speak). अस्मच्छब्दः एकवचनद्विवचनयोः प्रयोक्तव्योऽपि विकल्पेन बहुवचने प्रयुज्यते। अस्मच्छब्द is optionally used in plural instead of singular or dual (कौ.818)

वयस्यः - वयसा तुल्यः "Equal by age". A friend.

वरम्-अव्य.Ind. अधिकतया वाञ्छनीयम् Better preferable. 'दारिद्र्यात् मरणं वरम्'। 'पक्षिद्वयाद्धि वृक्षाग्रे एकः पक्षी करे वरम्' इत्यादयः।

वरणपुष्पप्रवाहिका-वरणपुष्पाणि यस्यां क्रीडायां धार्यन्ते A game in which *Varaṇa* flowers are collected or worn. (कौ.3287)

वरयति / **वारयति** } उरुम् आचष्टे करोति वा Tells it is big or makes big.

वरिवस्यति-परिचर्यां करोति Makes service.

वर्जयित्वा-(तत्) विना Excepting 'सर्वमानयतु भवती, वर्जयित्वा भोजनम्' (भा.ना.च.21)

वर्णका-(A) कार्पासवस्त्रम् Cotton cloth.

वर्णिका-(B) वर्णयित्री A woman who describes.

वर्चायते-अवर्चस्वी वर्चस्वी भवति Attains lustre.

वर्जम्-विहाय (प्रायः पदान्तरेण सह प्रयुज्यते अयं शब्दः) Excepting without (generally used along with some other word.) 'प्राकारतोरणवर्जं सर्वं कौशाम्बी खल्वियम्' (भा.ना.च.)

वर्णयति-वर्णं गृह्णाति (वर्णयति पटः) Absorbs colour (प्र.स.525)

वर्ध्रिका-वर्ध्रिकासदृशः (वर्ध्रिका=चर्ममयी पुरुष प्रतिकृतिः) One who is like a sack of leather.

वर्या (कन्या)-(A) शतेन पुरुषाणां वरयितुं शक्या A girl who can be aspired for by hundred persons without any objection.

वृत्या (कन्या)-(B) अनुरूपेण वरणीया Who can be aspired for by only a selected person.

वर्षयति-वृद्धमाचष्टे करोति वा That which makes a man old or says that so and so is old.

वर्ष्यम् / **वृष्यम्** } वर्षितुं योग्यम् That which is to be rained.

वशंवदः-'अहं ते वशः' इति यः वदति सः वशंवदः One who says "I am under your control". (कौ.2953)

वशेकृत्य } आत्मनः वशे निधाय Having
वशेकृत्वा } brought under control
अलुक्समासः वैकल्पिकः।

वस्त्रक्रीता } वस्त्रं दत्वा क्रीता Brought by
वस्त्रक्रीती } giving clothes.

वहति अजां ग्रामम्-He takes the goat to the village 'वह्' धातुः द्विकर्मकः। 'वह्' 'to bear or take' governs two objects.

वहद्गु-अव्य.Ind. (1) वहन्ति, गोष्ठं गच्छन्ति, गावः अत्रेति सन्ध्यापूर्वकालः वहद्गु The time before twilight when the cows return to cow pens. (प्र.स.2084) (2) वहन्ति गावः भारं यस्मिन् काले When the bulls carrys the load.

वहंलिहः-वहं, स्कन्धं लेढि इति वहंलिहः गौः The bull which licks the shoulder.

वह्यम्-(A) वहन्ति अनेनेति वह्यम् शकटम् A cart.

वाह्यम्-(B) वोढव्यम् That which can be carried (कौ.2850)

वाक्त्वचम्-वाक् च त्वक् च तयोः समाहारः Word and skin चवर्गान्तात् द-ष-हान्तच्च समाहारद्वन्दात् अन्ते 'अ' स्यात् In *Samāhāradvandva* words ending in the letters च्, छ्, ज्, झ्, द्, ष् and ह् get 'अ' at the end (कौ.930)

वाक्त्विषम्-वाक् च त्विट् च तयोः समाहारः Word and light see 'वाक्त्वचम्' (कौ.930)

वाक्यम्-(A) 'एकतिङ् वाक्यम्' इत्यादिलक्षणलक्षितः पदसमूहः A sentence.

वाच्यम्-(B) वक्तुं योग्यम् That which is to be said.

वागपहारकः-निषिद्धग्रन्थान् यः पठति A stealer of speech. Reader of prohibited texts.

वाग्दण्डः-(1) वाचा दण्डः Reproachful words. (2) वाचः दण्डः Control of speech.

वाङ्मनसे-वाक् च मनश्च वाङ्मनसे Speech and mind (अकारान्तत्वम्) (कौ.945)

वाचंयमः - (A) वाचं यः यच्छति सः। मौनी A sage who observes silence.

वाग्यमः-(B) अशक्त्यादिना यः वाचं यच्छति One who is silent on account of illness etc.

वाचालः } कुत्सितं बहु भाषते यः One who
वाचाटः } speaks too much and in a bad manner.

वाचोयुक्तिः-(1) वाङ्निपुणः Skilled in speech. Eloquent. (2) वाचां निर्माणम् Arrangement. of words (अलुक्समासः)

वाच्यति-वाचम् आत्मन इच्छति Wants speech for him.

वाजयति-(A) कम्पयति Makes shake. Shakes

वापयति-(B) सुगन्धीकरोति Makes the hair fragrant.

वाडव्यम्-वडवानां समूहः Group of the mares.

वातमजः - वातं प्रति यः गच्छति स मृगः A beast which goes against the wind.

वाताय कपिला विद्युत्-The lightening of whitish blue colour is an omen indicative of gale or typhoon. उत्पातेन ज्ञापितं चतुर्थ्यां प्रयुज्यते That which is indicated by an omen is used in चतुर्थी। 'क्लेशाय (पुरुषस्य) वामाक्षिस्पन्दनम्' इत्यादि

वातिकम्-वातस्य कोपनं शमनं वा That which increases or reduces वात (A humour in the body)

वातूलः-(1) वातदोषपीडितः He who is effected by wind disease.
(2) वातस्य समूहः Calumn of wind. Whirl wind.

वत्सीयति-वत्सम् आत्मनः इच्छति Wants a calf for himself.

वापयति वाययति वा गाः पुरोवातः-गाः पूर्वदिग्वातः गर्भं धारयति The wind from eastern direction makes the cows pregnant. (Only in this sense these words are used.) (कौ.2604)

वारिपथिक-वि.a वारिपथेन आहृतम् । वारिपथेन गच्छति । That which is brought by water route or goes by water route.

वार्तिक-वि.a वृत्तौ साधुः Who is good in वृत्ति (Profession)

वार्दालीकृत्य (पार्दालीकृत्य)-प्राकाश्यं नीत्वा । हिंसित्वा Having publicised. Having killed. (ग.र.म.पृ.139)

वार्धकम्-वृद्धानां समूहः Group of the old.

वार्धुषिकः-वृद्ध्यै ऋणदाता One who lends money for interest.

वार्ध्रम् (चर्म)-वर्ध्रायै इदं चर्म Leather meant for strap (कौ.813)

वार्मणम्-वर्मधारिणां योधानां समूहः Collection of men in armour.

वांशभारिकः-वंशभारं हरति, वहति, आवहति वा वांशभारिकः One who steals, carries or brings the load of bamboos.

वांशिकः-वंशान् हरति, वहति, आवहति वा वांशिकः One who steals or carries or brings the bamboos.

वावदूकः- अधिकं यः वदति Talkative. Garrulous.

वाव्रज्यते-कुटिलं व्रजति Goes in a crooked manner. (कौ.2634)

वासतेयी-(रात्रिः) वसतौ साधुः Good for stay.

वासनम्-वसनेन क्रीतम् Bought for a cloth (by giving cloth)

वास्त्रम्-वस्त्राय इदम् Which is meant for the cloth.

वास्त्रिकः-वस्त्रं हरति अवहरति वा One who takes cloth or brings.

वास्तुच्छिद्रम्-तत् स्थानं यत्र जना न निवसन्ति Non-residential area (in a village or town.)

विकम्पनेकृत्य, विकम्पनेकृत्वा, विकपनेकृत्य, विकपने कृत्वा, प्रकपनेकृत्य, प्रकपनेकृत्वा-हिंसां कृत्वा Having hurt or killed (ग.र.म.पृ.141-142)

विकुरुते-(1) शब्दकरणम् इत्यर्थे विपूर्वः कृधातुः आत्मनेपदी । $\sqrt{}$'कृ' with 'वि' takes A.P. in the sense of making noise. 'स्वरान् विकुरुते' utters sounds. (2) अकर्मकोऽयं धातुः आत्मनेपदी When used as intransitive it takes A.P. छात्राः विकुर्वते (विकारं लभन्ते) Behave in an unusual manner. (कौ.2708)

विक्रमते-'वि' पूर्वकः क्रम् धातुः पादचलने अर्थे आत्मनेपदी । $\sqrt{}$'क्रम्' with 'वि' takes A.P. only in the sense of the movement of the feet. साधु विक्रमते वाजी Horse trods. अर्थान्तरे (In other sense) विक्रामति सन्धिः (द्विधा भवति) (कौ.2724)

विक्लीकृत्य-(1) विकृतं कृत्वा Having disfigured or spoiled (2) विचार्य Having considered (ग.र.म.पृ.137)

विगृह्यसंभाषा-प्रतिपक्षविजिगीषया कृता शास्त्रार्थचर्चा Discussing strategy to defeat an opponent (चरकसं.वि. स्थान. VIII)

विग्रः } विगता नासिका यस्य सः One
विख्यः } whose nose is cut or lost. (कौ.859)

विचप्रचा-विकृतिस्थता प्रकृतिस्थता च यस्यां सा The act (or state) in which there is change and stability (प्र.स. 2166)। विकृतं च प्रकृतं च यस्यां क्रियायां सा विचप्रचा The act which is improperly done and properly done. (ग.र.म.पृ.161)

विचतुरः-विशिष्टानि चत्वारि यस्य सः One who has the four important things. (अकारान्तत्वं विशेषः)

विजयते-उन्नतिं प्राप्नोति Comes out victorious. विपूर्वः जिधातुः आत्मनेपदी। 'जि' with 'वि' takes A.P.

वितिष्ठते-विपूर्वकः स्थाधातुः आत्मनेपदी। 'स्था' with 'वि' takes A.P. (कौ.2689)

वितूस्तयति-तूस्तानि विहन्ति। तूस्तं केशाः। जटीभूतकेशाः इत्येके। पापम् इत्यपरे। Combs and separates the matted hair. Destroys sin.

वित्त-वि.a (A) (1) धनम् Wealth (2) प्रसिद्धः Well-known (person etc.)

विन्न-वि.a (B) लब्धः Obtained. (कौ.3041)

विदयति } विद्वांसमाचष्टे करोति वा Calls
विद्वयति } him a scholar. Makes (him) a scholar.

विद्यास्नातकः-यः वेदाभ्यासं समापितवान् One who has completed Vedic studies.

विद्वत्कल्पः } ईषदूनः विद्वान् One who is
विद्वद्देशीयः } almost a scholar.
विद्वद्देश्यः } एवं भिषक्कल्पः 'इत्यादयः'

विद्वायते } विद्वानिव आचरति Behaves
विद्वस्यते } like a scholar

विधुंतुदः-चन्द्रावरोधकः राहुः One who troubles the mcon. *Rāhu* (कौ.2950)

विनाकृत्य, विनाकारम्, विनाकृत्वा (गतः)-अविना विना कृत्वा इत्यर्थः Having diverted someone or something (कौ.3384)

विना रामात् न सुखम्। विना रामेण न सुखम्, विना रामं न सुखम्-There is no happiness without *Rāma*. 'विना' इत्यव्ययेन योगे पञ्चमी अथवा तृतीया अथवा द्वितीया प्रयुज्यते। 'विना' Governs पञ्चमी, तृतीया or द्वितीया। 'विना विद्यायाः न संमानः' इत्यादयः।

विनीयः-(कल्कः) (A) विनेतुं (शोधयितुं) योग्यः ओषधिविशेषः पापं वा Some kind of herb or sin to be cleared.

विनेयम्-विनेतुं योग्यम् That which is to be tamed (कौ.2868)

विपाशयति-पाशं विमुञ्चति बध्नाति वा Removes the ropes or ties with ropes (प्र.स.5225)

विपुच्छयते-पुच्छं व्यस्यति Wags the tail.

विपूयः (मुञ्जः)-(A) रज्ज्वादिकरणाय शोधनीयः मुञ्जः Grass which is to be cleaned for *Munja* rope.

विपव्यम्-(B) मुञ्जभिन्नं शोधयितव्यम् Other than मुञ्ज grass which is to be cleaned.

विप्रकृष्टात् श्रुतः-दूरात् श्रुतः Heard from distance (प्र.स.2117) See स्तोकान्मुक्तः

विप्रत्रा करोति-विप्राधीनं करोति Makes over to *Brāhman* (प्र.स.2126) 'पुत्रत्रा करोति' इत्यादयः

विप्रवदन्ते विप्रवदन्ति वा भिषजः-भिषजः स्वैः वचनैः विभिन्नान् आशयान् प्रकटीकुर्वन्ति Physicians are expressing different opinions in their talk. विरुद्धोक्तिरूपे व्यक्तवाचां समुच्चारणे वदधातुः विकल्पेन आत्मनेपदी भवति In the sense of expressing different opinions the root वद् takes optionally A.P. when beings of clear speech (like men) are involved. (कौ.27 23)

विरमति-कार्यकरणादेः विरतो भवति Stops working. Does not work. 'विपूर्वः 'रम' धातुः परस्मैपदी I√ 'रम्' with 'वि' takes p.p. (कौ.2749)

विरिब्धः-(A) स्वरविशेषः Particular accent.

विरेभितः-(B) शब्दितः Producing sound.

विलीनयति, विलाययति विलालयति, विलापयति-(घृतं) द्रवीकरोति Makes (the ghee) melt. लोहादि विषये तु **विलापयति** इत्येव I But if it is a hard substance like iron **विलापयति** as in **लोहं विलापयति** (कौ.2591)

विवादपदम्-विवादस्थानम् Subject or title of dispute

विवादवस्तु-विवादास्पदो विषयः The subject of dispute. The issue under consideration.

विशयः-(A) संशयः Doubt.

विशायः-(B) पर्यायेण शयनम् Sleeping by turns as in the case of watchmen etc. (कौ.3210)

विशस्तः-(A) अविनीतः Arrogant.

विशासितः-(B) हिंसितः Harmed killed.

विशिष्टमतः-विशिष्टः इति मतः One who is thought to be great or good. (प्र.स.2153)

विंशम्-(शतं सहस्रं वा) See **एकादशम्**

विंशकः / **वैंशतिकः** } विंशत्या क्रीतः Bought for twenty

विश्वंभरः-(A) विश्वं बिभर्ति I विष्णुः I Lord *Viṣṇu*.

विश्वभारः-(B) 'विश्वं बिभर्ति' विष्णोः अन्यः Any one other than *Viṣṇu*.

विश्वासस्थानम्-विश्वासयोग्यः Trustworthy. Confidential.

विषपुष्पकः-विषपुष्पकैः जनितः ज्वरः Fever caused by विषपुष्पs.

विषमम्-अव्य.Ind. समायाः विगतत्वम् Completion of the year. विषमम् अभूत् बालस्य वत्सरावसानम् अभूत् I (प्र.स.2084)

विषमेण एति-विषमं गमनं करोति Goes in an uneven manner.

विष्टरः-वृक्षः आसनम् A tree seat.

विस्तरः-वाक्यस्य विस्तृतिः Expansion of the sentence.

विष्णुं प्रति भक्तः / **विष्णुं परि भक्तः** / **विष्णुम् अनु भक्तः** / **विष्णुम् अभि भक्तः** } He is devotee of *Viṣṇu*. इत्थं भूताख्याने 'प्रति' 'परि' 'अनु' भिः योगे द्वितीया प्रयुज्यते When a fact is to be stated 'प्रति', 'परि', 'अभि' and 'अनु' govern द्वितीया (कौ.552)

विष्णुमित्राय शतम् आशृणोति } He
विष्णुमित्राय शतं प्रतिशृणोति } promises hundred to *Viṣṇumitra*; प्रथमं विष्णुमित्रेण याचितः तस्मै प्रतिशृणोति । अत्र प्रथमक्रियायाः याचनायाः कर्ता चतुर्थ्यां प्रयुज्यते । 'प्रति' इति उपसर्गेण 'आ' इत्युपसर्गेण वा 'श्रु' धातोः योगे पूर्वक्रियायाः कर्तुः चतुर्थी भवति । When the root 'श्रु' is preceded by 'प्रति' or 'आ' the agent of the earlier action (here request) is used in चतुर्थी । 'रामः सुग्रीवाय वालिवधं प्रत्यशृणोत्' इत्यादि ।

विष्णूयति-विष्णुमिव आचरति Treats (the guest) like *Viṣṇu*.

विष्यः-(1) विषेण वध्यः Deserves to be killed by poison. (2) विषाय हितम् Good for poison. Useful as poison.

विसंवादित-वि.a विघातितः Disturbed 'रमणीयः खलु कथायोगो नृशंसेन विसंवादितः' (भा.ना.च पृ.32)

विसहनेकृत्य } प्रोत्साह्य, समर्थं कृत्वा
विसहने कृत्वा } Having encouraged. Having made efficient. (ग.र.म.पृ.141)

विस्तरः-(A) वाक्यादीनाम् आधिक्यम् Length of words 'ग्रन्थविस्तरः'

विस्तारः-(B) शब्दभिन्नानां प्रथनम् Spreading of anything other than words. 'कटविस्तारः' इत्यादि । (कौ.3204)

विस्मृतप्राय-वि.a विस्मृतमिव Almost forgotten.

विहस्तः-व्याकुलीभूतः Confounded. Bewildered. Overpowered.

विहसनेकृत्य, विहसनेकृत्वा-विहस्य Having laughed.

वीरपाणम्-वीरपाणं तु तत्पानं वृत्ते भाविनि वा रणे Soldiers drinking liquor either before or after fight.

वृक्षकः-अल्पो वृक्षः Small tree. अल्पार्थे 'कः' । 'क' in the sense of small. एवं 'बालकः' 'ग्रामकः' इत्यादि

वृक्षच्छायम्-बहूनां वृक्षाणां छाया Shade of many trees.

वृक्षच्छाया } एकस्य वृक्षस्य छाया Shade
वृक्षच्छायम् } of one tree. See 'कुड्यच्छायम्' (कौ.825)

वृक्षं प्रति विद्योतते विद्युत् } Lightning
वृक्षं परि विद्योत्वते विद्युत् } shines in
वृक्षम् अनु विद्योतते विद्युत् } the direction of the tree लक्षणे द्योत्ये, प्रति परि अनुभिः योगे द्वितीया प्रयुज्यते When indicating something as a mark. 'प्रति', 'परि' and 'अनु' govern द्वितीया, 'शिखरं प्रति प्रसरति मेघः' इत्यादयः । (कौ.552)

वृक्षम् अवचिनोति-वृक्षात् फलानि एकैकशः गृह्णाति Collects fruits from the tree. 'चि' धातुः द्विकर्मकः The root 'चि' governs two objects.

वृत्तम् (छन्दः)-(A) छात्रेण सम्पादितं (अधीतं) छन्दः (वेदः) *Veda* which is acquired by the student.

वर्तितम्-(B) हस्तादिना परिवर्तितं रज्ज्वादि (Rope etc.) Twined or twisted.

वृत्तेन क्षिप्तः } वृत्तेन निन्दितः One with
वृत्ततः क्षिप्तः } blemished conduct (कौ.2113) एवम् 'जात्या क्षिप्तः, जातितः' इत्यादि ।

वृत्तेन न व्यथते } वृत्तेन न चलति Does not
वृत्ततः न व्यथते } swerve from good conduct. (कौ.2113)

वृत्तेन हतः-वृत्तेन हेतुना यो निन्द्यो भवति One who got spoiled on account of his conduct.

वृद्धकार्तान्तिकः / **कार्तान्तिकवृद्धः** } वृद्धः ज्योतिः शास्त्रावित् Old astrologer. पदपौर्वापर्ये अनियमः Order of words optional (प्र.स.2200)

वृद्धयुवतिः-कुट्टनी A procuress.

वृद्धोक्षः-वृद्धश्चासौ उक्षा च वृद्धोक्षः Old bull (कौ.945) (अकारान्तत्वम्)

वृन्दयति-वृन्दारकमाचष्टे Calls him God.

वृषगोयुगम्-द्वौ वृषौ वृषगोयुगम् Two bulls. 'गोयुगम्' इति प्रत्ययसदृशः शब्दः । एवम् 'उष्ट्रगोयुगम्' 'अजगोयुगम्' इत्यादि। 'गोयुगम्' is like a suffix.

वृषस्यति-वृषमात्मनः मैथुनार्थम् इच्छति (गौः) (cow) which needs a bull for mating. पुमिच्छूनां नार्यादीनामपि विषये प्रयोगाः Can be used in the case of human beings also. 'इति रामो वृषस्यन्तीं वृषस्कन्धो शशास ताम्' (रघु.12.14)

वृष्य-वि.a (1) वृषाय हितम् Good for the bull (2) कामवर्धकम् Which stimulates amorous desire, Aphrodisiac.

वेगात् वेगतरं याति-आदौ वेगेन, ततः अधिकतरवेगेन, ततः अधिकतम वेगेन याति। Goes increasing the speed gradually. (पं.तं.पृ.250)

वेणुवीणम्-वेणूनां वीणानां च समाहारः वेणुवीणम्। प्राणिवर्जितद्रव्यजातीनां द्वन्द्वः एकवत् स्यात् The group of flutes and lyres. The *Dvandva* with words denoting the species of inanimate objects is used in singular number in neuter gender (प्र.स.2312)

वेतनं दत्तम्-(क्लेशादीनां) प्रतिफलं दत्तम् Compensation is given. दत्तं वेतनमस्य परिखेदस्य (भा.ना.च.पृ.30)

वेतसवृत्तिः-बलवता शत्रूणां विषये आनुकूल्येन स्थितिः (यथा वेतसलता जलप्रवाहम् अनुसरति) The method followed by a cane creeper which bends in the direction of the flow of water. Not to resist the force of a powerful enemy. (पं.तं.पृ.156)

वेदापयति-वेदम् आचष्टे करोति वा He imparts knowledge. Makes something as *Veda* (an authority)

वेहायते-गर्भघातिनी भवति Becomes destroyer of womb. (वेहत्=गर्भघातिनी गौः)

वेष्यः-वेषेण सम्पादी An actor who looks more beautiful by dress.

वैकथिकः-विकत्थायां साधुः Good in *Vikatha* (small anecdotes 'पिट्ट कथलु' in Telugu)

वैणुकः-वेणौ साधुः Good in flute.

वैतण्डिकः-वितण्डायां साधुः One who is proficient in destructive arguments.

वैधेयः-मूढः A fool.

वैयल्कसा (व्याधिः)-व्यल्कसे अत्यन्ताधमभक्ष्ये भवः। यद्वा व्यल्कसो नाम देशो ग्रामादिर्वा। A disease caused by a very bad rotten food or prevalent in a village or country called व्यल्कस। (ग.र.म.)

वैयाकरणखसूचिः-'यः पदपदार्थनिर्णयं कर्तुमुचितं पृष्टः सन् निष्प्रतिभत्वात् खम् आकाशं सूचयति स एवमुच्यते'. A grammarian of limited knowledge (who when asked to clarify the formation of a word and its meaning points at the sky to divert the attention of the questioner) (ग.र.म.पृ.155)

वैयुष्ट-वि.a व्युष्टे (प्रभाते) दीयते कार्यं वा That which is given or is to be done in the morning 'प्रिये वैयुष्टपानीयं काफीमानय सत्वरम्'।

वैरङ्गिकः-विरङ्गं, विरागं, नित्यं यः अर्हति One who has subdued his passions and desires for ever. An ascetic.

वैरं निर्यातयति-प्रत्यपकारं करोति Takes revenge. Avenges. 'राज्ञो वैरं गोषु निर्यातयन्ति' (भा.ना.च 392)

वैरायते-वैरं करोति Maintains enemity.

वैश्वकथिकः-विश्वस्य कथायां साधुः Good at world, history, wored information.

वैश्वजनीन-(1) विश्वजने साधुः Good for all men (2) विश्वजने हितः Beneficial for all men.

व्यतिराते-अन्येन करणीयं दानं अन्यः करोति One gives something which was to be given by other man परस्मैपदस्य स्थाने आत्मनेपदम् *Ātmanepada* instead of *Parasmaipada* (कौ.2680) 'पिताग्रहीदृणं पूर्वं व्यतिरातेऽद्य तत्सुतः'

व्यतिलुनीते-अन्यस्य योग्यं लवनमन्यः करोति He cuts/destroys something which has to be done by somebody else. परस्मैपदस्थाने आत्मनेपदम्। आत्मनेपद instead of परस्मैपद (कौ.2680)

व्यतिस्ते-अयोग्यः तत् कर्म करोति An incompetent person, attempting a work. परस्मैपदस्थाने आत्मनेपदम् A.P. instead of p.p. 'पाठनं विदुषा कार्यं व्यतिस्तेऽयं विमूढधीः'

व्ययशरीरम्-व्ययितं सर्वं धनम् Total expenditure.

व्यवहारलेखनम्-लिखितरूपेण अपराधनिवेदनम् Giving a complaint in writing. (मृ.शक.)

व्याकुलः व्यवहारः-सत्यं किमिति शीघ्रं निर्णेतुम् अशक्यः व्यवहारः Complicated business or work (मृ.शक.)

व्याकरणसमापनीय-वि.a व्याकरणसमापनं प्रयोजनमस्य That which has completion of *Vyākaraṇa* as its purpose.

व्याकुलिती रिपुजने-रिपुजनं व्याकुलितवान् One who had created panic among the enemies (सप्तमी)

व्यापृतः-कार्यलग्नः Engaged in some work. Occupied with some work.

व्यायामिकः-व्यायामः प्रयोजनम् अस्य That the purpose of which is to do exercise. 'व्यायामिकेयं क्रीडा मे कान्दुकी न जिगीषया'।

व्यावक्रोशी-(स्त्री लिं) परस्परम् आक्रोशः. Abusing each other

'व्यावक्रोशी सदा यत्र मुष्टीमुष्टि कचाकचि।
तत् पिशाचसभं प्रोक्तं तद्भिन्ना नृसभा मता'॥

व्यावहासी-परस्परं हासः Laughing at one another.

व्यावहारिकः-व्यवहारेण चरति That which is in practice. Who moves about on some work.

व्रजम् अवरुणद्धि गाम्-He confines the cow to the cow-pen. रुध् धातुः तत्समानार्थकाश्च द्विकर्मकाः The root रुध् and its synonims govern two objects. 'कारागारं निरुणद्धि चोरम्' इत्यादि।

व्रजोपरोधं गाःस्थापयति
व्रजे उपरोधं गाः स्थापयति
व्रजेन उपरोधं गाः स्थापयति
} व्रजे उपरुध्य गाः स्थापयति Stations the cows in the cow pen. See पार्श्वोपपीडं

शेते (कौ.3370) 'कारागारोपरोधं बध्नाति चोरम्' पञ्जरोपरोधं शुकं स्थापयति' इत्याद्याः

व्रतयति-(1) भक्षयति Swallows पयः व्रतयति (2) भक्षणात् परिहरति Avoids from eating पापस्यान्नं व्रतयति

व्रणे प्रहारः-एकेन कारणेन दुःखितस्य दुःखान्तरोत्पादनम् Giving an additional trouble. 'आर्य अलमिदानीं व्रणे प्रहर्तुम्' (भा.ना.च.पृ.290)

व्रातीनः-व्रतेन, शरीरायासेन, जीवति न तु बुद्धिवैभवेन Who lives by labour, not by intelligence. (2) Living by violence.

व्रीहियवम् } **व्रीहियवाः** } व्रीहयश्च यवाश्च तेषां समाहारः Rice and *yavas*. धान्यानां द्वन्द्वः वा एकवत् भवति। द्वन्द्व with names of food grain is optionally used in singular number. (प्र.स.2318)

व्रीहिसंघाटः } **व्रीहिसंघातः** } व्रीहीन् यः संघातीकरोति That which or who collects the rice into a heap. एवं 'वर्णसंघाटः' -वर्णसंघातः। 'पदसंघाटः - पदसंघातः' इत्यादि

व्रैहेयम्-व्रीहीनां भवनं क्षेत्रम् Field where rice is produced.

शकृत्करिः-(A) गोः वत्सः A calf.

शकृत्कारः-(B) वत्सात् अन्यः यः शकृतं करोति Any other animal which drops dung.

शङ्कव्यं (दारु)-शङ्कवे हितम् Wood intended or good for spike.

शङ्कितवर्णः-केनचित् कारणेन शङ्काकुलः अथवा शङ्कनीयः One who appears to be afraid or suspicious of something. One who has to be suspected. 'किं त्वं शङ्कितवर्ण इव ?' भा.ना.च.पृ.239)

शतं जयति देवदत्तम्-He wins hundred from *Devadatta*. जिधातुः तत्समानार्थकाश्च द्विकर्मकाः The root 'जि' and its synonyms govern two objects 'शत्रुं राज्यं जयति' इत्यादयः

शतंदायी-शतं ऋणतया येन दातव्यं सः One who owes hundred. एवं 'सहस्रं दायी' इत्यादयः (कौ.3311)

शतं प्रतिजानीते-शतम् अङ्गीकरोति Accepts hundred. प्रतिपूर्वकः ज्ञाधातुः आत्मनेपदी 'ज्ञा' with प्रति takes A.P.

शतं सञ्जानीते-शतम् अभिजानाति Recognises hundred. 'सम्' पूर्वक ज्ञाधातुः आत्मनेपदी The root ज्ञा with सम् should be used in A.P.

शताद् बद्धः-शतरूप्यकाणाम् ऋणात् हेतोः बद्धः He was arrested on account of the debt of hundred ऋणे कुत्रचित् हेतुभूते पञ्चमी When debt is the cause of something it is used in पञ्चमी। 'सहस्रात् दुःखितः' इत्यादि

शतिकम्, शत्यम्-(1) शतेन क्रीतम् Bought for hundred. (2) शतस्य निमित्तम्। अथवा सूचकम्। (दक्षिणाक्षिस्पन्दनम् इत्यादौ) (The throbbing of the eye) Which indicates profit of one hundred.

शतेन परिक्रीतः } **शताय परिक्रीतः** } शतेन कर्मकरतया नियुक्तः Employed as a servant for a fixed time by offering hundred. परिक्रयणार्थे तृतीया चतुर्थी वा भवति। 'क्री' with परि governs either तृतीया or पञ्चमी in the sense of employing for a fixed period.

शतेन शतेन वत्सात् पाययति पयः-वत्सान् शतेन परिच्छिद्य पयः पाययति He makes the

calves drink water taking then out in groups of hundred. अत्र 'परिच्छिद्य' इति गम्यते Here 'परिच्छिद्य' is the implied action. दशकेन दशकेन फलानि पिटकेषु बध्नाति' इत्यादयः See 'अलं श्रमेण'।

शंतातिः-मङ्गलप्रदः Conferring happiness. Propitious auspicious.

शत्रुंजयः-(A) हस्ती Elephant.

शत्रुंजयः-(B) शत्रुं यो जयति One who defeats enemy.

शत्रुंतपः-(A) कस्यापि नाम Somebody with that name.

शत्रुतापः-(B) शत्रुं यः तापयति One who troubles enemy.

शत्रुं निघ्नानः-शत्रुहननसमर्थः Capable of killing the enemy. शक्तिद्योतने 'चानश्' (आन) प्रत्ययः सर्वेभ्यः धातुभ्यः To indicate capacity 'चानश्' (आन) is added to all the roots irrespective of its being A.P. or p.p. (कौ.3109) 'शतं भृत्यानां पुष्णानः' इत्यादि

शत्रुंसहः-(A) कस्यापि नाम Name of somebody.

शत्रुसाहः-(B) यः शत्रुं सहते He who can withstand enemy.

शत्रुहः-(A) शत्रूणां हन्ता Destroyer of the enemies. आशिष्यर्थे शत्रुहः When benediction is implied शत्रुहः। 'शत्रुहस्ते पुत्रो भूयात्'।

शत्रुघातः-(A) Destroyer of enemies. आशीरर्थाभावे शत्रुघातः When there is no benediction meant. राजायं शत्रुघातः।

शत्रून् अगमयत् स्वर्गम्-He made the enemies to go to heaven. णिजन्ताः गमनार्थकधातवः द्विकर्मकाः The roots in the sense of going, when they are used in their causative forms (णिजन्तs) govern two objects. 'बालं ग्रामं प्रेषयति' इत्यादयः

शपथपत्रम्-शपथपूर्वकं कश्चन विषयं निवेदयितुं न्यायालयादिषु दीयमानं पत्रम् Affidavit. A statement on oath.

'शपामि सत्येन' शपामि प्राणैः-इत्यादि एते शपथप्रकाराः. "I swear by truth", "I swear by my life" etc. 'सत्येन शपामि कस्मा अपि न आख्यास्यामि' (भा.ना.च.पृ.29)

शब्दापयति - आह्वयति Calls.

शब्दायते - शब्दं करोति Makes noise.

शमीदृषदम् - शमी च दृषत् च तयोः समाहारः शमीदृष्टदम् See 'वाक्त्वचम्' (कौ.930)

शम्बाकरोति-अनुलोमं कृष्टं क्षेत्रं पुनः प्रतिलोमं कर्षति He ploughs the field in opposite direction which was ploughed earlier in one direction.

शयाना भुञ्जते यवनाः-The greeks eat while lying down क्रियायाः परिचायके अर्थे वर्तमानात् धातोः 'शानच्' भवति। 'शानच्' (आन) in 'शयान' is used to indicate that शयन is the sign. It is known on account of lying down at the time of eating that the eater is a *yavana*. 'उच्चैः गायन्तः प्रार्थयन्ते माहम्मदाः' इत्यादयः

शय्योत्थायं धावति-झटिति शय्यायाः उत्थाय धावति। 'एवं नाम त्वरते यत् अवश्यकर्तव्यमपि नापेक्षते। शय्योत्थानमात्रपेक्षते' Just he gets up from bed and runs. त्वरायां गम्यमानायाम् अपादाने उपपदे धातोः णमुल् (अम्) भवति When hurry is implied the root takes 'णमुल्' (अम्) at the end when preceded by अपादान। 'हर्म्यावपातं युध्यते'

(Jumping down from the terrace he fights) इत्यादि (कौ.3373)

शरपुरुषीयम्-'शरश्च क्षिप्तः प्राकाराच्च पुरुष उत्थितः । स तेन हतः । तत्तुल्यं शरपुरुषीयम्' (ग.र.म.पृ.239) यादृच्छिकम् Arrow was shot; man rose from the compound wall. He was killed by the arrow. Anything which is like this is शरपुरुषीय Accidental.

शरीरबद्धः-बद्धं शरीरं येन सः Endowed with body. Embodied 'शरीरबद्धः प्रथमाश्रमो यथा' (कुमा.V.30)

शरीराय हितम्-Good for the body. 'हित' शब्देन योगे चतुर्थी । 'हित' governs चतुर्थी । 'बालाय गोघृतं हितम्' इत्यादयः

शर्करोन्मज्जनीयम्-'शर्करा च क्षिप्ता पुरुषस्य च उन्मज्जनम् । तत्तुल्यं शर्करोन्मज्जनीयम्' । यादृच्छिकम् Stone is thrown, the man got up from the water. Anything accidental like this is शर्करोन्मज्जनीयम् (ग.र.म.पृ.239)

शलाकापरि-अव्य.Ind. शलाकया विपरीतं संवृत्तम् Which has gone wrong by a defective throw of the *Śalākā* in gambling.

शलाकापरीक्षा-पुस्तके पत्रान्तरेषु शलाकां प्रवेश्य तत्र यः विषयः वर्तते तं प्रति पृष्ट्वा परीक्षार्थिनां परीक्षणम् Testing the candidates by opening a book at random by poking a needle and question on the subject found on the page.

शवयति / **शुनयति** } श्वानम् आचष्टे Calls 'a dog'.

शवशरीरोद्वर्तनम् - शवशरीरस्य संवाहनम् (embellishing) Shampooing the dead body. व्यर्थः प्रयासः Vain effort.

शश्वायते-अशश्वत् शश्वत् भवति That which is not permanent becomes permanent. 'शश्वायते सुखं मुक्तौ'

शाकटः-शकटं वहति यः गौः The bull which draws the cart.

शाकपार्थिवः-शाकप्रियः पार्थिवः शाकपार्थिवः The king fond of vegetables. समासे 'प्रिय' शब्दः लुप्तः । एवं 'सूपब्राह्मणः' इत्यादयः ।

शाकप्रति-अव्य.Ind. शाकस्य लेशः शाकप्रति A little bit of vegetable. 'सूपप्रति' 'घृतप्रति' इत्यादयः । (कौ.663)

शाकेन सार्धम् अन्नं खादति-Eats rice with vegetables. 'पुत्रेण सह आगतः पिता' 'मित्रेण सार्धं गच्छति' इत्यादयः

शाखां ग्रामं कर्षति-He drags the branch of the tree into village. 'कृष' धातुः तत्समानार्थकाश्च धातवः द्विकर्मकाः । 'कृष्' and its synonyms govern two objects. 'बालं पाठशालां कर्षति' इत्यादयः

शाखानगरम्-महानगरस्य समीपे अल्पं नगरम् Satellite town. (काद.115)

'शाखानगर-निर्माणमकुर्वन्तोऽल्पबुद्धयः ।
गृहैर्गृहाणामुपरि दूषयन्त्यखिलां पुरीम्' ॥

शाङ्कुपथिकम्-शङ्कुरिव ऋजुः पन्थाः शङ्कुपथः । तेन आहृतं गच्छति वा That which is brought or taken by a straight road.

शाटीप्रच्छदम्-शाट्यश्च प्रच्छदाश्च तेषां समाहारः शाटीप्रच्छदम् Upper and lower and blankets. द्वन्द्वे एकवचने एव (प्र.स.2317)

शातकौम्भम्-शतकुम्भो नाम पर्वतः । तत्र भवं शातकौम्भम् सुवर्णम् Gold. उभय पदवृद्धिः

शातमानम्-शतमानेन क्रीतम् Bought for the measurement of hundred

शान्तं पापम्, शान्तं पापम्-पापं प्रशाम्यतु। एतादृशं मा भवतु May the sin be destroyed. A phrase indicative of the disapproval of a bad thing being reported (भा.ना.च.पृ.308)

शारिकुक्षः-शारेः कुक्षिरिव कुक्षिः यस्य सः शारिकुक्षः One whose belly is like that of the *Śāri* bird. अकारान्तत्वं विशेषः (कौ.890)

शारदम्-शरदि दीयते कार्यं वा That which is given or done in *Śarad* season.

शालीनः-शालाप्रवेशमर्हति शालीनः अधृष्टः One who deserves to enter into the house to remain in the house only. Timid fellow.

शालेयम्-शालीनां भवनं क्षेत्रम् The field where rice grows.

शास्ति माणवकं धर्मम्-Teaches *Dharma* to the boy 'शास्' धातुः तत्समानार्थकाश्च द्विकर्मकाः। शास् 'to teach' and its synonyms govern two objects.

शिक्षते-विषयं ज्ञातुमिच्छति Wants to know धनुषि शिक्षते -धनुर्विषये ज्ञाने शक्तो भवितुमिच्छति He wants to know every thing connected with the bow. (सन्नन्त of शक्) (कौ.2685)

शिथिलं चक्षुः-दुर्बला दृष्टिः Weak sight. 'जरा शिथिलं मे चक्षुः' (भा.ना.च.पृ.414) 'शिथिलं श्रोत्रम्' इत्यादि।

शिरसा प्रणमति-शिरः अवनम्य प्रणमति Pays respect by bowing his head.

शिरसि उपघ्राय-सवात्सल्यं शिरः परिचुम्ब्य Having smelt on the head to indicate affection and love towards young children etc.

शिरस्यः-शिरसे हितः Good for the head.

शीर्षच्छेदिकः / **शीर्षच्छेद्यः** } शिरसः छेदेन वधमर्हति यः Deserving death by decapitation.

शीलवञ्चना-शीलविषये शङ्का Lose of character. Suspician regarding character. 'अकामा ह्रियतेऽस्माभिः काचित् स्वाधीन यौवना। सा भ्रष्टा शङ्कया तस्याः प्राप्तेयं शीलवञ्चना॥' (भा.ना.च.207)

शिवः मम हृदयम् उपवसति-Lord *Śiva* Dwells in my heart. See हरिः वैकुण्ठम् अधिवसति

शिवाय नमः-Salutations to *Śiva*. नमः शब्दयोगे चतुर्थी भवति। नमः (Ind.) governs चतुर्थी

शिवास्ते पन्थानः सन्तु-ग्रामान्तरं देशान्तरं वा गच्छतां पुत्रमित्रदीनां विषये शुभकामना - मार्गे ते सुखं भूयात् इति May you have a comfortable journey. A way of bidding farewel to a person going on a journey.

शिष्यान् वेदार्थं वेदयति-Makes the students understand the meaning of *Veda*. णिजन्ताः ज्ञानार्थकधातवः द्विकर्मकाः Roots with the sense of knowing, when they are used as causatives (णिजन्त) govern two objects.

शीघ्रायते-अशीघ्रः शीघ्रः भवति That which or who was not quick becomes quick.

शीतकः-शीतं करोतीति शीतकः। अलसः Lazy fellow.

शीतंकृत्य / **शीतंकृत्वा** } अनादृत्य Having shown disrespect or lack of interest (ग.र.म.पृ.142)

शीतालुः-यः शीतं न सहते One who cannot withstand cold.

शीतोष्णम् } शीतं च उष्णं च शीतोष्णम्
शीतोष्णे } अथवा शीतोष्णे Cold and heat. विप्रतिषिद्धयोः द्वन्द्वः वा एकवद् भवति *Dvandva* consisting of words denoting opposite things or qualities is optionally used in एकवचन (प्र.स.2318) 'सुखदुःखम्, सुखदुःखे' इत्यादयः

शीनम्-(A) **घृतम्**-घनीभूतम् Ghee which has become घन (Clustered)

शीतम्-(B) शीतस्पर्शम् Cold (कौ.3021)

शीर्षण्यः-शिरसे हितः Good for head.

शुकबकम् } शुकाश्च बकाश्च Parrots
शुकबकौ } and starks. शकुनीनां द्वन्द्वः वा एकवद् भवति The *Dvandva* of birds is optionally used in singular. (प्र.स.2318)

शुक्लशुक्लः-ईषत् शुक्लः A little white (कौ.2147)

शुचीयते-अशुचिः शुचिः भवति That which or who was not pure or pious becomes pure.

शुनिंधयः-शुनीं धयति यः बालश्वा A young dog which sniks the udders of the bitch. A baby pup.

शुन्यम् } (1) शुने हितम्। That which is
शून्यम् } useful to the dog. (2) रक्षपालमात्रेणापि रहितं गृहं कुटीरकारि A place without anyone to look after like a hut etc. (3) पर्वतारण्यस्थानं तु उपचारेण (ग.र.म. पृ.390) Hills and forests are called शून्य (empty without men) in the secondary sense of the word.

शुभंयुः-शुभम् अस्य अस्तीति Auspicious. Fortunate.

शुश्रूषते-श्रोतुमिच्छति Wants to hear. 'श्रु' धातोः सन्नन्तमिदं रूपम् आत्मनेपद एव प्रयुज्येत This is desiderative form of श्रु and takes A.P. only instead of P.P. (कौ.2731)

शुष्ककलहः-मिथ्याकलहः Mock quarrel. Pretended quarrel. (पं.तं.पृ.155)

शुष्कपत्रराशेः उपरि पतितमात्मानमपश्यम्-I found myself fallen on the heap of dry leaves. (Note the similarity of expression in Sanskrit and English) (काद.73)

शुष्कपेषं पिनष्टि-शुष्कं पिनष्टि। 'शुष्क' 'चूर्ण' 'रूक्ष' शब्दोपपदात्' 'पिष्' धातोः 'णमुल्' (अम्) भवति। पिष धातुरेव प्रधानक्रियायां प्रयुज्यते। 'पिष' "to crush or pound", when it is used along with the words शुष्क, चूर्ण and रूक्ष, takes 'णमुल्' (अम्) at the end the same root is used in the main verb. (कौ.3356)

शूद्रा-(A) शूद्रजातीया स्त्री A woman of *Śūdra* caste.

शूद्री-(B) शूद्रस्य भार्या Wife of a *Śūdra.*

शून्यं (मे) हृदयम्-उद्विग्नं हृदयम्। शोकाकुलम् "Heart is empty". It is used to indicate the grief sticken state of the mind when it cannot think properly. 'मोहं गत इति श्रुत्वा शून्यमिव मे हृदयम्' (भा.ना.च पृ.10)

शूलाकरोति-मांसं शूलेन पचति Cooks the meat keeping it at the end of a spike.

शूलाकृतम्-शूलाग्रे निक्षिप्य पक्वं मासम् Meat cooked keeping it at the end of a spike barbicane.

श्रुतम्-(A) (क्षीरम्) स्वयमेव विक्लिन्नं पक्वं वा क्षीरम् Boiled milk or broken milk.

श्राणम्, श्रपितं वा-(B) होमार्थं पक्वं

क्षीरादन्यत् Other than milk or a thing used as an oblation which is cooked or got boiled.

शृङ्खलकः - शृङ्खला बन्धनं यस्य बालोष्ट्रः A young camel, dog etc. tied by chain.

शोकापनुदः-(A) यः सुखम् आहरति One who or which causes happiness.

शोकापनोदः-(B) केवलं यः शोकम् अपनयति One who or which merely removes misery.

शोधनकः:-न्यायालयभवनरक्षकः अधिकारी Officer in charge of court premises.

शौकम्-शुकानां समूहः Group of parrots.

शौनम्-शुनां समूहः Group of dogs.

शौर्पम्-शूर्पेण क्रीतम् Bought for a *Śūrpa* (a measurement two *Droṇas*)

श्माशानिकः:-श्मशाने यः अधीते (शास्त्रेण निषिद्धेऽपि) One who recites *Veda* in burial ground (which he ought not do)

शौवनम्-वि.a (1) शुनः विकारः शौवनं मांसम् Flesh of the dog. (2) शुनः संकोचः शौवनः Crouching of a dog.

शौवस्तिकः:-यः श्व एव भवति । अशाश्वतः Belonging to or lasting till tomorrow. Ephameral.

शौवादंष्ट्रः:-श्वदंष्ट्रायां भवः Connected with the teeth of dog.

श्यामायते-श्यामः भवति Becomes black fades.

श्येनकपोतीयम्-श्येनकपोतयोरिव श्येनकपोतीयः दुर्योगः (ग.र.म.पृ.239) A bad occurance like the muting of the eagle and dove.

श्येनः वर्तिकाम् उल्लापयते-वर्तिकाम् अभिभवति Eagle swoops and snatches the bird *vartikā*. (कौ.2592)

श्रमणसंभावितः-(1) श्रमण इति सम्भावितः (ऊहितः) Presumed to be श्रमण (Buddhist monk) (प्र.स.2154) (2) श्रमण इति मत्वा पूजितः Respected thinking that he was a श्रमण।

श्रयति-श्रीरिव आचरति Behaves like *Lakṣmi*.

श्राद्धिकः, **श्राद्धी**-श्राद्धम् अनेन भुक्तम् One who has eaten the food given at श्राद्ध, the rite connected with the manner. (कौ.864)

श्राययति-श्रीमतीं श्रीमन्तं वा आचष्टे । श्रियम् आचष्टे One who says श्रीमती or श्रीमान् One who talks of *Lakṣmi*.

श्राणिकः:-श्राणा नियुक्तम् अस्य दीयते He to whom rice gruel is given in a fixed manner.

श्रुतवान्-शास्त्रज्ञानवान् A man of learning.

श्रुतिविशेषणम्-अधिकविद्यासम्पादनम् Improvement in learning. Higher studies. 'श्रुतिविशेषार्थं वत्सभूमौ . . . उषितवानस्मि' (भा.ना.च.पृ.8)

श्रुती इतिहासे-इतिहासं श्रुतवान् One who heard इतिहास (सप्तमी)

श्रुत्वा देवः प्रमाणम्-मदीयवाक्यश्रवणानन्तरं यत् कर्तव्यं तत् देवेनैव (भवतैव) निर्णेतव्यम् इत्यर्थः After hearing this your lordship has to decide the future course of action.

श्रेणीकृताः:-श्रेणीरूपेण स्थापिताः Arranged in a row (प्र.स.2153) 'श्रेणीभूताः' (formed into a line) इत्यादि

श्वचण्डालम्-श्वानश्च चण्डालाश्च तेषां समाहारः श्वचण्डालम् Dogs and *Caṇḍālas*. द्वन्द्वे एकवद्भावः In *Dvandva* singular only. (प्र.स.2317)

श्लिष्यते मनसि-मनोनुकूलमिव भवति Fits in the mind appears to the mind as though it is a familiar thing 'अपरिचयात्तु न श्लिष्यते मे मनसि' (भा.ना.च.3)

श्लैष्मिकम्-श्लेष्मणः कोपनं शमनं वा That which reduces or increases flem.

श्वनिशम्-शुनां निशा श्वानिशम् । कृष्णचतुर्दश्यां किल श्वानः केचन उपवसन्ति The night of कृष्णचतुर्दशी when some dogs observe fast. निशान्तः तत्पुरुषः विकल्पेन नपुंसके प्रयुज्येत। 'निशा' at the end of तत्पुरुष is optionally used in नपुंसकलिङ्ग (कौ.828) 'शरन्निशम्' 'ग्रीष्मनिशम्' इत्यादि

श्वपुच्छनामनम्-शुनः पुच्छस्य ऋजुतया स्थापनार्थं व्यर्थः प्रयासः Vain effort.

श्वशुरौ-श्वश्रूश्च श्वशुरश्च श्वशुरौ Mother in Law and father-in-law.

श्वैतच्छत्रिकः-श्वेतच्छत्रम् अर्हति One who deserves white umbrella (to become a monarch)

श्वोवसीयम् } अतिशयेन प्रशस्तम्
श्वःश्रेयसम् } The highest good. आशिष्येवानयोः प्रयोगः These words are used in benediction. 'श्वोवसीयं ते भूयात्' 'श्वःश्रेयसं ते भूयात्' इत्यादयः (कौ.948)

षष्टिकः-षष्टिरात्रेण पच्यते That (crop) which ripes in sixty days.

षष्टिक्यम्-षष्टिकानां भवनं क्षेत्रम् The field where षष्टिकs are grown.

षण्मास्य } षण्मासवयाः Six months
षाण्मास्य } old.
षाण्मासिक }

संयच्छते-संगृह्णाति Collects. 'सम्' पूर्वकः 'यम्' धातुः आत्मनेपदी, क्रियाफले आत्मगामिनि। 'यम्' with 'सम्' takes A.P. if the fruit of the work goes to the doer. व्रीहीन् संयच्छते Collects corn. (कौ.2742)

संयच्छते-ददाति Gives. 'सम्' पूर्वः 'दाण्' धातुः तृतीयान्तोपपदः आत्मनेपदी ('दाण्' धातोः 'यच्छ' इत्यादेशः सार्वधातुकेषु भवति) 'दा' (यच्छ्) with 'सम्' or 'सम्' and 'प्र' both and with तृतीयान्त as उपपद (preceded by a word ending in तृतीया) takes A.P. 'दास्या संयच्छते अथवा संप्रयच्छते कामुकः' (कौ.2728)

संरक्षिती प्रजासु-प्रजाः संरक्षितवान् One who had protected the subjects (सप्तमी)

संवस्त्रयति-वस्त्रेण समाच्छादयति Covers with cloth.

संवर्मयति-वर्मणा संनह्यति Puts on the armour.

संवित्ते-सम्यक् वेत्ति Knows very well. अयमर्थः। अकर्मकत्वे एव। Only when it is used as intransitive it means as shown above. सम् पूर्वकः आदरिकः विद् धातुः आत्मनेपदी। (संवित्ते-संविदाते-संविद्रते) विद् of 2nd conjugation with 'सम्' is used in A.P. 'प्राज्ञात् संवित्ते' इत्यादयः (प्र.स.414)

संश्रुणुते-प्रतिज्ञां करोति Promises 'सम्' पूर्वकः अकर्मकः 'श्रु' धातुः आत्मनेपदी। 'श्रु' with 'सम्' takes A.P. when used as intransitive 'प्राज्ञात् संश्रुणुते' (प्र.स.4141)

संश्चायते-असंश्चत् संश्चत् भवति। (संश्चत्-व्याजवान्, मायावी, juggler) one who was not a juggler becomes juggler.

संसर्गविद्या-बहुभिः एकस्मिन् समये प्रदर्शनीया

संगीतकरूपकप्रयोगादिविद्या Art of association of many people like music, dance etc. Any art to be performed by a troup.

संस्कुर्वन्ति, परिष्कुर्वन्ति, उपस्कुर्वन्ति-संघी भवन्ति Form into one group. (प्र.स.पृ17)

संस्तवः-(A) परिचयः Acquaintance

संस्तावः-(B) समेत्य स्तुवन्ति यस्मिन् देशे छन्दोगाः स देशः The place where the priests assemble (in sacrifice) and praise Gods.

संस्वरते-विवदति Quarrels. 'सम्' पूर्वकः स्वर धातुः, अकर्मकः आत्मनेपदी। √स्वर् with 'सम्' takes A.P. when it is used as intransitive 'सद्भिः संस्वरते' (प्र.स.पृ.414)

संहतपुच्छि अव्य.Ind.-संहतं पुच्छम् अस्यां क्रियायाम् -संहतपुच्छि श्वा धावति The dog runs tucking to tail (प्र.स.2268)

संहृतबुसम्-अव्य.Ind. यस्मिन् काले बुसाः संहृताः स कालः Time when the chaff is collected in one place.

संहृतयवम्-अव्य.Ind. यस्मिन् काले यवाः एकत्रसंहृताः स कालः The time when *yavas* are collected at one place.

संह्रियमाणयवम्-अव्य.Ind. संह्रियमाणाः पुञ्जीक्रियमाणाः यवाः यस्मिन् काले The time when the *Yavas* are being collected.

सकाम इदानीं भवतु-सः अद्य संतुष्यतु Now let him be happy or satisfied. अन्यकृतस्य कार्यस्य आत्माननुकूलं फलं दृष्ट्वा नातिहृष्टस्य वचनमिदम् It is generally said of a person who is unhappy over an unfavourable result of an action done by somebody else with or without his previous approval. 'सकाम इदानीम् आर्ययौगन्धरायणो भवतु' (भा.ना.च.पृ.9) 'जटासु बद्धास्वरुदत्सुमन्त्रः कैकेयि कामाः फलितास्तवेति' (रघु.13.59)

सक्तुकाः-सक्तुभ्यः हिताः Fit for सक्तु (flour of fried grain)

संकलीकृत्य-हिंसित्वा Having harmed or killed. (ग.र.म.पृ.139)

संक्रीडते-'सम्' पूर्वकः क्रीड्धातुः आत्मनेपदी, परं तु ध्वनिं करोति इत्यर्थे परस्मैपदी, √क्रीड्' with 'सम्' takes A.P. But in the sense of making noise it is P.P. only. 'संक्रीडति चक्रम्' The wheel makes noise. (कौ.2687)

संक्ष्णुते-तीक्ष्णं करोति Sharpens. 'सम्' पूर्वः 'क्ष्णुः' धातुः आत्मनेपदी। 'क्ष्णु' with सम् takes A.P. 'संक्ष्णुते शस्त्रम्' इत्यादि। (कौ.2736)

सखिपथः-सख्युः पन्थाः The path of a friend. 'पथिन्' at the end of a compound changes into 'पथः'; समासान्ते पथिन् शब्दः अकारान्तो भवति

संकलिती पदार्थेषु-पदार्थान् संकलितवान् One who collected material. (सप्तमी)

संगच्छते-'सम्' पूर्वकः, अकर्मकश्च 'गम्' धातुः आत्मनेपदी। √'गम्' with 'सम्' takes A.P. when it is used as an intransitive संगच्छते=संगतं, युक्तं, भवति "It is proper" 'कृष्णेन संगच्छते। (Meets with *Kṛṣṇa*) (प्र.स.414)

संगिरते-प्रतिजानीते Maintains. Asserts शब्दं नित्यं संगिरते 'गॄ' धातुः प्रतिज्ञार्थे आत्मनेपदी The root 'गॄ' in the sense of assertion is *ātmanepadī* (कौ.2725)

संग्रहः-(A) द्रव्यस्य सम्पादनम् । Acquisition. Collection.

संग्राहः-(B) मल्लस्य मुष्टिः The fist of the wrestler (कौ.3208)

संघतिथः-संघपूरकः Completing the group.

त्रय एव किल स्मोऽत्र खेलामः पत्रकैः कथम् ।
एवं विचिन्त्यमानेऽद्य त्वं संघतिथ आगतः ॥

संचीवरयते-चीवराणि अर्जयति परिधत्ते वा Acquires worn out cloths or puts them on.

संज्ञुः-संहतौ जानुनी यस्य सः He whose knees are close to each other (while walking) (कौ.338) knock-kneed

सक्तून् पिब धानाः खाद इत्यभ्यवहरति-सक्तून् पिबति, धानाः खादति इति चिरम् अभ्यवहरति He is drinking *Saktu* (gruel), eats fried corn and thus goes on eating. (कौ.2825-2828) 'चायं पिब बिस्कुटं खाद इत्यभ्यवहरति' इत्यादयः

सजग्धिः-मित्रादिभिः सह भोजनम् Eating together or in a company.

सजातीयः-समाना जातिः यस्य सः Belonging to the same or similar caste or tribe. 'समान' शब्दस्य 'स' इत्यादेशः । 'समान' becomes 'स'

सजूःकृत्य-'सहितं साहित्येन वा कृत्वा गतः इत्यर्थः' (ग.र.म.पृ.137) Having met or having worked together (went)

संचरते रथेन-Travels by chariot 'सम्' पूर्वकः तृतीयान्तोपपदश्च 'चर' धातुः आत्मनेपदी । √'चर्' with सम् takes A.P. when it has a तृतीयान्त as उपपद (कौ.2727)

सततोत्थितः-सर्वदा कार्योद्युक्तः One who is always alert or engaged.

सतीर्थ्यः-समानात् गुरोः कृताध्ययनः One who had studied under the same teacher at a different time (कौ.1015)

सतृणमत्ति-तृणमप्यपरित्यज्य सकलम् अत्ति Eats without leaving anything. 'सगर्भस्थं जघान' इत्यादि । (कौ.652)

सतृणाभ्यवहारिन्-यः तृणमपि भक्षयति One who lacks discrimination in the appreciation of literary works. (वामन I)

संतमसम्-सततं तमः संतमसम् Enveloping darkness. अकारान्तत्वम्

संतिष्ठते-समाप्तं भवति Gets completed. 'सम्' पूर्वकः स्थाधातुः आत्मनेपदी । 'स्था' with 'सम्' takes A.P. (कौ.2689)

सत्यंकारः-(1) सत्यस्य कारः । शपथकरणम् । Authentication by making a vow. (कौ.1007) (2) सत्यापनम् Making true or good. Ratification of a contract or bargain (3) सत्यापनार्थं पूर्वमेव दीयमानः धनादीनाम् अंशः Earnest money. Advance payment. Something given in advance as an earnest for the performance of a contract.

सत्याकरोति-(भाण्डम्) एतावता क्रेतव्यमिति निश्चयं करोति वणिक् Fixes the price.

सत्यापयति-सत्यं करोति आचष्टे वा Ratifies a bargain or contract. Establishes as true or says it is true.

सत्रायते-पापं चिकीर्षति Wants to do sinful action.

सद्यःफलम्-कार्यसमनन्तरमेव फलप्राप्तिः Immediate result.

सद्योगर्भः-संभोगसमनन्तरमेव शिशूद्भवः Pregnance and bringing forth a child immediately after copulation.

सधर्मन्-समानः धर्मः यस्य सः Having similar qualities, tastes etc. 'समान' changes into 'स' and 'अन्' is added at the end of the compound.

सध्रायति-सध्र्यञ्चम् आचष्टे करोति वा Makes a companian, tells he is a companian who goes along with.

सन्धायसंभाषा-समानविद्यैः सह सौहृदेन शास्त्रविषयचर्चा Friendly discussion. (चरकसंहिता, विमानस्थानम् VIII अध्यायः)

सन्धिदूषणम्-सन्धेः अपालनम् Violation of treaty.

सपक्षः-समानः पक्षः यस्य सः One who is of the same party.

सपतीयते } सपत्नीव आचरति Behaves
सपत्नायते } like cowife (with jealousy)

सपत्रा करोति-सपुङ्खशरप्रवेशनेन (मृगादिशरीरं) सपत्रं करोति Wounds in such a manner that the feathered part of the arrow enters the body. (कौ.2132)

सपीतिः-मित्रादिभिः सह पानम् Drinking together or in company.

सप्तगोदावरम्-अव्य.Ind. सप्तानां गोदावरीणां समाहारः सप्तगोदावरम् The group of seven *Godāvarīs* (Branches of *Godāvari*) संख्या पूर्वः गोदावरीशब्दः समासे अकारान्तः भवति । गोदावरी changes into 'गोदावर' when it is preceded by a word denoting number, in a compound. (कौ.943)

सप्तगङ्गम्-सप्तानां गङ्गानां समाहारः सप्तगङ्गम् Seven *Gangas*. नदी वाचकैः, नदी नामवाचकैश्च संख्यावाचकस्य समाहारार्थे समासः. Words meaning river or names of the river are combined with a संख्यावाचक in a *Samāsa*. (कौ.674)

सब्रह्मचारिन्-'ब्रह्म वेदः तदध्ययनार्थं व्रतमपि ब्रह्म । तत् चरतीति ब्रह्मचारी । समानः ब्रह्मचारी सब्रह्मचारी' (कौ.1014) One who studies *Veda* along with somebody under a *Guru*. Fellow student. Equal.

सभिकः-(1) द्यूतशालासंचालकः A keeper of gambling house.

सभ्यः-(2) सभायै योग्यः Fit for society. Civilised.

संपश्यते-अकर्मकः 'सम्' पूर्वः 'दृश्' धातुः आत्मनेपदी । 'दृश्' with 'सम्' takes A.P. when it is used as intransitive. 'संपश्यमानः चरति' (प्र.स.414)

संपृच्छते-'सम्' पूर्वकः 'प्रच्छ्' धातुः यदा अकर्मकत्वेन प्रयुज्यते तदा आत्मनेपदी । √प्रच्छ् with 'सम्' takes A.P. when it is used as intransitive 'सद्भिः संपृच्छते' (प्र.स.पृ.414)

संप्रहरन्ते-(राजानः) परस्परं प्रहरन्ति । व्यतिहारे अर्थे (परस्परम् इत्यर्थे) 'हृ' धातुः आत्मनेपदी Strike each other. √'हृ' takes A.P. in the sense of doing mutually (कौ.2681)

संभाण्डयते-भाण्डानि समाचिनोति राशीकरोति Collects the commodities.

संभूयसमुत्थानम्-बहुभिः मिलित्वा कार्यनिर्वहणम् Undertaking a partnership. Co-operative undertaking.

समकालीनः-समानकालसम्बद्धः Contemporary. Coevel.

समक्षम्-अव्य.Ind. दर्शनयोग्यम् In a way fit to be seen. (प्र.स.2091)

समजः-(A) पशूनां समुदायः Herd of animals.

समाजः-(B) मनुष्यसमुदायः Group of human beings. (कौ.3246)

समयपरिरक्षणम्-समयस्य, कृतस्य निर्णयस्य, पालनम् Observance of a compact treaty or agreement.

समयाचारः-लोके अङ्गीकृतः अनुसृतश्च आचारः Conventional practice.

समयाध्युषितः कालः-सूर्यनक्षत्रवर्जितः कालः The time when there is neither Sun nor stars. (मनु.स्मृ.2.15)

समानोदर्यः, **सोदर्यः** भ्राता Brother (कौ.1016)

समंपदाति, समपदाति, सपदाति-अव्य. Ind. यदा पदातयः समसंख्याकाः When the foot soldiers are of equal number. 'समंपदाति, अथवा समपदाति अथवा सपदाति युध्यन्ते' इत्यादि। (प्र.स.2084)

समंभूमि-अव्य.Ind. समत्वं भूमेः Evenground. (ग.र.म.पृ.232)

समंभूमि, समभूमि, संभूमि-अव्य.Ind. (कलहादौ) द्वयोः समा भूमिः यस्मिन् काले अथवा यस्यां क्रियायाम् When the ground is even for fighting etc. 'समंभूमि अथवा समभूमि अथवा संभूमि युध्यन्ते, अथवा कर्षन्ति' इत्यादि (प्र.स.2084)

समयधर्मः-एवं करिष्यामः इति अङ्गीकृतः नियमः An agreement (पं.तं.पृ.47)

समयाकरोति-कालं यापयति Spends the time (कौ.2131) अधोनिर्दिष्टेषु पदेषु 'समान' शब्दस्य 'स' इत्यादेशः भवति - 'समान' is changed as 'स' in the following words.

(1) **सपक्षः** - पक्षस्य समानः अथवा समानः पक्षः यस्य सः Of the same party.

(2) **सज्योतिः**-समानं ज्योतिः यस्य Having similar brightness.

(3) **सजनपदः**-समानं जनपदं यस्य Having same country.

(4) **सपत्नी**-समानः पतिः यस्याः Having the same husband.

(5) **सकरः**-समानः करः यस्य Having similar hand. Having equal skill.

(6) **समानः**-समानं मानं यस्य Having equal measurement.

(7) **सबन्धुः**-समानः बन्धुः यस्य Having same relations.

(8) **सगन्धः** -समानः गन्धः यस्य Having same smell of equal nature.

(9) **सदेशः**-समानः देशः यस्य Having same country.

(10) **सरात्रिः**-समाना रात्रिः यस्य Having the same night.

(11) **सपिण्डः**-समानं पिण्डं यस्य Having same *Pinda* (ball of rice offered to the menes) of the same family.

(12) **सनाभिः**-समाना नाभिः यस्य । तुल्यः Having similar navel. Equal.

(13) **सकुक्षिः**-समाना कुक्षि यस्य । सोदरः Having the same womb. Brother.

(14) **सवेणी**-समाना वेणी यस्याः Having similar hair.

(15) **सलोहितः**-समानं लोहितं यस्य Having similar blood.

'समान'-अधोनिर्दिष्टेषु पदेषु 'समान' शब्दस्य 'स' इत्यादेशः वैकल्पिकः-Samāna is optionally changed as 'Sa' in the following words.

(1) **सरूपः, समानरूपः**-Having similar appearance.

(2) **सवर्णः, समानवर्णः**-Having the same caste.

(3) **सनामन्, समाननामन्**-Having same name.

(4) **सस्थानः, समानस्थानः**-Having the same place

(5) **सजातीयः, समानजातीयः**-Having the same जाति

(6) **सधर्मः, समानधर्मः, सधर्मन्, समानधर्मन्**-Having same qualities

(7) **सवचनः, समानवचनः**-Having similar or same words

(8) **सगोत्रः, समानगोत्रः**-Having same *Gotra* (family name or discendance of family)

(9) **सवयस्, समानवयस्**-Having same age. Friend

(10) **सभोजः, समानभोजः**-Having similar food

समिध्यति-समिधम् आत्मनः इच्छति Wants fuel for himself.

संमदः-(A) हर्षः Happiness

संमादः-(B)मदः गर्वो वा Intoxication or pride (कौ.3245)

संमद्रम्-अव्य.Ind. मद्राणां समृद्धिः Prosperity of the मद्र country 'संभारतम्' इत्यादि। 'संभारतं सदा भूयात् सर्वदा दुरधार्मिकम्' (कौ.6 52)

समांसमीना-(गौः) प्रतिवर्षप्रसूः A cow bearing a calf every year.

समियर्ते-सर्वतो गच्छति Goes around. अदादिगणगतः 'ऋ' धातुः 'सम्' पूर्वकः, अकर्मकः आत्मनेपदी, 'ऋ' (अदादि) with 'सम्' takes A.P. when it is used as intransitive.

समीनः-'समायाम् अधीष्टः' इत्यादिरर्थः See 'मासिकः'

समुदाचरते-संचरति Moves about. Travels. 'सम्' 'उत्' इति उपसर्गद्वयपूर्वः 'चर' धातुः तृतीयान्तोपपदः आत्मनेपदी। 'चर्' with 'सम्' and 'उत्' with a तृतीयान्त as उपपद takes A.P. 'रथेन समुदाचरते'। इत्यादि

समुदाचारः-सभ्यव्यवहारः Customary Practice. Show of good manners. 'आर्यपुत्रपक्षपातेन अतिक्रान्तः समुदाचारः' (भा.ना.च. पृ.9)

समूहति; समूहते-समूहं करोति । येन केनाप्युपसर्गेण युक्तः ऊहधातुः उभयपदी भवति। 'ऊह' with any उपसर्ग is optionally takes A.P. (it is originally आत्मनेपदी)

समुद्रगृहम् - परितः जलावृतं ग्रीष्मोपयोगि गृहम् A summer camp house surrounded by water on all sides.

समीचयति-सम्यञ्चम् आचष्टे करोति वा One who says or makes straight.

समुद्राभ्युक्षणम्-व्यर्थकर्माचरणम् Sprinkling water on the ocean. Being engaged in a useless action (पद्मप्राभृतकम्)

समूलकाषं कषति-समूलं कषति He rubs (scratches) (ploughs, uproots) along with the root. समूल-निमूलशब्दोपपदस्य 'कष' धातोः 'णमुल्' (अम्) भवति; स एव धातुः प्रधानक्रियायां प्रयोक्तव्यः । कष् "to rub" or "to scratch" with 'समूल' or 'निमूल' as उपपदs gets 'णमुल्' (अम्) at the end and the same root is used in the main verb. (कौ.3355)

समूलघातं हन्ति-समूलं हन्ति Kills along with the root. 'समूल' शब्दोपपदस्य 'हन'धातोः 'णमुल्' (अम्) भवति, स एव च धातुः प्रधानक्रियायामुपयुज्यते (कौ.3357) हन् 'to kill' with 'समूल' as उपपद takes 'णमुल्' (अम्) at the end and the same

root is used in the main verb. (कौ.3357)

समृच्छते-संगतं भवति। 'सम्' पूर्व 'ऋ' (ऋच्छ्) धातुः, अकर्मकत्वेन प्रयुक्तः आत्मनेपदी। 'ऋच्छ्' with सम् takes A.P. when it is used as intransitive (कौ.2699) कृष्णेन समृच्छते (प्र.स.पृ.414)

समेन एति-समं गमनं करोति Goes in an even (undisturbed) manner (gait).

संमुखीनः-समं, सर्वं, मुखं संमुखम्। सर्वस्य मुखस्य दर्शनः That which shows the face completely as it is.

सरकः-सरणे निपुणः One who is good in movement. अद्यत्वे कम्प्यूटरज्ञाः सरकाः

सरजसम्-रजसा सहितं सरजसम्। सकलम् इत्यर्थः Including the dust, whole thing without leaving even a particle. (अकारान्तत्वम्) 'सरजसम् व्रीहीन् नयति' इत्यादि (कौ.945)

सरसिजम्-सरसि जातम्। पद्मम् इत्येव रूढोऽर्थः Lotus flower born in the lake. used only to mean lotus. (अलुक्समासः)

सर्पिषो जानीते-सर्पिषा उपायेन भोजनादौ प्रवर्तते He shows interest on account of ghee. अकर्मकः 'ज्ञा' धातुः आत्मनेपदी। 'ज्ञा' takes A.P. when it is used as intransitive.

सर्पिष्काम्यति-सर्पिः आत्मनः इच्छति Wants ghee for himself.

सर्वकर्मीणः-सर्वाणि कर्माणि व्याप्नोति Spreading into or connected with all the actions.

सर्वकेशिन्-विविधकेशधरः One who wears all types of hair. An actor.

सर्वंकषः-यः सर्वं कषति He who drags, touches, every thing a rogue. All comprehensive.

सर्वचर्मीणः } सर्वं चर्मणा कृतः
सार्वचर्मीणः } Completely made with leather.

सर्वपत्रीणः-सर्वाणि पत्राणि व्याप्नोति Which spreads on all leaves.

सर्वपात्रीणः-सर्वाणि पात्राणि व्याप्नोति Which spreads all (fills into) vessels.

सर्वपथीनः-सर्वपथान् व्याप्नोति Which spreads on or covers all the rounds.

सर्वमूषकः-सर्वापहारी, कालः "All stealing". Time.

सर्वंसहः-सर्वं यः सहते One who beare (tolerates) everything.

सर्वान्नीनः-सर्वान्नानि भक्षयति सर्वान्नीनः भिक्षुः One who eats all types of food or the food of all people.

सर्वाङ्गीणः-सर्वाणि अङ्गानि व्याप्नोति Spreading on all the limbs or the whole body.

सविधादगतः-One who has gone from near. अलुक्समासः। See स्तोकान्मुक्तः (प्र.स.2117)

सवैदिकप्रक्रियमधीते-वैदिकप्रक्रियापर्यन्तम् अधीते Studies up to the end of वैदिकप्रक्रिया। 'सघनम् अधीते' इत्यादि (कौ.652)

ससखि-अव्य.Ind. सदृशः सख्या Equal to the friend. 'सामृतम्' इत्यादि (कौ.652)

सस्यकः-सस्येन गुणेन परिजातः संबद्धः सस्यकः। गुणवान् One who has virtues.

सहकृत्य } संबद्धं कृत्वा Having
सहकृत्वा } connected (ग.र.म.पृ.140)

सहकृत्वन्-केनचित् सह कृतवान् One who

had done (a work) along with somebody. (कौ.3007)

सहपांशुकिलः } आबाल्यात् सखा। 'शैशवे
सहपांशुक्रीडिन् } यः आत्मना पांशुसु अक्रीडत्' A friend from the childhood (who played in dust in childhood)

सहयुध्वन्-सह युद्धं कृतवान् One who had fought along with (somebody) (कौ.3006)

सहरि-अव्य.Ind. हरेः सादृश्यम् Similarity with *Hari* (कौ.652) **सचन्द्रम्** इत्यादि

सहस्रार्जुनः-सहस्रबाहुः अर्जुनः सहस्रार्जुनः *Arjuna* with thousand hands. (मध्यमपदलोपः)

सहायता-सहायानां समूहः A group of helpers.

सांशयिकः-(1) संशयं जनयति (स्थाण्वादिः) That which causes doubt. (2) संशयविषयीभूतः अर्थः Something about which there is doubt.

साक्षात् कृत्य } अप्रत्यक्षं प्रत्यक्षं कृत्वा
साक्षात् कृत्वा } Having made a thing which was not seen earlier as seen. (ग.र.म.पृ.140)

सांकथिकः-संकथायां साधुः One who is good at conversation.

सांक्रामिकः-संक्रमे साधुः Connected with transfer. (Going from one to other)

सांक्रमिकाः-संक्रमम् अर्हन्ति (उभयपदवृद्धिः) Which deserve transfer.

सांग्रहिकः संग्रहे साधुः Good at accumulation.

सांग्रामम्-संग्रामे दीयते कार्यं वा Which is given in a fight or to be done during war.

सांग्रामिकः-संग्रामे साधुः Good in the battle field. Soldier.

सांघतिकः-संघाते साधुः Good in or for a group.

साधयति-बाढम् आचष्टे Says 'yes'.

साधयामस्तावत्-अद्य वयं भवदनुज्ञया व्रजामः We take leave of you.

साधु निर्वापयितुम्-निर्वापणं युक्तम् Good to put out 'आयस्य निर्वापयितुं न साधु प्रज्वाल्यमानस्तमसीव दीपः' (बुद्धच.XIII.63) एवं 'भोक्तुं साधु' 'गन्तुं साधु' इत्यादयः

साधुवादः-साधु साधु इति वचनम् Appreciation. Applause (पं.तं.पृ.318)

साध्वरिकः-'साधु अध्वरम्' इति यः आह One who says that the sacrifice is or was good.

सांनिपातिकम्-संनिपातज्वरस्य शमनं कोपनं वा That which affects संनिपातज्वर adversely or favourably.

साप्ततिकः-सप्तत्या क्रीतः Bought for seventy.

साप्तपदीनम्-सप्तानां पदानां संभूय विन्यासेन अथवा सप्तानां पदानां भाषणेन निर्वृत्तं सौहृदम् Friendship, established by walking together seven steps or by exchange of seven words.

साप्तपौरुषम्-सप्तपुरुषव्यापि Extending to or including seven generations.

सामयिकम्-समयः प्राप्तः अस्य That for which time has come.

सामयिकाचारिक-वि.a तत्तत्समयप्रचलितैः आचारैः संबद्धः Relating to conventional practice or usage.

सामयुगीनः-समयुगे साधुः Fit for the yoke which is even or for the same yoke. (2) Good for the same age.

सारङ्गः-(A) कश्चन पक्षी मृगो वा A bird or a deer.
साराङ्गः-(B) बलाढ्य शरीरः Having strong body.
सांयुगीनः-संयुगे साधुः Good in the battle field.
सांवादिकः-मतविरोधस्य स्थानम् Controversial disputent.
सांवाहिकः-संवाहे साधुः Good for carrying from one place to the other.
सांस्थानिकः-संस्थाने या क्रिया यथा अनुष्ठेया तां तथैव यः अनुतिष्ठति। अवयवसंनिवेशानुकूलतया यः कर्म करोति सः One who does in a way suitable to the build up of the body. (कौ.पृ.802) प्रतिमादेः संस्थानशिक्षापरः सांस्थानिकः (प्र.स.1523)
सार्वम् / **सर्वीयम्** } सर्वस्मै हितम् Beneficial to all.
सार्वजनीनः / **सार्वजन्यः** } सर्वजनसंबद्धः। सर्वजने साधुः Public. Universal. General. Good for all people.
सार्वधुरीणः-सर्वधुरं यः वहति One who bears all types of yokes. One who takes all responsibilities on himself.
सार्वपौरुषम्-सर्वपुरुषाणाम् इदम् (उभयपदवृद्धिः) Connected with all people.
सार्वभौमः-(1) सर्व भूम्यां विदितः ईश्वरो वा Known in the whole world or lord of the whole world. (उभयपदवृद्धिः) (2) सर्व भूमेः निमित्तं, संयोगः, उत्पातो वा That which is the cause, related with or Omen of the whole earth.
सार्वलौकिक-सर्वलोकेषु सर्वलोके वा विदितः Known in all the worlds or in the whole world.
सार्ववैद्यम्-सर्वे वेदा एव सार्ववैद्यम् All the *Vedas*.
सासद्यते-गर्हितं सीदति Sits or perishes in a bad manner.
साहस्रम्-सहस्रेण क्रीतम् Bought for thousand.
सिक्तसंमृष्टम्-संमृष्टं च तत् सिक्तं च सिक्तसंमृष्टम् Swept and then sprinkled with water. पदयोः व्युत्क्रमः Change in the order of words. (प्र.स.2199)
सीताजानिः-सीता जाया यस्य सः। रामः *Rāma*, who has *Sītā* as his wife. बहुव्रीहेः अन्ते जायाशब्दस्य 'जानिः' इत्यादेशः भवति। 'जाया' changes into 'जानि' at the end of *Bahuvrīhi* (कौ.872) एवं 'पार्वतीजानिः', 'युवजानिः' (युवतिः जाया यस्य सः) इत्यादयः
सीत्यम्-सीतया संमितं क्षेत्रम् Measured out by furrows. Tilled. Ploughed.
सीमन्तः-(A) केशवेशः Parting line of the hair.
सीमान्तः-(B) ग्रामादिसीमाविभाजकं स्थानम् Boundery line.
सुखदुःखम् / **सुखदुःखे** } सुखं च दुःखं च Pleasure and grief. See शीतोष्णम्
सुखसुखेन ददाति-अतिप्रियमपि अनायासेन ददाति He gives away even a favourite object without hesitation (कौ.2148)
सुखं वसति-Lives happily क्रियाविशेषणानां नपुंसकैकवचने एव प्रयोगः An adverb is used in only neuter gender singular number. 'मन्दं हसति' 'शीघ्रं धावति' 'मृदु पचति' इत्यादयः
सुखा करोति-अनुकूलाचरणेन आनन्दयति Gives pleasure by being amicable.
सुखायते-(1) सुखी भवति Becomes or is

happy (2) आत्मनः सुखं जानाति Knows about his happiness.

सुखोदर्क-(वि.a) भविष्यति सुखहेतुः Which gives happiness in future.

सुगन्धिः-शोभनः गन्धः यस्य Having good smell. See 'उद्गन्धि' (कौ.874)

सुगृहीतनामन्-यस्य नाम आदरेण गृह्यते जनैः Whose name is mentioned with respect. (काद.पृ.76)

सुचतुरः-शोभनानि चत्वारि यस्य सः One who has the four good qualities (अकारान्तः)

सुजम्भन्-शोभनदन्तः शोभनान्नो वा One who has good teeth or good food. (सु-हरित-तृण-सोमशब्देभ्यः परः जम्भशब्दः बहुव्रीहौ नकारान्तो भवति The word 'जम्भ' preceded by 'सु' 'हरित' 'तृण' and 'सोम' becomes नकारान्त in *Bahuvrīhi* (कौ.86 4)

सुदिनायते-सुदिनं करोति Makes it a good day.

सुदिवः-शोभनं दिवा यस्य सः सुदिवः One who has good day (कौ.860)

सुधां क्षीरनिधिं मथ्नाति-He is churning the nectar from the milky ocean. 'मथ्' धातुः तत्समानार्थकाश्च द्विकर्मकाः The root 'मथ्' and its synonims govern two objects.

सुनिष्ठित-वि.a सम्यक् संरक्षितम् Well maintained. (रामा.1.13.10)

सुन्दरितमा-अत्यधिकं सुन्दरी The most beautiful women. See 'सुन्दरितरा' (प्र.स.1922)

सुन्दरितरा-अधिकं सुन्दरी स्त्री More beautiful woman. भाषितपुँस्कात् यः 'ङी' (ई) तदन्तस्य अनेकाचः ह्रस्वः स्यात् तर-तम-रूप-कल्पप्रत्ययेषु परेषु चेलडादिषु च उत्तरपदेषु The 'ई' the sign of Feminine gender of words with more than one vowel, and which can be used in Masculine gender also (with slight change) (भाषितपुंस्क) is shortened when they are followed by suffixes तर, तम, रूप or कल्प and by words चेल, ब्रुव, गोत्र, मत or हत। (कौ.985) (प्र.स.1122)

सुन्दर सुन्दर वृथा ते सौन्दर्यम्-सौन्दर्यम् असहमानस्य वचनमिदम् These are the words of an envious person (कौ.2143) 'सुन्दर' शब्दः द्विरुक्तः। 'सुन्दर' is repeated.

सुन्वन्-यजमानः One who performs *Yajña*. अस्मिन्नेवार्थे षूञ्धातोः 'शतृ' (अन्) प्रत्ययः Only in this sense 'शतृ' (अन्) is added to the root 'षूञ्' (कौ.3112)

सुप्रजाः-शोभना प्रजा यस्य सः One having good children. बहुव्रीहेः अन्ते प्रजाशब्दस्य अन्ते 'स्' भवति। (कौ.862) 'स्' is added at the end 'प्रजा' at the end of बहुव्रीहि।

सुप्रातः-शोभनं प्रातः यस्य सः सुप्रातः One who has good morning (कौ.860)

सुभगंकरणम्-असुभगं सुभगं कुर्वन्त्यनेन That by which one is not beautiful is made beautiful, a beauty aid.

सुभगं भविष्णुः, **सुभगं भावुकः** – असुभगः सुभगः भवति One who is not beautiful is becoming beautiful.

सुमनायते-सुमनाः भवति Becomes a good hearted person.

सुमनोवर्णकम्-पुष्पाणि सुगन्धिचूर्णादिकं च Flowers and fragrant powder etc.

सुमेधाः-शोभना मेधा यस्य सः One who has good intelligence. बहुव्रीहेः अन्ते मेधाशब्दस्य सकारः अन्तादेशो भवति। 'स्' is added at the end of 'मेधा' which is the उत्तरपद in बहुव्रीहि (कौ.862)

सुरभिगन्धिः-सुरभिः गन्धः यस्य Having sweet smell. See 'उद्गन्धि' (कौ.873)

सुवर्णपुष्पा पृथिवी-सुखसमृद्धिमयः लोकः The land full of golden flowers. Highly prosperous situation.

सुवर्णालङ्कारः-सुवर्णविकारः अलङ्कारः यस्य सः One who has golden ornament 'विकार' in सुवर्णविकारालङ्कार is optionally dropped मध्यमपदलोपी बहुव्रीहिः (कौ.830)

सुवृष्टिश्चेदभविष्यत् तदा सुभिक्षमभविष्यत्-(1) पूर्वं सुवृष्टिः (पतिता) स्यात् चेत् सुभिक्षमपि (लब्धं) स्यात् । उभयमपि नासीदित्यर्थः Had there been good rain there would have been good crops. (2) यदि सुवृष्टिः भविष्यति सुभिक्षं भविष्यति। उभयमपि न भविष्यतीत्यर्थः If there will be good rain there will be good crops. भूते वा भविष्यति वा कस्याश्चन हेतुभूतायाः क्रियायाः अभावात् कार्यभूतायाः क्रियाया अपि अभावः इत्यर्थः लृङा सूच्यते। The use of लृङ् indicates that something would have happened or will happen if something else had happened or will happen.

सुश्वः-शोभनं श्वः यस्य सः One who will have good tomorrow (कौ.860)

सुषमम्-अव्य.Ind. सुखप्रदः वत्सरः Good year. 'सुषमम् अभूद्देशस्य'। सुभिक्षादिना समायाः वत्सरस्य शोभनत्वमभूदित्यर्थः। (प्र.स.2084)

सुस्मूर्षते-स्मर्तुमिच्छति Wants to remember. स्मृधातोः सन्नन्तरूपम्, आत्मनेपद्येव । सन्नन्त of स्मृ takes only A.P. but not p.p.

सूत्रग्रहः-(A) सूत्रं यः धारयति One who wears the thread.

सूत्रग्राहः-(B) यः केवलं सूत्रमुपादत्ते न तु धारयति One who holds the thread but does not wear on his body.

सूपगन्धि-सूपस्य गन्धः (लेशः) यस्मिन् तत् That which contains a little dal. अल्पार्थः 'गन्ध' शब्दः बहुव्रीहेः अन्ते इकारान्तो भवति। 'गन्ध' in sense of 'a little' takes 'इ' at the end in बहुव्रीहि (कौ.875)। 'घृतगन्धि' इत्यादि

सूरी-(1) सूर्यस्य मानुषी स्त्री The woman (human being) of *Sūrya* like *Kuntī.*

सूर्या-(2) सूर्यस्य भार्या देवता A celestial woman of *Sūrya.*

सूर्यं (माहिष्मत्याम्) उद्गमयति-उज्जयिन्यां प्रस्थितः माहिष्मत्यां सूर्यम् उद्गमयति। यदासौ माहिष्मतीं प्राप्नोति तदा सूर्य उद्गच्छति इत्यर्थः Makes the Sun raise in *Māhiṣmati*. By the time the person who left उज्जयिनी reaches माहिष्मती, the Sun would rise. (प्र.स.526)

सूर्याचन्द्रमसौ-सूर्यचन्द्रौ The Sun and moon.

सूर्योढः (अतिथिः)-सायंकाले गृहं प्राप्तः अतिथिः A guest who has arrived at the time of sun set.

सूपीय / **सूप्य** } वि.a सूपाय हितम् Good for सूप

सृक्कणी परिलेलिहन्-अदनासक्तया सृक्कणी पुनः पुनः जिह्वया स्पृशन् Licking the corners of mouth with a strong desire to eat. (पं.तं.पृ.48)

सेवकःविष्णुमित्राय श्लाघते-विष्णुमित्रस्य सेवकः स्वकार्यदक्षतां तस्मै निवेदयितुम् आत्मानं श्लाघते इत्यर्थः The servant praises him self in order to make *Viṣṇumitra* understand his competence. 'श्लाघ्' धातोः प्रयोगे यस्मै बोधयितुम् इष्यते सः चतुर्थ्यां प्रयुज्येत When the root श्लाघ् is used, the person to whom something is intended to be made known, is used in चतुर्थी (कौ.572)

सेवालीकृत्य-हिंसित्वा Having killed (ग.र.म.पृ.139)

सैरिकः-सीरं वहति A plough-ox. Relating to a plough.

सोढायते-आत्मनः सोढम् अनुभवति (सोढम्=अभिभवः क्षमा वा) He feels his insult or tolerance.

सोमजम्भन्-सोमवत् प्रकाशमानजम्भः One who has teeth shining like moon. See 'सुजम्भन्' (कौ.864)

सौवः-स्वः (स्वर्गे) भवः Being in heaven.

सौवग्रामिकः-स्वग्रामे भवः Born or living in his own village.

सौवरः-स्वरमधिकृत्य कृतो ग्रन्थः A work on accent.

सौवर्गगमनिकः-स्वर्गगमनं यः पृच्छति अथवा वदति सः One who enquires about going to स्वर्ग or tells about it.

सौवस्तिकः-स्वस्ति ते भूयादिति यः वदति One who says "may there be prosperity to you".

सौवादुमृदम्-स्वादुमृदः इदम् That which belongs to the earth of good taste.

सौवाध्यायिकः-स्वाध्यायेन जीवति One who lives by reciting *Veda*.

सौखरात्रिकः-सुखरात्रिं यः पृच्छति One who enquires about comfortable night i.e. whether someone had a good, comfortable night.

सौखदिवसिकः-सुखदिवसं पृच्छति यः Who enquires comfortable day.

सौखशय्यिकः-सुखशय्यया यः जीवति । किं सुखं शयितवन्तो भवन्तः इति यः परिप्रश्नेन जीवति One who lives on comfortable sleep. i.e. who lives by enquiring with others "have you had comfortable sleep?" (ग.र.म.पृ.405)

सौखशायनिकः-सुखशयनं पृच्छति यः One who enquires about comfortable sleep.

सौखनिद्रिकः-सुखनिद्रां यः पृच्छति Who enquires about comfortable sleep.

सौस्नातिकः-सुस्नातं यः पृच्छति One who enquires did you have a good bath ?

सौखतपसिकः-सुखं तपः यः पृच्छति One who enquires easy penance.

स्तनतटम्-विशालः स्तनोपरिभागः Broad surface of breasts. See 'अश्वमतल्लिका'

स्तनंधयः - स्तनं धयति यः शिशुः A child. A sucking baby.

स्तनशल्यपरीक्षा-स्तनस्यान्तः शल्यं भवेद्वा नवेति अरसिकैः मूर्खैः क्रियमाणा परीक्षा । आनन्दानुभवसमये मूर्खैः क्रियमाणो निरर्थको विचारः A foolish discussion unbecoming to the occasion.

स्तम्बकरिः-(A) स्तम्बं (धान्यगुच्छ) यः करोति तादृशो व्रीहिः Rice plant which develops good sheaf (of corn)

स्तम्बकारः-(B) व्रीहेः अन्यः यः स्तम्बं करोति Any plant other than rice plant which develops bunches. (कौ.2938)

स्तव्यः-स्तवमर्हति Deserves praise (प्र.स.1642)

स्तोकात्कुपितः-अल्पेन कारणेन कुपितः (अलुक्समासः) Angry for a trivial cause. क्तप्रत्ययान्तेन समस्तानां स्तोकान्तिकदूरार्थ-पदानां, कृच्छ्र शब्दस्य च पञ्चमी न लुप्यते। 'स्तोकान्मुक्तः' 'दूराद्दृष्टः' इत्यादि (प्र.स.2117) The words 'स्तोक' 'अन्तिक' 'दूर' and their synonims and the word 'कृच्छ्र' retain their oblative termination when they are combined in a compound with past passive participles.

स्तोकात् मुक्त / **स्तोकेन मुक्त** } वि.a He escaped by a little (effort) अद्रव्य-वाचकैः स्तोक-अल्प-कृच्छ्र-कतिपयशब्दैः योगे पञ्चमी तृतीया वा भवति। 'स्तोक' 'अल्प' 'कृच्छ्र,' and 'कतिपय' govern पञ्चमी or तृतीया when they do not refer to an object द्रव्य। 'कृच्छ्रात् मुक्तः, कृच्छ्रेण मुक्तः' इत्यादि।

स्त्रीकुमारम्-स्त्रियश्च कुमाराश्च तेषां समाहारः स्त्रीकुमारम्। द्वन्द्वे एकवचने एव। Woman and children or sons. Singular number only in *Dvandva* (प्र.स.2317)

स्त्रीपुंसौ-स्त्री च पुमांश्च स्त्रीपुंसौ Woman and man (अकारान्तत्वम्) (कौ.945)

स्त्रीसभम्-स्त्रीणां सभा Congregation of women संघातार्थकः सभाशब्दः तत्पुरुषस्यान्ते नपुंसकलिङ्गः स्यात् The word 'सभा' meaning congregation, takes nueter gender at the end of तत्पुरुष। पुरुषसभम् द्विजसभम् इत्यादयः (कौ.827)

स्त्रीसेवा - स्त्रीलम्पटत्वम् Too much of attachment to women.

स्त्रैणः-स्त्रीलम्पटः A womaniser, uxorious person (नपुं) स्त्रियाः भावः Womanhood (2) स्त्रीणां संघातः Group of women.

स्थाण्डिलः-(भिक्षुः) स्थण्डिले, अनाच्छादितायां भूमौ, यः शेते An ascetic who lies on the bare ground.

स्थालपथिकम्-स्थलपथेन आहृतं, गच्छति वा That which is brought by land route or is sent by land route.

स्थण्डिलेशायी-स्थण्डिलशयनं व्रतमस्य One who observes the vow of lying on bare ground व्रते अर्थे सुबन्ते उपपदे धातोः 'णिनि' (इन्) प्रत्ययः भवति In the sense of observing a vow 'णिनि' (इन्) is added to the root. एवं 'क्षीरपायी' 'एकपादस्थायी' इत्यादयः (कौ.2970)

स्थला-(A) कृत्रिमा भूमिः A spot of dry ground artificially raised and drained.

स्थली-प्रकृतिसिद्धा (अकृत्रिमा) भूमिः Dry land. Natural spot of land.

स्थवयति-स्थूलं करोति Makes stout.

स्थाने कोपः-युक्तावसरे कोपः Anger for a justified reason. 'स्थाने संशयः' इत्यादि (पं.तं.पृ.73)

स्थितप्रज्ञः-यस्य प्रज्ञा, बुद्धिः स्थिता, स्थिरा Firm in judgement or wisdom. Free from hallucination.

स्थूणीयम् / **स्थूण्यम्** } स्थूणायै इदं काष्ठम् The wood (log) meant for a pillar.

स्थूलंभविष्णुः / **स्थूलं भावुकः** } अस्थूलः स्थूलः भवति One that was not stout becomes stout.

स्थूललक्षः / **स्थूललक्ष्यः** } वदान्यः Man of charitable disposition. Munificient.

स्थालीबिलीयाः-स्थालीबिलम् अर्हन्ति (पाकयोग्याः इत्यर्थः) (Rice etc.) Which can directly be put in the cooking vessel.

स्थूलंकरणम्-अस्थूलं स्थूलं कुर्वन्ति अनेन That by which something which was not stout is made stout.

स्नात्वाकालिकः-स्नानेऽपि मलिनः One who looks dirty even after taking a bath. (प्र.स.2166)

स्नानीयम्-स्नान्ति अनेनेति चूर्णादिकम् Some fragrant powder etc. used while taking bath.

स्नेहसंभाषः-मैत्रीपूर्वसंभाषाणम् Friendly chit-chat (सं.तं.पृ.45)

स्फापयति-स्फिरमाचष्टे करोति वा One who says there is abundant or makes abundent.

स्मर इदानीम् एतत्-अनेन तव कार्येण यथा त्वं पश्चात्तप्तः भविष्यसि तथा करिष्यामि इति भावः You remember this. Indicative of the angry mood of the speaker who implies that he or she would avenge what is said or done by the other person 'भवतु, भवतु, वसन्तक, स्मरेदानीमेतत्' (भा.ना.च पृ.31).

स्मरसि कृष्ण गोकुले वत्स्यामः-हे कृष्ण ! गोकुले अवसाम इति यत् तत् स्मरसि किम् इत्यर्थः। स्मृतिबोधिनि उपपदे भूतानद्यतने धातोः लृट् स्यात्, अत्र 'वत्स्यामः' इति 'अवसाम' इत्यर्थे प्रयुक्तम् *Kṛṣṇa*, do you remember that we lived in *Gokula*. When a root meaning recollection is used as उपपद the main root which should have been used in लङ् is used in लृट् । Here 'वत्स्यामः' is used in the sense of अवसाम। 'बुध्यसे' 'चेतयसे' इत्यादीनां प्रयोगेऽपि लृट् भवति। Verbs like 'बुध्यसे' and 'चेतयसे' etc., also can be *upapadas* (कौ.2773) 'यत्' शब्दप्रयोगे तु न लृट् This rule does not apply if 'यत्' is used in the sentence 'अभिजानासि कृष्ण ! यत् वने अभुञ्ज्महि' (कौ.2774) धात्वर्थः लक्ष्यलक्षणभावेन साकाङ्क्षः चेत् विकल्पेन लृट् If the two main roots in the sentence have interconnections (आकाङ्क्षा) this rule applies optionally 'स्मरसि कृष्ण ! वने वत्स्यामः ततः गाः चारयिष्यामः' अथवा 'स्मरसि कृष्ण! वने अवसाम तत्रः गाः अचारयाम' (कौ.2775)

स्मारं स्मारम्-स्मृत्वा स्मृत्वा Having remembered again and again आभीक्ष्ण्यार्थे धातोः 'णमुल्' (अम्) प्रत्ययोऽपि विकल्पेन भवति In the sense of "having done a particular act again and again" 'णमुल्' (अम्) is added optionally to all the roots instead of 'क्त्वा' । 'कारं कारम्' 'पायं पायम्' 'भोजं भोजम्' 'गामं गामम्' 'गमं गमम्' 'श्रावं श्रावम्' इत्यादयः (कौ.3343)

स्यदः-(A) वेगः Speed.

स्यन्दः-(B) प्रवाहः Flow (कौ.3188)

स्रस्ताङ्गः-श्रमेण लम्बमानावयवः Having the limbs loosened or relaxed.

स्रजयति-स्रग्विणम् आचष्टे करोति वा Says he has garlands or garlands him.

स्वः कमनीयम्-स्वर्गः सुन्दरः The heaven is beautiful. अव्ययविशेषणानां नपुंसके एकवचने च प्रयोगः The adjectives of the indeclinables are used in Neuter Gender singular number only. 'दिवा उष्णम्' 'पूर्वेद्युः शीतम्' इत्यादि

स्वःकाम्यति-स्वर्गम् आत्मनः इच्छति Wants heaven for himself.

स्वति-स्व इव आचरति Behaves as his own man or woman.

स्वनामत्यागं करोमि-I shall give up (change) my name. शपथकरणरीतिः One way of swearing (पं.तं.पृ.3)

स्वपोषं पुष्णाति-स्वेन (धनेन) पुष्णाति He is getting nourished (growing prosperous) by wealth. तृतीयान्त 'स्व' शब्दोपपदात् तत्पर्यायोपपदाच्च 'पुष'धातोः णमुल् (अम्) भवति, स एव च धातुः प्रधानक्रियायां प्रयुज्यते। 'पुष्' which has the word 'स्व' and its synonyms which is करण as उपपद takes 'णमुल' (अम्) and the same root is used in the main verb. (कौ.3361) 'धनपोषं पुष्णाति' 'गोपोषं पुष्णाति' धान्यपोषं पुष्णाति' इत्यादयः।

स्वर्गसंक्रमः-स्वर्गमार्गः The path to heaven. The rope way to heaven. (पं.तं.पृ.189)

स्वयति-स्वः आचष्टे करोति वा Says 'स्वर्ग' or makes स्वर्ग (leads to स्वर्ग)

स्वर्ग्यम्-स्वर्गस्य निमित्तम्, संयोगो वा Cause for स्वर्ग or connected with स्वर्ग

स्वश्वयति-स्वश्वम् आचष्टे करोति Says a good horse. Or makes it a good horse.

स्वस्ति भवते-प्रस्थानवेलायां वचनमिदम् 'Good bye'. Said while leaving somebody. (पद्मप्राभृतकम्)

स्वागतिकः-स्वागतं ते इति यः वदति अथवा पृच्छति One who says welcome. Receptionist.

स्वाकारं रक्षन्-भावं निगूढं कुर्वन् Protecting his appearance. Concealing his feelings. (पं.तं.पृ.20)

स्वाजनिकः-स्वजनात् प्रयोजनम् अस्य One who has something to get from his relations or friends.

स्वादुंकारं भुङ्क्ते-अस्वादुं स्वादुं कृत्वा भुङ्क्ते Making it tasty (by adding something) he is eating. स्वाद्वर्थेषु उपपदेषु कृञ् धातोः 'णमुल्' (अम्) स्यात् एककर्तृकयोः पूर्वकाले When 'स्वादु' and synonyms are used as उपपद 'णमुल्' (अम्) is added to the root. 'संपन्नंकारं भुङ्क्ते' 'लवणंकारं भुङ्क्ते' इत्यादयः। 'संपन्न' 'लवण' शब्दौ स्वाद्वर्थकौ (कौ.3347)

स्वान्तम्-(A) मनः Mind.

स्वनितः-(B) कृतस्वनः That which has produced sound.

स्वाध्वरिकः-स्वध्वरेण चरति One who performs good *Yajña*.

स्वापतेयम्-1) (पुं) स्वपतौ साधु One who is good to his master (2) वित्तम् Wealth. Property. 'स्वापतेयकृते मर्त्याः किं किं नाम न कुर्वते' (पं.तं.)

स्वापयति-स्वं करोति Makes his own. Appropriates for himself.

हट्टचेटः-आपणे सेवकः Market servant (क्षेमे) Hotel server.

हट्टतापसः-हट्टे आत्मानं तापसं प्रकाशयन् One who professes to be a sage in a Bazar.

हतः-वञ्चितः। निराशः कृतः Disappointed. Deceived. 'वयं तत्त्वान्वेषान्मधुकर हताः त्वं खलु कृती' (अभि.शा.I.)

हतविधिः-दुष्टं दैवम् Bad fate.

हयमेधेन यष्टुम्-(To perform a sacrifice called *Aśvamedha*) To perform अश्वमेध Sacrifice. तत्तद्यागनामवाचकैः सह प्रयुक्तः यज्

धातुः करोत्यर्थमेव बोधयति The root यज् used along with words denoting different sacrifices conveys the meaning "performs". 'ज्योतिष्टोमेन यजति' 'सर्वजिता यजति' इत्यादि

हरये क्रुध्यति (1)-Becomes angry with *Hari*.
हरये दुह्यति (2)- Harms *Hari*.
हरये ईर्ष्यति (3)- Shows intolerance towards *Hari*.
हरये असूयति (4)-Envies *Hari*. क्रुध-द्रुह-ईर्ष्या-असूयार्थानां धातूनां प्रयोगे यं प्रति कोपः स चतुर्थ्यां प्रयुज्यते When the roots 'क्रुध्' 'द्रुह्' 'ईर्ष्य' and 'असूय', are used the object of anger is used in चतुर्थी। (कौ.575) 'चोराय क्रुध्यति'। 'रिपवे द्रुह्यति'। 'वृद्धाय ईर्ष्यति'। 'धनिने असूयति' इत्यादयः

हरते-स्वभावानुकरणे अर्थे 'हृ' धातोः आत्मनेपदं भवति 'हृ' in the sense of 'imitating', 'inheriting something' is used as *ātmanepadī* पैतृकम् अश्वाः अनुहरन्ते Horses imitate (inherit) father's nature 'मातृकं गावः अनुहरन्ते' Cows follow the mother's nature (कौ.2687 वा)

हरिमभि भक्तः-हरिविषये भक्तः He is devotee of *Hari*. इत्थं भूताख्याने 'अभि' इत्यनेन योगे द्वितीया। 'अभि' governs when something is mentioned as a matter of fact 'सः तामभिरक्तः' इत्यादयः

हरिम् अभि वर्तते-यत्र हरिः वर्तते तत्र वर्तते He is there where *Hari* is. लक्षणे द्योत्ये 'अभि' इत्यनेने सह द्वितीयान्तं प्रयुज्यते। 'अभि' indicative of sign governs द्वितीया। 'छात्रः योजनशालाम् अभिवर्तते' इत्यादयः

हरिं पश्यन् मुच्यते-One who sees *Hari* gets salvation. हरिदर्शनमत्र कारणम्। 'पश्यन्' इत्यत्र शतृप्रत्ययः (अन) कारणत्वसूचनार्थः Here seeing *Hari* is the cause of *Mokṣa*. Indicating this point 'शतृ' प्रत्यय (अन्) is used in 'पश्यन्' (कौ.3103)। 'शीघ्रं वृक्षमारोहन् फलं लभते' 'सम्यक् पठन् पारितोषिकं प्राप्नोति' इत्यादयः

हरिः वैकुण्ठम् अधितिष्ठति-*Viṣṇu* dwells *Vaikuṇṭha*. See अधिशेते कैलासं महेशः। 'प्राड्विवाकः उन्नतम् आसनम् अधितिष्ठति' इत्यादयः

हरिः वैकुण्ठम् अधिवसति-*Viṣṇu* stays in *Vaikuṇṭha*. उप-अनु-अधि-आ पूर्वकस्य 'वस'धातोः आधारः द्वितीयायां प्रयुज्यते When √'वस्' is used with उप, अनु, अधि or आ the आधार is used in द्वितीया instead of सप्तमी। छात्राः छात्रशालाम् अधिवसन्ति, अथवा उपवसन्ति अथवा आवसन्ति इत्यादयः।

हरितजम्भन्-हरितवर्णदन्तः One who has green teeth. See 'सुजम्भन्' (कौ.864)

हरितायते-अहरितः हरितः भवति That which was not green becomes green.

हर्षायते-हर्षवान् भवति Becomes happy.

हलयति-हलिं (महत् हलं) गृह्णाति Takes a big plough.

हविष्यम्-हविषे हितम् Useful for *Havis*.

हंसौ-हंसी च हंसश्च हंसौ She swan and he swan. समानरूपयोः स्त्रीपुंवाचकयोः द्वयोः शब्दयोः योगे पुंवाचकं शिष्यते When the words of same *Prātipadika* are used in masculine and faminine genders and are combined, the word in masculine

gender is retained. 'बाला च बालश्च बालौ' इत्यादयः (कौ.933)

हस्तग्राहं गृह्णाति-हस्तेन गृह्णाति Catches with hand. तृतीयान्ते हस्तशब्दे तत्पर्यायेषु च 'उपपदेषु' ग्रहधातोः 'णमुल्' 'अम्' भवति। स एव च धातुः प्रधानक्रियायां प्रयुज्यते When 'हस्त' and its synonims are as करण and उपपद, the root 'ग्रह' takes 'णमुल्' (अम्) and the same root is used in the main verb. 'पाणिग्राहं गृह्णाति' 'करग्राहं गृह्णाति' इत्यादयः

हस्तग्राहं युध्येते / **हस्तेन ग्राहम् युध्येते** } हस्ताभ्यां गृहीत्वा युध्येते Catching by arm they fight. See 'केशग्राहं युध्येते' एवं 'पाणिग्राहं हसतः' इत्यादि (कौ.3371)

हस्तधारणम् / **हस्तवारणम्** } उपरि पतता शिलाखण्डादीनां, प्रहाराणां च हस्तं तिर्यङ्निधाय निवारणम् Warding off a blow (with hand)

हस्तवर्तं वर्तयति-हस्तेन गुलिकां करोति Makes round shaped balls with his hand. तृतीयान्ते 'हस्त' शब्दे तत्समानार्थकेषु च उपपदेषु 'वृत्' धातोः 'णमुल्' (अम्) भवति। स एव च धातुः प्रधानक्रियायां प्रयुज्यते When 'हस्त' and synonyms, used as *Karaṇa*, are used as उपपद the root 'वृत्' takes 'णमुल्' (अम्) and the same root is used in the main verb. 'पाणिवर्तं वर्तयति' 'करवर्तं वर्तयति' इत्यादि। (कौ.3360)

हस्तलाघवम्-हस्तनैपुण्यम् Dexterity of hand. Slight of the hand.

हस्ताग्रम् / **अग्रहस्तः** } Front part of the hand. पदयोः क्रमे अनियमः। कर्मधारयसमासः। Order of words is optional (का.अ. सू.5.19)

हस्तामलकम्-हस्तनिक्षिप्तम् आमलकफलम्। अतीव स्पष्ट Which is as clearly seen as an *Āmalaka* fruit held in palm.

हस्ताहस्ति चरन्ति-हस्ते च हस्ते च मिथो गृहीत्वा चरन्ति They are moving about holding each others hand. Even without fight this usage is correct. युद्धनियमो नास्तीति शृङ्गारे (प्र.स.पृ.311)

हस्तिघ्नः-हस्तिहननशक्तः A man capable of killing an elephant. (कौ.2971)

हस्तिवर्चसम्-हस्तिनः वर्चः हस्तिवर्चसम् The Hustre or elegance of an elephant. अकारान्तत्वम् (कौ.346)

हस्तिषड्गवम् - षण्णां हस्तिनां समुदायः A group of six elephants.

हस्त्यम्-हस्तेन दीयते कार्यं वा That which is given by hand or done by hand, handmade.

हा कृष्णाभक्तम्-Alas ! the person who is not *Kṛṣṇa's* devotee; हा इत्यव्ययेन विषादादिसूचकेन सह द्वितीयान्तं प्रयुज्यते। 'हा' governs द्वितीया।

हारयति भृत्यं भारम् / **हारयति भृत्येन भारम्** } Makes the servant take the load. णिजन्तः हृधातुः विकल्पेन द्विकर्मकः The root 'हृ' used as causative, optionally takes two *karmas*.

हास्तिन, हस्तिद्वयस, हस्तिमात्र, हस्तिदघ्न-हस्ती प्रमाणमस्य Of an elephants height or rise.

हिमवतः गङ्गा प्रभवति-*Gañgā* appears on *Himavān*. आविर्भवतः आविर्भावस्थानं पञ्चम्यां प्रयुज्यते The place of appearance of a thing which comes into existence

is used in पञ्चमी। 'सह्यात् कावेरी प्रभवति' 'अग्नेः धूमः प्रभवति' इत्यादयः

हिमेलुः-हिमं न सहते One who does not withstand snow. 'अयं हिमेलुः प्रिययोपगूढ उष्णालुतां संप्रतिपद्यतेऽत्र'

हिरण्यकम्-हिरण्ये कामः Lust for gold.

हृदयंगमः-हृदयस्पर्शी । मनोहरः Which touches the heart. Attractive. एवं पूर्वगमः, पश्चाद्गमः, ग्रामंगमः इत्यादि

हृष्टकुपितः-कुपितश्चासौ हृष्टश्च One who was angry at the beginning and happy later on. पदव्युत्क्रमः Change in the order of words. (प्र.स.2197)

होडायते } होड (उडुप) इव आचरति Acts
होडते like a raft or a float.

होतुः पुत्रः-Son of the priest called होतृ। See होतुः अन्तेवासी (कौ.981) अलुक्समासः।

होतुरन्तेवासी-Student of होतृ । विद्यायोनिसंबन्धवाचकानां समासे षष्ठ्याः अलुक् When the words denoting the relation by learning or by blood are combined in षष्ठीतत्पुरुष, the षष्ठी termination is retained (कौ.981)

होत्रे अनुगृणाति } होता प्रथमं शंसति
होत्रे प्रतिगृणाति } तमध्वर्युः प्रोत्साहयति

इत्यर्थः The chief priest encourages the priest. होतृ who has sung invoking Gods. अनुपूर्वकस्य प्रतिपूर्वकस्य वा 'गृ' धातोः प्रयोगे प्रोत्साहने कर्मभूतः चतुर्थ्यां प्रयुज्यते। 'गृ' with 'अनु' or 'प्रति' governs चतुर्थी (but not द्वितीया) This may be used in a different set up also. पुत्राय अनुगृणाति प्रतिगृणाति वा। पुत्रः विष्णुसहस्रनामादि पठति, तं पिता प्रोत्साहयतीत्यर्थः। (कौ.579)

हैयङ्गवीनम्-ह्यः लब्धस्य गोदोहस्य विकारः Clarified butter prepared from the milk of preceeding day.

श्रीः श्रीः श्रीः

यत्कृपालेशसंपर्काद् ग्रन्थः संकलितो मया।
तस्यैव जानकीजानेः पदयोरयमर्प्यते॥

देवतानुग्रहः पित्रोस्तपश्चाचार्यसत्कृपा।
कर्तास्मद्ग्रन्थजातस्य करणं केवलं वयम्॥

❖ ❖ ❖

अनुबन्धः
(APPENDIX)
केचन भावार्थकतद्धितप्रत्ययान्ताः शब्दाः

प्रायः सर्वेभ्योऽपि सुबन्तेभ्यः 'त्व' 'तल्' इत्यनयोः भावार्थकप्रत्यययोः समावेशः कर्तुं शक्यते। 'त्व' प्रत्ययान्ताः नपुंसकलिङ्गाः, 'तल्' (ता) प्रत्ययान्ताश्च स्त्रीलिङ्गाः । यथा सुन्दरस्य भावः 'सुन्दरत्वम्' 'सुन्दरता'; नरस्य भावः 'नरत्वम्' 'नरता', स्त्रियाः भावः 'स्त्रीत्वम्' 'स्त्रीता' इत्यादयः। परन्तु केभ्यश्चित् सुबन्तेभ्यः न केवलं 'त्व' 'तल्' प्रत्ययावेव, अन्येऽपि प्रत्ययाः विशेषरूपेण विहिताः। तादृशानां केषांचित् रूपाणि अधः प्रदर्श्यन्ते -

Generally the two suffixes 'त्व' and तल् (ता) are added to all the nouns, pronouns, adjectives and indeclinables in the sense of 'भाव' (being so) as in सुन्दरत्वम् - सुन्दरता (beauty-the state of being beautiful) नरत्वम्-नरता (to be a man, manness) स्त्रीत्वम्, स्त्रीता (to be a woman) etc. Words with 'त्व' are in nutral gender and with 'ता' in faminine gender. Apart from these two general suffixes, there are other suffixes, ordained to be added to some words, in the some sense. A table of such words is given below :-

पृथु-(big)-प्रथिमा (नकारान्तपुंलिङ्ग)-पार्थवम्-पृथुत्वम्-पृथुता।

आशु-(quick)-आशिमा-आशुत्वम्-आशुता

प्रिय-प्रेमा (पुं.लिं) -प्रियत्वम्-प्रियता (प्रेमन् शब्दः नपुंसकलिङ्गः अन्यः । The word प्रेमन् in Neuter gender is different)

स्त्री-स्त्रैणम्-स्त्रीत्वम्-स्त्रीता

पुमान्-पौंस्नम्-पुंस्त्वम्-पुंस्ता

पाण्डु-पाण्डिमा

कृष्ण-कृष्णिमा-कार्ष्ण्यम्

चण्ड-चण्डिमा

सुख-सुखिमा

पटु-पटिमा-पाटवम्

दुःख-दुःखिमा

उरु-वरिमा

गुरु-गरिमा

दण्ड-दण्डिमा

खण्ड-खण्डिमा

अणु-अणिमा-आणवम्

साधु-साधिमा

स्वादु-स्वादिमा

मृदु-म्रदिमा-मार्दवम्

महत्-महिमा

लघु-लघिमा-लाघवम्

तनु-तनिमा-तानवम्

क्षिप्र-क्षेपिमा

वृद्ध-वर्षिमा

अकिंचन-अकिंचनिमा-आकिंचन्यम्

चारु-चारिमा

पाक (बालः)-पाकिमा

बहु-भूमा-बाहवम्

वत्स (बालः)-वत्सिमा-वात्सम्

ऋजु-ऋजिमा-आर्जवम्

वक्र-वक्रिमा

तृप्र (दुःखकरम्)-त्रपिमा
क्षुद्र-क्षोदिमा
श्वेत-श्वेतिमा
वृष-वृषिमा
महि-महिमा-महित्वम्
बहुल-बंहिमा-बाहुल्यम्-बाहुलकम्
ह्रस्व-ह्रसिमा
होड (बालः)-होडिमा-हौड्यम्
कृडु-कृडिमा-कार्डवम्
दृढ-द्रढिमा-दार्ढ्यम्
शुक्ल-शुक्लिमा-शौक्ल्यम्-शौक्ली
नील-नीलिमा-नैल्यम्
परिवृढ-परिव्रढिमा-पारिवृढ्यम्
मूक-मूकिमा-मौक्यम्
पीत-पीतिमा-पैत्यम्
चुक्र (अम्ल)-चुक्रिमा-चौक्रयम्
विशारद-विशारदिमा-वैशारद्यम्
संमति (संगता मतिः यस्य)
संमतिमा-सांमत्यम् सांमतम्)
बधिर-बधिरिमा-बाधिर्यम्
मधुर-मधुरिमा-माधुर्यम्
बाल-बालिमा-बाल्यम्
मूल-मूलिमा-मौल्यम्
काल-कालिमा-काल्यम्
मूक-मूकिमा-मौक्यम्
जड-जडिमा-जाड्यम्
पण्डित-पण्डितिमा-पाण्डित्यम्-पाण्डिती
लवण-लवणिमा-लावण्यम्
तरुण-तरुणिमा-तारुण्यम्
उष्ण-उष्णिमा-औष्ण्यम्
शीत-शीतिमा-शैत्यम्
स्थिर-स्थेमा-स्थैर्यम्
अम्ल-अम्लिमा-आम्ल्यम्
कृश-क्रशिमा-कार्श्यम्
वृढ-व्रढिमा-वार्ढ्यम्
विमति-विमतिभा-वैमत्यम्-वैमतम्
विमनस्-विमनिमा-वैमनस्यम्
मन्द-मन्दिमा-मान्द्यम्
मूर्ख-मूर्खिमा-मौर्ख्यम्
वियात-वियातिमा-वैयात्यम्
संमनस्-संमनिमा-सांमनस्यम्
विलात (विलासी बालः)-विलातिमा-वैलात्यम्-वैलातम्
शुक्रम्-शुक्रिमा-शौक्र्यम्
दीर्घ-द्राघिमा-दैर्घ्यम्
समनस्-समनिमा-सामनस्यम्
ताम्र-ताम्रिमा-ताम्र्यम्
आम्र-आम्रिमा-आम्र्यम्
तृष्णा-तृष्णिमा-तार्ष्ण्यम्
कृष्ण-कृष्णिमा-कार्ष्ण्यम्

B

अधोनिर्दिष्टेषु पदेषु 'भावः' इत्यर्थे 'कर्म' इति च अर्थे प्रत्ययाः भवन्ति । In the following words (suffixes are added in the sense of 'being' or 'work of'.

ब्राह्मण्यम्-ब्राह्मणस्य कर्म भावो वा The functions of a *Brāhmaṇa* or being a *Brāhmaṇa*.

मौढ्यम्-मूढस्य कर्म भावो वा

बाडव्यम्-बड वा याः कर्म भावो वा । बडवा = A *Mara*

प्रागल्भ्यम्-प्रगल्भस्य कर्म भावो वा

धौर्त्यम्-धूर्तस्य कर्म भावो वा

आलस्यम्-अलसस्य कर्म भावो वा अलसः=Lazy

बालिश्यम्-बालिशस्य कर्म भावो वा बालिशः=Wicked man

सामस्थ्यम्-समस्थस्य कर्म भावो वा समस्थः=Man of equanimity

माध्यस्थ्यम्-मध्यस्थस्य कर्म भावो वा

पौरस्थ्यम्-पुरःस्थस्य कर्म भावो वा। पुरस्थः। One who is infront

आर्हन्त्यम् } अर्हतः कर्म भावो वा
आर्हन्ती } अर्हन्=Respectable

नैपुण्यम्-निपुणस्य कर्म भावो वा। निपुणः Skillful

चापल्यम्-चपलस्य कर्म भावो वा चपलः=Fickle minded

चौर्यम्-चोरस्य कर्म भावो वा। चोरः=Thief.

तात्पर्यम्-तत्परस्य भावः कर्म वा। तत्परः=One who or which is intent upon that.

ऐदंपर्यम्-इदं परस्य कर्म भावो वा। इदं परः। One who or which is bent upon this

सौहित्यम्-सुहितस्य कर्म भावो वा। सुहितः=तृप्तः। Satisfied.

पैशुन्यम्-पिशुनस्य कर्म भावो वा। पिशुनः=Talbearer.

दैन्यम्-दीनस्य कर्म भावो वा। दीनः=One who is in pitiable condition.

माणव्यम्-माणवस्य कर्म भावो वा। माणवः=Boy

प्रकामः-प्रकामस्य कर्म भावो वा। प्रकामः=One who has great desire or one who has his desire fulfilled.

वैचित्र्यम् - विचित्रस्य भावः। Being
वैचित्री - wonderful.

औचित्यम् } उचितस्य भावः कर्म वा।
औचिती }

गाडुल्यम्-गडुलस्य कर्म भावो वा। गडुलः One who has ?

शैल्यम् } शीलस्य कर्म भावो वा।
शैली } शीलम्=Nature

नैष्कुल्यम्-निष्कुलस्य कर्म भावो वा। निष्कुलः। One who does not have good family or one who has left his family.

दौष्कुल्यम्-दुष्कुलस्य कर्म भावो वा। दुष्कुलः। One who comes from a bad family.

तारतम्यम्-तरतमेत्यस्य भावः कर्म वा। द्विबह्वपेक्षः प्रकर्षः Being better or best.

वैषमस्थ्यम्-विषमस्थस्य भावः कर्म वा। विषमस्थः=One who or which is in a critical or uneven condition.

ऐकभाव्यम्-एक भावस्य कर्म भावो वा। एक भावः One who has the same idea. (one idea)

आन्यभाव्यम्-अन्यभावस्य कर्म भावो वा। अन्यभावः=One who has different opinion.

वैदग्ध्यम् } विदग्धस्य कर्म भावो वा
वैदग्धी } विदग्धः= Skillful

दायाद्यम्-दायादस्य कर्म भावो वा दायादः=One who has a right in the ancestral property.

यथापुर्यम्-यथापुरस्य कर्म भावो वा यथापुरम्=That which is as before.

द्वैभाव्यम्-द्विभावस्य कर्म भावो वा द्विभावः=One who has different views or two opinions.

यथाकाम्यम् } यथाकामम् इत्यस्य भावः कर्म वा
याथाकामी } यथाकामम्=To have thing as one wants.

याथातथ्यम्-यथातथस्य कर्म भावो वा सत्यत्वम्। To be true.

कापुरुष्यम्-कापुरुषस्य कर्म भावो वा कापुरुषः=mean person.

स्वाभाव्यम्-स्वभावस्य भावः कर्म वा Being in accordance with one's nature.

आभीक्ष्ण्यम्-अभीक्ष्णस्य कर्म भावो वा To be too much.

सामग्रयम् } समग्रस्य भावः कर्म वा To be
सामग्री } complete

आधिपत्यम्-अधिपतेः कर्म भावो वा Over lordship.

त्रैभाव्यम्-त्रिभावस्य कर्म भावो वा Being or having three opinions or three ideas.

ज्यैष्ठ्यम्-ज्येष्ठस्य कर्म भावो वा ज्येष्ठ=Eldest

श्रैष्ठ्यम्-श्रेष्ठस्य कर्म भावो वा।

श्रेष्ठ -Highly superior

प्राकट्यम्-प्रकटस्य कर्म भावो वा To be openly clearly seen.

नैकट्यम्-निकटस्य कर्मभावो वा Proximity.

वैश्वरूप्यम्-विश्वरूपस्य कर्म भावो वा To be all pervading.

आभिरूप्यम्-अभिरूपस्य कर्म भावो वा अभिरूप=Delightful, well formed.

साक्ष्यम्-साक्षिणः भावः कर्म वा साक्षी=Witness

तात्स्थ्यम्-तत्स्थस्य कर्म भावो वा तत्स्थ=One who is in that

चातुर्यम् } चतुरस्य कर्म भावो वा To be
चातुरी } skillful

पारमस्थ्यम्-परमस्थस्य भावः कर्म वा परमस्थ=One who is in the high place or in God.

ऐतिह्यम्-'इति ह' इत्यस्य भावः कर्म वा। Being like this or having occurred like this.

शैर्षघात्यम्-शीर्षघातस्य कर्म भावो वा शीर्षघातः=One who hits the head.

आर्त्विज्यम्-ऋत्विजः कर्म भावो वा ऋत्विक्=A priest participating in a sacrifice.

साम्राज्यम्-सम्राजः कर्म भावो वा। सम्राट्=A monarch.

गाणपत्यम्-गणपतेः भावः कर्म वा गणपतिः=Leader of a group.

सांवाद्यम्-संवादस्य कर्मभावो वा संवादः=Agreement conversation.

दौत्यम्, दूत्यम्-दूतस्य दूत्याः वा कर्म भावो वा दूत=Messenger.

सात्म्यम्-'सह आत्मना वर्तते इति सात्मशरीरम्। तस्य कर्म भावो वा सात्म्यम्' (ग.र.म.) The action or nature of the body.

स्तैन्यम् } स्तेनस्य कर्म भावो वा Being a
स्तेयम् } thief or act of thief.

सौकर्यम्-सुकरस्य कर्म भावो वा सुकर=Which can be done easily.

सादृश्यम्-सदृशस्य कर्म भावो वा सदृश=Similar.

मानुष्यम्-मनुष्यस्य कर्म भावो वा

आराध्यम्-आराध्यस्य कर्म भावो वा आराध्य=One who is to be worshipped.

पौर्वापर्यम्-पूर्वापरयोः भावः Sequence.

दौष्पुरुष्यम्-दुष्पुरुषस्य भावः कर्म वा Act of a wicked man or being a wicked man.

वैशाय्यम्-विशायस्य कर्म भावो वा विशायः=पर्यायेण निद्रा। Sleeping in rotation.

वैशाल्यम्-विशालस्य कर्म भावो वा विशाल=Spacious.

संवेश्यम्-संवेशस्य कर्म भावो वा संवेशः=शयनम् Sleeping.

वैघात्यम्-विघातस्य भावः, कर्म वा. विघातः=Killing, obstruction

स्वाराज्यम्-स्वराजस्य भावः कर्म वा। अथवा स्वराजस्य (स्वर्ग राज्यस्य) भावः।

सांभाष्यम्-संभाषायाः भावः कर्म वा संभाषा=Conversation.

वैशस्त्यम्-विशस्तस्य भावः कर्म वा विशस्त=Cut up. Praised. 'त्व' 'तलौ' विशय-विशस्तशब्दाभ्यां न भवतः। 'त्व' and 'तल्' should not be added to विशय and विशस्त।

ऐश्वर्यम्-ईश्वरस्य कर्म भावो वा Overlordship

आभिजात्यम्-अभिजातस्य कर्म भावो वा आभिजात=Born in a noble family.

पारिमाण्डल्यम्-परिमण्डलस्य भावः परिमण्डल=Atom-measurement of an atom.

पारिशेष्यम्-परिशेषस्य भावः। परिशेषः=That which remains.

राजपौरुष्यम्-राजपुरुषस्य कर्म भावो वा राजपुरुष=King's servant.

यौगपद्यम्-युगपत् इत्यस्य भावः To have happened at the same time.

प्रातिकूल्यम्-प्रतिकूलस्य भावः कर्म वा To be against.

नास्तिक्यम्-नास्तिकस्य कर्म भावो वा नास्तिक=One who says there is no other world.

पौनःपुन्यम्-पुनः पुनरित्यस्य भावः To be again and again.

प्रातिभाव्यम्-प्रतिभुवः कर्म भावो वा प्रतिभूः=One who stands surity.

सौराज्यम्-सुराज्ञः कर्म भावो वा To be a good king. Work of a good king.

बाहुभाष्यम्-बहुभाषिणः कर्म भावो वा One who speaks too much.

पारंपर्यम्-परंपरायाः भावः कर्म वा Sequence Order.

औत्तराधर्यम्-उत्तराधरस्य भावः कर्म वा To be topsey turvey.

साधर्म्यम्-सधर्मणः कर्म भावो वा Similarity.

वाणिज्यम्, **वणिज्या**, **वणिज्यम्** } वणिजः कर्म भावो वा। वणिक् = merchant.

जानराज्यम्-जनराजस्य कर्म भावो वा जनराजा=जनैः स्थापितः राजा King elected by people.

सामाचार्यम्, **सामाचारी** } समाचारस्य कर्मभावो वा समाचारः=Equal treatment.

पारिख्यात्यम्, **पारिख्याती** } परिख्यातस्य कर्म भावो वा परिख्यातः=Famous

यौवराज्यम्-युवराजस्य कर्म भावो वा युवराजा=Crown prince.

याथात्म्यम्-यथात्मनो भावः कर्म वा यथात्मन्=True.

आनुपूर्व्यम्, **आनुपूर्वी** } अनुपूर्वं वर्तमानस्य भावः कर्म वा अनुपूर्व=Which is according to the earlier one.

हौड्यम्-होडस्य कर्म भावो वा होडः=Raft. Boat.

नैर्घात्यम्-निर्घातस्य कर्म भावो वा निर्घातः=Killing.

पौरोहित्यम्-पुरोहितस्य कर्म भावो वा पुरोहितः = Priest.

ग्रामिक्यम्-ग्रामिकस्य कर्म भावो वा ग्रामिकः= Owner of the village.

चार्मिक्यम्-चर्मिकस्य कर्म भावो वा चर्मिकः=One who has skin or hide.

आस्तिक्यम्-आस्तिकस्य भावः कर्म वा आस्तिकः=One who believes that there is other world.

स्वास्थ्यम्-स्वस्थस्य कर्म भावो वा स्वस्थ=One who is normal condition.

शौण्डीर्यम्-शौण्डीरस्य कर्म भावो वा शौण्डीरः=Proud.

वैधर्म्यम्-विधर्मणः कर्म भावो वा विधर्मन्=Of different qualities.

कार्मिक्यम्-कर्मिकस्य कर्म भावो वा कर्मिन्=One who has work.

बाल्यम्-बालस्य कर्म भावो वा बालः=A lad.

पारिषदिक्यम्-परिषदिकस्य कर्मभावो वा परिषदिकः=Member of an assembly.

वार्मिक्यम्-वर्मिकस्य कर्म भावो वा वर्मिकः=One who has an armour.

चौक्ष्यम्-चौक्षस्य कर्म भावो वा चौक्षः=Man of killing habit, man who washes.

औदासीन्यम्-उदासीनस्य कर्म भावो वा उदासीनः=Neutral.

खाण्डिक्यम्-खण्डिकस्य कर्म भावो वा खण्डिकः=One who has a part or portion.

आञ्जनिक्यम्-अञ्जनिकस्य कर्म भावो वा अञ्जनिकः=One who has collerium.

प्राविक्यम्-प्रविकस्य भावः कर्म वा प्रतिगतं कं सुखं यस्मिन् सः प्रविकः=One who lost his happiness.

आञ्जलिक्यम्-अञ्जलिकस्य कर्म भावो वा अञ्जलिकः=One who is with folded hands.

छात्रिक्यम्-छात्रिकस्य कर्म भावो वा छात्रिकः=छत्रशीलः शिष्यः A student like an umbrella.

सौचक्यम्-सूचकस्य कर्म भावो वा सूचकः = Tale bearer.

सौतक्यम्-सूतकस्य भावः कर्म वा। सूतक। One who is having जाताशौच, Impriety on account of the birth of a child.

वैशस्त्यम्-विशस्तस्य कर्म भावो वा विशस्तः=Ill-mannered. Praised.

वैफल्यम्-विफलस्य कर्म भावो वा विफल=Fruitless.

आक्षैत्रज्ञ्यम् } अक्षेत्रज्ञस्य भावः कर्म वा
अक्षैत्रज्ञ्यम् } अक्षेत्रज्ञः=Other than the soul.

आयथातथ्यम् } अयथातथस्य भावः कर्म वा
आयाथातथ्यम् } यथातथ=As it is. True.

आपिशुन्यम्-अपिशुनस्य भावः कर्म वा अपिशुनः=One who is not a tale bearer.

आविदूर्यम्-अविदूरस्य भावः कर्म वा अविदूर=Not very distant.

आयथापुर्यम् } आयथापुरस्य कर्म भावो वा
अयाथापुर्यम् } अयथापुर=Which is not as before.

आनृशंस्यम्-अनृशंसस्य भावः कर्म वा अनृशंसः=One who is not cruel.

आकौशल्यम् } अकुशलस्य कर्म भावो वा
अकौशल्यम् } कुशलः=Skillful.

आनैश्वर्यम् } अनीश्वरस्य कर्म भावो वा
अनैश्वर्यम् } अनीश्वरः=One who is efficient.

आनैपुण्यम् } अनिपुणस्य कर्म भावो वा
अनैपुण्यम् } अनिपुणः=Who is not skillful.

C

अधः केचित् भावार्थकशब्दाः प्रदर्श्यन्ते।

Some words of भावार्थ are given below.

यौवनम् } यूनो भावः Youth
यौवनिका }

मैथुनम्-मिथुनस्य भावः Being a couple (wife and husband)

कौलीनम्-कुलीनस्य भावः Being connected with a noble family. An evil report scandal.

भ्रात्रम्-भ्रातुः भावः Brotherhood.

सौस्त्रम्-सुस्त्रियाः भावः Being a good woman.

प्राशस्त्रम्-प्रशास्तुः भावः Being a priest called प्रशास्तृ ।

स्थाविरम् } स्थविरस्य भावः Being old.
स्थाविर्यम्

चापलम्-चपलस्य भावः Fickleness.

क्षैत्रज्ञम्-क्षेत्रज्ञस्य भावः Being the knower of the body. Being a soul.

कौशलम्-कुशलस्य भावः Skillfulness.

नैपुण्यम्-निपुणस्य भावः Skillfulness

दौःस्त्रम्-दुःस्त्रियाः भावः Being a bad women.

दौष्ठवम्-दुष्ठु भावः Badness.

हौत्रम्-होतुः भावः Being a priest होतृ ।

होतुत्वम्-होतोः भावः Being a priest होतु ।

सौष्ठवम्-सुष्ठु भावः Being good.

कौतुकम्-कुतुकस्य भावः

कुतुक=(1) Eagerness (2) Marriage

कैतवम्-कितवस्य भावः Be witfulness

कितव=Gambler

कौस्त्रम्-कुत्सितस्त्रियाः भावः Being a bad woman.

कार्त्रम्-कर्तुः भावः Agent hood.

साब्रह्मचारम्-सब्रह्मचारिणः भावः Being a classmate.

सौब्रह्मचारिणम्-सुब्रह्मचारिणः भावः Being a good *Brahmacārin*.

ब्राह्मचारिणम्-ब्रह्मचारिणः भावः Brahmacarihood.

श्रामणम्-श्रमणस्य भावः । श्रमणः=श्राम्यतीति An ascetic.

श्रावणम्-श्रवणस्य भावः । श्रवणः=यथोपदेशं शृणोतीति One who hears as is taught.

वाधवम्-वध्वाः भावः Womanhood.

आध्वर्यवम्-अध्वर्योः भावः

अध्वर्युः =A priest.

कान्दुकम्-कन्दुकस्य भावः Ball-hood.

वार्षलम्-वृषलस्य भावः Sudrahood.

आनृशंसम्-अनृशंसस्य भावः

अनृशंसः=Not cruel. Kind.

पैशुनम्-पिशुनस्य भावः Tale bearing.

सौहार्दम् } सुहृदयस्य भावः Good
सौहार्द्यम् } heartedness. Friendship.
सौहृदय्यम्

दौर्हार्दम् } दुर्हृदयस्य भावः
दौर्हार्द्यम् } Bad heartedness. Enemity.
दौर्हृदय्यम्

औन्नेत्रम्-उन्नेतुः भावः । उन्नेता=गवेषणशीलः । Research minded.

साहसम्-सहसा इत्यस्य भावः सहसा=Suddenly.

कामण्डलवम् } कमण्डलोः भावः
कमण्डलुकम् } कमण्डलुः=पात्रविशेषः संन्यासिभिः धृतः ।

पात्तिगणकम्-पत्तिगणस्य भावः पत्तिगणः=Group of foot soldiers.

राथगणकम्-रथगणस्य भावः रथगण=Group of chariots.

हार्दम्-हृदयस्य भावः

पौरुषम्-पुरुषस्य भावः Manliness 'समासे तु (But in *Samāsa*) सहृदयता, सहृदयत्वम्, सत्पुरुषुता, सत्पुरुषत्वम्' (ग.र.म.पृ.432)

पारिव्राजकम्-परिव्राजकस्य भावः Being an ascedic.

सौभ्रात्रम्-सुभ्रातुः भावः Good brotherliness

सौभगम्, **सौभाग्यम्** - सुभगस्य भावः कर्म वा Being beautiful. Beauty.

औद्गात्रम्-उद्गातुः कर्म भावो वा। उद्गाता is a priest in sacrifices.

द्वैहायनम्-द्विहायनस्य भावः Being two year old.

याजमानम्-यजमानस्य भावः Being a performer of *yajna*.

भार्त्रम्-भर्तुः भावः Husbandhood.

दौर्भ्रात्रम्-दुभ्रातुः भावः Being a wicked brother.

वैपुलम्-विपुलस्य भावः Being broad.

प्रातिहर्त्रम्-प्रतिहर्तुः भावः

पतिहर्ता=A priest in sacrifices.

मानोज्ञकम्-मनोज्ञस्य कर्म भावो वा मनोज्ञः=Pleasing to the heart.

मैधावकम्-मेधावतः कर्म भावो वा मेधावान्=Intelligent.

आभिरूपकम्-अभिरूपस्य भावः अभिरूपः= Person of beautiful personality.

वार्द्धकम्-वृद्धस्य भावः Being old. Old age.

काल्याणकम्-कल्याणस्य भावः कल्याण=Auspicious.

चौरिका-चोरस्य भावः। '**चौरिकम्**'-इत्यपि

धौर्तिका, **धौर्तकम्** - धूर्तस्य भावः Being a deceit.

प्रैयरूपकम्-प्रियरूपस्य भावः Being of pleasing appearance.

आढ्यकम्-आढ्यस्य भावः। आढ्यः=आ पूर्णं ध्यायतीति आढ्यः। One who ponders over fully. A rich man.

श्रौत्रियकम्-श्रोत्रियस्य भावः

श्रोत्रियः=Vedic scholar.

सारपत्रिका, **सारपत्रकम्** - सारपत्रस्य भावः सारपत्रं=साराणि पत्राणि अस्य That which good leaves or vehicles.

सारपुत्रिका-सारपुत्रस्य भावः

सारपुत्रः= Having good sons.

छात्रकम्-छात्रस्य भावः Studentship.

यौवनिका-यौवनस्य भावः Youthfullness.

छान्दसकम्-छान्दसस्य भावः

छान्दस= Connected with *Veda*.

वैश्वदेवकम्-विश्वेदेवानां भावः विश्वेदेवाः= Name of a group of Gods.

बाहुलकम्, **बंहिमा**, **बाहुल्यम्** - बहुलस्य भावः Being very wide spread.

आमुष्यकुलिका, **आमुष्यकुलकम्** - अमुष्यकुलस्य भावः Being person of his family.

आमुष्यपुत्रिका, **अमुष्यपुत्रकम्** - अमुष्यपुत्रस्य भावः Being the his son

आदोरूपकम्-अदोरूपस्य भावः 'अदोरूप-शब्दः रूपप्रशंसायाम्' (ग.र.म. पृ.4.35) Being good personality. Beauty.

आवश्यकम्-अवश्यस्य भावः Inevitability.

कौपुत्रकम्-कुपुत्रस्य भावः Wicked sonness.

कौलपुत्रकम्-कुलपुत्रस्य भावः Being of the noble family.

ग्रामपुत्रिका (कम्) -ग्रामपुत्रस्य भावः Being the son of the village.

ग्रामकुमारिका(कम्)-ग्रामकुमारस्य भावः Being the son of the village.

ग्रामकुलालिका(कम्)-ग्रामकुलालस्य भावः Being the potter of the village.

ग्रामकुलिका(कम्)-ग्रामकुलस्य भावः Being the family of the village.

ग्रामसण्डिका(कम्)-ग्रामसण्डस्य भावः ।

ग्रामसण्डः=A village bull.

सौकुमारकम्-सुकुमारस्य भावः

सुकुमारः=सुष्ठु कुमारः A good son.

शिष्योपाध्यायिका-शिष्योपाध्याययोः कर्म भावो वा

'शिष्योपाध्यायिका वृत्तिर्यत्र स्यात् सुसमाहिता। यथावत् शास्त्रसंपन्ना कस्तं देशं परित्यजेत्' (शान्तिपर्व)

कापेयम्-कपेः भावः

ज्ञातेयम्-ज्ञातेः भावः

सख्यम्-सख्युः भावः

शौचम्-शुचेः भावः

मौनम्-मुनेः भावः

सौरभः-भम्-सुरभेः भावः

साहाय्यम् / **साहायकम्** } सहायस्य भावः

सौप्रख्यम्-सुप्रख्यस्य भावः

सुप्रख्यः= Famous.

गार्गिका-गार्गस्य (गर्गगोत्रोत्पन्नस्य) भावः Being born in गर्गगोत्र ।

मैत्रेयिका-मित्रयुगोत्रोत्पन्नस्य भावः Being born in the मित्रयुगोत्र

वैयाकरणिका-वैयाकरणस्य भावः Being a वैयाकरण ।

D

तर-तमार्थौ प्रत्ययौ

Suffixes of Comparative and Superlative degrees.

द्वयोः एकस्य विशिष्टस्य ग्रहणे 'तर' प्रत्ययः, त्रयाणां ततोऽधिकानां च मध्ये एकस्य विशिष्टस्य ग्रहणे 'तमप्' (तम) प्रत्ययश्च सर्वेभ्यः शब्देभ्यः प्रयुज्येते । केभ्यश्चित् शब्देभ्यः परौ 'ईयसुन्' (ईयस्) 'इष्ठ' प्रत्ययावपि तर-तमयोः स्थाने प्रयुज्येते । तयोरभावे तर-तमावेव । तेषु कानि चिद्रूपाणि अधः प्रदर्श्यन्ते-

Corresponding to the comparative and Superlative degrees the suffixes 'तर' and 'तम' are used in Sanskrit at the end of all the words (सुबन्त, Nouns, तिङन्त verbs, and अव्यय Indiclinables). But with some words 'ईस्' and इष्ठ are optionally used instead of तर and तम । Some such instances are given below.

पटु-पटीयस्

पटिष्ठ - (पटुतर-पटुतम इत्याद्यपि)

लघु -लघीयस् -लघिष्ठ

प्रशस्य -श्रेयस् -श्रेष्ठ । ज्यायस्-ज्येष्ठ ।

वृद्ध -ज्यायस् -ज्येष्ठ ।

अन्तिक -नेदीयस् -नेदिष्ठ ।

बाढ -साधीयस् -साधिष्ठ ।

युवा -कनीयस् -कनिष्ठ यवीयस्-यविष्ठ

अल्प-कनीयस्-कनिष्ठ अल्पीयस्-अल्पिष्ठ

स्रग्विन् -स्रजीयस् -स्रजिष्ठ

त्वग्वान् -त्वचीयस् -त्वचिष्ठ

भास्वान् -भासीयस् -भासिष्ठ

स्थूल -स्थवीयस् -स्थविष्ठ

दूर -दवीयस् -दविष्ठ

युवा -यवीयस् -यविष्ठ

ह्रस्व -ह्रसीयस् -ह्रसिष्ठ

क्षिप्र -क्षेपीयस् -क्षेपिष्ठ

क्षुद्र -क्षोदीयस् -क्षोदिष्ठ

प्रिय -प्रेयस् -प्रेष्ठ

स्थिर	-स्थेयस्	-स्थेष्ठ
स्फिर(महत्)	-स्फेयस्	-स्फेष्ठ
उरु	-वरीयस्	-वरिष्ठ
बहुल	-बहीयस्	-बंहिष्ठ
गुरु	-गरीयस्	-गरिष्ठ
वृद्ध	-वर्षीयस्	-वर्षिष्ठ
तृप्र (तृप्तः)	-त्रपीयस्	-त्रपिष्ठ
दीर्घ	-द्राघीयस्	-द्राघिष्ठ

वृन्दारक -वृन्दीयस्-वृन्दिष्ठ (वृन्दारकश्रेष्ठ)

बहु	-भूयस्	-भूयिष्ठ
दृढ	-द्रढीयस्	-द्रढिष्ठ
मृदु	-म्रदीयस्	-म्रदिष्ठ
तनु	-तनीयस्	-तनिष्ठ
बल	-बलीयस्	-बलिष्ठ
वर	-वरीयस्	-वरिष्ठ

E

सतिसप्तमी-Locative Absolute

संस्कृतभाषायां भावलक्षणसप्तम्याः प्रयोगः कश्चन विशिष्टः प्रयोगः। कांचन क्रियां लक्षयितुम् अन्या क्रिया निर्दिश्यते। 'रामे राज्यं प्रशासति सर्वे जनाः सुखिनः आसन्' इति वाक्ये रामराज्यप्रशासनं जनानां सुखभवनस्य लक्षकतया निर्दिष्टम्। 'गोषु दुह्यमानासु गतः' इति वाक्ये गमनस्य (कालस्य) गोदोहनं (गोदोहनकालः) लक्षकतया उद्दिष्टम्। एवं यत्र एको भावः (क्रिया) भावान्तरस्य (क्रियान्तरस्य) लक्षकतया निर्दिश्यते तत्र लक्षकक्रियावाचकः शब्दः सप्तम्यां प्रयुज्यते। अतः अस्याः **भावलक्षणसप्तमी** इति नाम। अस्याः भावलक्षणसप्तमीत्वं स्पष्टीकर्तुं 'सति' इति पदम् कदाचित् प्रयुज्यते। लिङ्गवचनानुसारेण शब्दस्यास्य परिवृत्तिः भवति। अत एवास्याः **सतिसप्तमी** इति लौकिकं नाम। एवं च प्रथमे वाक्ये 'प्रशासति' इत्यस्य अनन्तरं 'सति' इति, 'दुह्यमानासु' इत्यस्यानन्तरं 'सतीषु' इति अर्थस्पष्टतार्थं प्रयुज्यते। प्रयोगाभावेऽपि न दोषः।

The use of Locative Absolute is idiomatic and very popular in Sanskrit. When one action is used as indicative of the time of another action the word denoting the first action is used in सप्तमीविभक्ति। 'रामे राज्यं प्रशासति सर्वे जनाः सुखिनः आसन्', "When *Rāma* was ruling the subjects were happy", 'गोषु दुह्यमानासु गतः' "He went when the cows were being milked" etc.; are the examples. In the first sentence, the action of *Rāma* ruling (the time of *Rama's* rule) is used as the indicator of the action of the subjects being happy (the time of the happiness of the subjects). In the second example the action of drawing the milk of the cows is used as an indicator of the time of action of going. In the first sentence the word 'प्रशासति' denoting the first action which is indicative of the second action i.e. 'being', is used in सप्तमी। In the second sentence the word दुह्यमानासु denoting the first action, indicative of the time of the second action, 'going' is used in सप्तमी। It is called भावलक्षणसप्तमी because it is used when one भाव (action) is the indicator of the time of another भाव (action). In order to make it clear that the सप्तमी used in a sentence is भावलक्षणसप्तमी the word 'सति' is used (it need not be used also) along with the word in सप्तमी। सति

changes its gender and number in accordance with those of the word with which it is used. Thus the above sentences may be used 'रामे राज्यं प्रशासति सति . . .' and 'गोषु दुह्यमानासु सतीषु . . .' A sentence with a locative Absolute is generally translated in a sentence beginning with 'when', as seen above.

पूर्वोक्तेऽर्थे अनादरे द्योत्ये षष्ठ्यपि भवति। In the above sense षष्ठी also is used optionally when contempt is indicated. See 'रुदति रुदतो वा प्राव्राजीत्' ।

F

केषाञ्चिदव्ययानाम् अर्थविशेषाः

1. **च** (1) इत्यव्ययं द्वयोः क्रिययोः तुल्ययोगिता (समकालिकत्वं) द्योतयति It at times indicates simultaneity of two actions. 'कृतं च गर्वाभिमुखं मनस्त्वया किमन्यदेवं निहताश्च नो द्विषः' (2) कुत्रचित् हेतुतां सूचयति In some places it indicates the cause 'ग्रामश्च गन्तव्यः शीतं च' शीतात् कथं गम्यते इत्यर्थः । "I have to go to the village but there is so much cold. "But how to go because then is so much cold" is the idea indicated by च (ग.र.म.पृ.4)
2. **'ह'** इत्यव्ययम् आचरातिक्रमं सूचयति। 'ह' indicates impropriety of an action 'स ह ओदनं भुङ्क्ते, उपाध्यायं सक्तून् पाययति' (ग.र.म.पृ.5)
3. **'अह'** इत्यव्ययम् आचारातिक्रमं सूचयति। 'अह' also indicates impropriety of an action. 'स्वयम् अह रथेन याति, उपाध्यायं पदातिं गमयति। (ग.र.म.पृ.5)
4. **'चन'** 'चित्'-'चन इति चिदर्थे । विभक्तिप्रत्ययान्तात् पर एव चास्य प्रयोगः। तद्यथा कश्चन, काचन, किंचन, केचन, क्वचन। 'कदाचन, कथञ्चन' (ग.र.म.पृ.6)। चन, चित् इति अव्ययाभ्यां योगे किं शब्दप्रकृतिकानि सर्वाण्यपि पदानि अनिश्चितार्थतां सूचयन्ति । वाक्ये च आवश्यकताम् अनुरुध्य 'किम्' शब्दस्य लिङ्गविभक्तिवचनानां परिवृत्तिः भवति । When the particles 'चन' or 'चित्' is added to any word derived from 'किम्' it indicates uncertainity. Depending upon its place in the sentence the gender case and number of the 'किम्' शब्द undergo change कश्चित् नरः । काचित् नारी । किंचित् फलम् कस्मिन् चित् नगरे । कस्याःचन नार्याः। केनचित् कारणेन इत्यादि The अव्यय like कथम्, कदा कुत्र etc. do not undergo any change.
5. **यदुत**-अयम् अव्ययद्वयसमुदायः वाक्यार्थनिर्देशे उपयुज्यते । 'यदुत' is used to refer to the meaning of a while sentence (in a direct speech) 'सः त्वया वाच्यः, यदुत अत्रागम्यताम्' (ग.र.म.पृ.7)
6. **'यदि नाम'**-इति प्रकृतान्यथात्वे। To indicate that something is contrary to the expectation 'यदि नाम' is used 'विप्रोऽसि; यदि नाम मूर्खः' (ग.र.म.पृ.7)
7. **'ते'** 'मे' इति 'त्वया' 'मया' इत्यर्थे (अव्यये) 'श्रुतं ते राजशार्दूल' 'श्रुतं मे भरतर्षभ' (ग.र.म.पृ.12) 'ते' and 'मे' are the indeclinables in the sense

of 'त्वया' and 'मया'। एतादृशाः प्रयोगाः रामायणादिषु बहवः उपलभ्यन्ते।

8. **'येन तेन'** इति हेतौ। 'वितर गिरमुदारां येन मूकाः पिकाः स्युः'। 'नदीं तेन जगाम' गमने नदी हेतुः, द्वितीया लक्ष्यात्' (ग.र.म.पृ.12) 'येन' and 'तेन' are indeclinables indicating the cause or reason.

9. **'न याति'** इति न शक्यते इत्यर्थे। इदं तु कर्तुं न याति' (ग.र.म.पृ.29) 'न याति' is an indeclinable in the sense of not possible.

10. **'एहि'** इति प्रहासादौ। 'एहि मन्ये रथेन यास्यसि' 'एहि न त्वया जल्पिष्यामि' (ग.र.म.पृ.30) 'एहि' indicates jest. Above sentences mean - you are loping in vain to go by a vehicle, to talk with me.

11. **मा; माङ्**-'माङ्' इत्यस्य ङकारः इत्संज्ञकः- लुप्यते। 'मा' इत्येव परिशिष्यते। प्रायः माङा योगे धातोः लुङ् भवति। तस्य भूतार्थता त्यज्यते। केवलं माङ्-सहितं लुङन्तं क्रियापदम् 'एवं न कर्तव्यम्' इति रीत्या प्रतिषेधमेव बोधयति। 'स्म' इत्यव्ययेन सहितस्य माङः प्रयोगे लङपि भवति। माङा योगे लुङि लङि वा प्रयुक्तस्य धातोः आदौ 'अ' कारः आकारो वा न भवति यथा 'मा भवान् भूत्' 'मा स्म भवान् भवत्' इत्यादि। लुङ् लङ् भिन्नैः लकारैः सह प्रयुक्तः 'मा' इत्ययं शब्दः 'मा' एव, न माङ् इति पाणिनीयाः वदन्ति। यत्र लुङन्तस्य अडागमः आडागमो वा दृश्यते तत्रापि 'मा' मात्रमेव, न माङ् इति तेऽभिप्रयन्ति। 'मा' 'माङ' इत्यनयोः अभेदम् अङ्गीकृत्य केश्चित् नैघण्टुकैः 'मा' इत्यस्य प्रयोगाः एवम् उदाहृताः - निषेधार्थकः 'मा' शब्दः प्रायः लोडन्तेन सह प्रयुज्यते - 'मद्वाणि मा कुरु विषादमनादरेण' (भा.वि.4.41) 'मा कुरु धनजनयौवनगर्वम्' (मोहमुद्गरः) लुङन्तेन साकमपि प्रयुज्यते - 'पापे रतिं मा कृथाः' (भर्तृ.2.77) अत्र 'मा' योगे 'अकृथाः' इत्यत्र अकारः लुप्तः कुत्रचित् अकारः न लुप्यते - 'मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः' (रामा.) (आ) लङन्तेनापि प्रयुज्यते। अकारश्च लुप्यते 'मा चैनमभिभाषिष्ठाः' (रामा) 'मा गच्छस्त्वमितस्ततो गिरिश भोः' (शि.ल.) (इ) 'तथा न भवतु'; नोचेत् तथा भवेत्' इत्यर्थं सूचयितुं लृटा, विधिलिङा च सह प्रयुज्यते - 'लघु एनां परित्रायस्व, मा कस्यापि तपस्विनो हस्ते पतिष्यति' (अभि.शा.2) 'मा कश्चित् ममाप्यनर्थो भवेत्' (पं.तं.5) अस्मिन्नर्थे लोटा सहापि प्रयुज्यते- त्वरतामार्यपुत्र एनां समाश्वासयितुं, मा अस्या विकारो वर्धताम्' (मा.अग्नि.4) (ई) निन्दां द्योतयितुं शतृप्रत्ययान्तेन सह प्रयुज्यते 'मा जीवन्यः परावज्ञा दुखदग्धोऽपि जीवति' (शिशु.2.45) 'न जीवतु' इत्यर्थः। (3) य-तव्य-अनीयप्रत्ययान्तैः सह प्रयुज्यते। 'मैवं प्रार्थ्यम्'; 'मैवं कर्तव्यम्', (ऊ) कदाचित् 'मा' इत्यव्ययं क्रियापदेन विनापि प्रयुज्यते - 'मा तावत्' 'मा मा एवम्' एवं न वक्तव्यम्, एवं न कर्तव्यम् इत्यादिरर्थः। 'मा नाम रक्षिणः' 'रक्षिणो न भवेयुः किल!' इत्यर्थः। (ऋ) स्मोत्तरः माशब्दः लुङा, लङा च प्रयुज्यते। कदाचित्तु विधिलिङा।

'क्लैब्यं मा स्म गमः पार्थ' (भ.गी.2.3)
'मा स्म प्रतीपं गमः' (अभि.शा.4.17)
'मा स्म भवत्', 'मा स्म सीमन्तिनी काचित् जनयेत् पुत्रमीदृशम्'।

मा-is a particle of prohibition (rarely of negation). It is used imperative 'मद्वाणि मा कुरु विषादमनादरेण' (भा.वि.4.4)'मा कुरु धनजनयौवनगर्वम्' (मोहमुद्गर) (a) When it is used with Aorist the augment is dropped- 'पापे रतिं मा कृथाः' (भर्तृ. 2.77) The 'अ' is sometimes retained 'मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः' (रामा) (b) It is used with Imperfect (the augment is dropped here also.) 'मा चैनमभिभाषथाः' (रामा.) 'मा गच्छस्त्वमितस्ततो गिरिश भोः' (शिवानन्द) (c) It is used with the future or potential mood in the sense of 'lest' 'that not' लघु एनां परित्रायस्व, मा कस्यापि तपस्विनो हस्ते पतिष्यति' (अभि.शा.2) 'मा कश्चित् ममाप्यनर्थो भवेत्' (पं.तं.पृ.5) 'मा देव्याः किंचिदनिष्टम् उत्पन्नं भवेत्'। The Imperative mood also is sometimes used for the potential 'त्वरतामार्यपुत्र एतां समाश्वासयितुं, मा अस्या विकारो वर्धताम्' (मा.अग्नि.4) (d) It is used with Present participle when a curse is implied. 'मा जीवन् यः परावज्ञा दुःखदग्धोऽपि जीवति' (शिशु.2.45) or (e) With potential passive participle 'मैवं प्राथ्यम्', मैवं कर्तव्यम्' (f) It is sometimes used without any verb. 'मा तावत्' (Oh! do not do or say like this) 'मा मैवम्' 'मा नाम रक्षिणः' (may it not be the police) Sometimes मा followed by 'स्म' is used with the Aorist, or Imperfect with the augment dropped, and rarely with the potential mood. 'क्लैब्यं मा स्म गमः पार्थ' (भ.गी.2.3) 'मा स्म प्रतीपं गमः' (अभि.शा.4.17) 'मा स्म भवत्', 'मा स्म सीमन्तिनी काचित् जनयेत् पुत्रमीदृशम्'।

G

यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेष्यस्य।
तल्लिङ्गं तद्वचनं सैव विभक्तिर्विशेषणस्यापि॥

या विशेष्येषु दृश्यन्ते लिङ्गसंख्याविभक्तयः।
प्रायस्ता एव कर्तव्याः समानार्थे विशेषणे॥

इति नियमानुसारेण विशेष्यं यस्मिन् लिङ्गे, यस्यां विभक्तौ, यस्मिन् वचने प्रयुज्यते तेष्वेव लिङ्गवचनविभक्तिषु विशेषणमपि प्रयोक्तव्यम्। एतदेव विशेष्यनिघ्नत्वं नाम। परन्तु नियतलिङ्गाः शब्दाः तस्मिन्नेव (नियते) लिङ्गे प्रयुज्यन्ते। विभक्तिवचनयोस्तु परिवृत्तिः भवत्येव। यथा - 'दशरथस्य तपसः फलं रामः'। अत्र फलशब्दः नित्यनपुंसकलिङ्गः तस्मिन्नेव लिङ्गे प्रयुज्यते। 'रामलक्ष्मणभरतशत्रुघ्नाः दशरथस्य तपसः फलानि' 'तपसः फलेन रामेण' इत्यादिषु वचनविभक्त्योः परिवृत्तिः विशेष्यस्य वचनविभक्ती अनुसृत्य भवति। यदि जात्येकवचनम् अङ्गीकृत्य प्रयुज्यते तदा 'रामभरतलक्ष्मणशत्रुघ्नाः दशरथस्य तपसः फलम्' इत्यपि साधुः यथा 'वेदाः प्रमाणम्' इत्यादौ। एवं - 'भवतः दर्शनम् आनन्दस्य हेतुः', 'पत्युः विरहः तस्या दुःखस्य कारणम्', 'शीतत्वं जलस्य प्रकृतिः' 'सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः' (अभि.शा.1.20)

According to the general rule an adjective (विशेषण) should be used in the same gender, case and number as those of a substantive (विशेष्य). But there are certain exceptions. Words which have a fixed gender should be used in that gender though the case and number change according to the case and number of the substantive. For example in 'दशरथस्य तपसः फलं रामः' 'फलम्' is used in Neuter gender only though it refers to the word 'राम' which is in masculine gender. But in sentences like 'रामलक्ष्मणभरतशत्रुघ्नाः तपसः फलानि', तपसः फलेन रामेण' etc. the word 'फल' takes the number and cae of the विशेष्य। It is also correct to say 'रामलक्ष्मणभरतशत्रुघ्नाः तपसः फलम्' by using the word फल in जात्येकवचन (singular number to denote a species) as in 'वेदाः प्रमाणम्'। 'भवतः दर्शनम् आनन्दस्य हेतुः', 'पत्युः विरहः तस्याः दुःखस्य कारणम्', 'शीतत्वं जलस्य प्रकृतिः', सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः' (अभि.शा.1.20) इत्यादीनि उदाहरणानि।

H

सुहृदर्थकः 'मित्र' शब्दः, भार्यार्थकः 'कलत्र' शब्दः रक्षकार्थकः 'शरण' शब्दः, सन्तत्यर्थकः 'अपत्य' शब्दः अन्ये च केचित् जीवितम् इत्यादयः शब्दाः सर्वदा नपुंसकलिङ्गाः एव प्रयुज्यन्ते। एवं भार्यार्थकः 'दार' शब्दः, भार्या-गेहार्थकः 'गृह' शब्दश्च सर्वदा पुंलिङ्गे बहुवचने एव च प्रयुज्यन्ते। एवमेव देशवाचकाः आन्ध्र-द्रविड-कर्णाट-केरलादिशब्दाश्च। यथा- 'वेङ्कटेश्वरः मम मित्रम्', 'अनसूया शकुन्तलायाः मित्रम्', 'सीता रामस्य कलत्रम्', 'श्रीरामः शरणं मम', 'ललिता शरणं मम' 'दशरथस्य अपत्यं रामः' 'पर्वतस्य अपत्यं पार्वती', 'हिमवतः दाराः मेना', 'एते वयमिमे दाराः कन्येयं कुलजीवितम्। ब्रूत येनात्र वः कार्यमनास्था बाह्यवस्तुषु' (कुमा.6.63) 'मम मित्रस्य गृहेषु अद्य विवाहोत्सवः प्रचलति' 'कलिङ्गानां समनन्तरो देशः वङ्गाः' इत्यादयः।

The words मित्र, कलत्र, शरण, अपत्य, जीवित etc., are to be used only in neuter gender even when they are connected with words in other genders. 'दार' (wife) is to be used only masculine gender, plural number. So also the word गृहाः which means house or wife. Words like आन्ध्र, द्रविड, कर्णाट and केरल are used only in plural number. For examples see above.

उपसर्गाः- धातुभिः सह, तेषाम् अग्रे, कानिचित् अव्ययानि योज्यन्ते; तेषाम् उपसर्गाः इति नाम ते च द्वाविंशतिसंख्याकाः - प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर, वि, आङ्, नि, अधि, अपि, अति, सु, उद्, अभि, प्रति, परि, उप इति। एषु एकैकः, द्वित्राः, कदाचित् ततोऽप्यधिकाः उपसर्गाः धातुभिः योज्यन्ते। तैः योगे धातूनामर्थे महती परिवृत्तिः भवति।यथा- प्रभवति, पराभवति, संभवति, अनुभवति, अभिभवति, उद्भवति, परिभवति इत्यादि। अत एवोक्तम्-

उपसर्गेण धात्वर्थो बलादन्यः प्रतीयते।
प्रहाराहारसंहारविहारपरिहारवत्॥ इति।
(कौ.भूधातोः अन्ते)

कैश्चिद्धातुभिः सह बहूनाम् उपसर्गाणां प्रयोगः

दृश्यते । यथा पूर्वोदाहरणेषु । कैश्चित् धातुभिः केवलं द्वित्राणामुपसर्गाणामेव प्रयोगः, कुत्रचित्तु धातुजन्यपदैरेव (न तु धातुभिः) प्रयोगः उपलभ्यते । 'अद' धातोः उपसर्गाणां योगे प्रात्ति, समत्ति, अन्वत्ति इत्यादयः प्रयोगाः, प्रचोरयति, अनुचोरयति, विचोरयति इत्यादयश्च प्रयोगाः प्रायः नोपलभ्यन्ते । एवं संस्कृतभाषायाम् उपसर्गप्रयोगवैचित्री विशिष्य अध्ययनम् अर्हति ।

In Sanskrit there are 22 उपसर्गs (prepositions) like 'प्र' etc. by adding which at the beginning of the roots the meaning of the root gets completely changed. To one root one उपसर्ग, or two or even more are added and express different meaings. For example the roots भू and हृ convey different meanings by adding different उपसर्गs as shown below.

प्रभवति-Is born. Becomes capable of

पराभवति-gets defeated. Defeats.

संभवति - Is born

अनुभवति - enjoys

अभिभवति - Supresses

उद्भवति - Comes out

परिभवति - Insults

प्रहरति - Strikes.

आहरति - brings

संहरति - kills, collects

निहरति - Sports

परिहरति - Avoids

Some roots take many prepositions, some a few and some prepositions appear to be added to words derived from roots but not roots. We do not come across usages like प्रात्ति, समत्ति, अन्वत्ति etc., by adding उपसर्गs to the root 'अद्', similarly we do not find usages like प्रचोरयति, अनुचोरयति, विचोरयति । Thus the use of उपसर्गs deserves a special study.

इति शम् ।